# प्रथमः सर्गः

निपीय यस्य क्षितिरक्षिणः कथां तथाऽऽद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥१॥

यस्य क्षितिरक्षिणः क्ष्मापालस्य कथां प्रबन्धकल्पनां निपीय सादर-
-श्रवणपुरस्सरं मनःपेयद्रव्याधारगतां कृत्वा बुधास्तन्माधुर्यादिरसविशेषविदः[1] तथा पूर्ववन्माधुर्यवत्तया विश्वप्रसिद्धां [2]सुधाममृतापरपर्यायामपि नाद्रियन्ते, न बहुमन्यन्ते; स तथाविधः खलु नल आसीत्, नान्यः कोऽपीत्यर्थः । सुधामपि नाद्रियन्त इति परेषां दधि-मधु-घृत-दुग्धादीनामन्यकथान्तराणां वा गणनैव केत्यपि शब्दार्थः । पूर्वं हि तेषां तस्यामत्यादरोऽस्ति । यदि तु [3]कथमपि तैरियं निपीता, तदा तृणमिव तामनादृत्य [4]रत्नशलाकायामिव नित्यमस्यामेवादरं कुर्वन्ति ।

स पुनः कीदृश इत्याह । [5]सितच्छत्रितकीर्तिमण्डलो महसां राशिर्महोज्ज्वल इति । गौणमुख्यं भावं [6]विनैव विशेषणत्रयविशिष्ट इत्यर्थः । एतेन कथा-
-नायकस्य कीर्तिमत्ता, प्रतापवत्ता, धीरोदात्तादिगुणवत्ता च या प्रथमतः खलु वर्णयितुमुचिता, साऽत्र भङ्ग्या प्रतिपादिता ।

---

1. B2. गुणवत् च विशेषणविदः.
   B. गुणवत् च विशेषविदः.
2. B2. om. *hapl.* सुधा-.
3. B2. कथा-.
4. B2. -शलाकाम्.
   D. -शिलाकायाम्.
5. B2. om. सित-.
6. B2. om. विनैव.

कीर्तिर्विविधगुणमूला सुप्रशस्या प्रसिद्धिस्तस्या मण्डलं चक्राकृतिमान्संस्थान-
-विशेषः। सितं च तच्छत्रं च सितच्छत्रं, तद्वदाचरितं कीर्तिमण्डलं यस्य स
तथेत्यनेनास्यान्येभ्यो नृपेभ्यः सुदूरं व्यतिरेकः प्रदर्शितः। तेषां हि [1]वसनादि-
-मयं परिमितं नृपचिह्नं सितच्छत्रमस्य त्वपूर्वमेतदिति। महसां भूयसः
प्रतापस्य राशिः समुच्छ्रितः साक्षात् पुञ्ज एवेति तद्रूपतयैव दृश्यमानत्वात्।
दृश्यते चायमेव भेद[2]वर्णनव्यवहारः। यथा [3]माघे नारदवर्णने 'चयस्त्विषामित्यव-
धारितं पुरा ( )इति। महान् भूयस्तम उज्ज्वलः शृङ्गाराख्यो रसो
यस्य स तथा महान् प्रकृष्टः साक्षाच्छृङ्गार एव वा। धीरोदात्तत्वादिगुण-
सद्भावेऽपि धीरललितत्वादस्य शृङ्गारित्ववर्णनम्। चतुर्विधा हि [4]नायका
भवन्ति। धीरोदात्ता, धीरोद्धता, धीरप्रशान्ता, धीरललिताश्चेति। तत्र धीरोदात्ता
रामादयः। धीरोद्धता दुर्योधनादयः। धीरप्रशान्ता जीमूतवाहनादयः। धीरललितास्तु
नलादयः। तेषां च यथायथं वीररसादिषु विनियोगः। अत्र तु कथायां
शृङ्गारस्य प्राधान्यात् तत्प्रधानं नायकोपवर्णनम्। अयमेव चास्य श्लोकस्यार्थः
खलु कवेरस्याभिप्रेतः।

---

1. B2. वसनादिकं.
2. B1. -वर्णने.
3. B2. मे.
4. B2. सरका.

उत्तरत्र द्वितीयश्लोके पाठान्तरव्याजाद् भङ्ग्यन्तरेणास्यैव निबद्धत्वाद् यानि चार्थान्तराणि[1] पदसंबन्धादिविशेषणान्यपि यथायुक्ति घटनमायान्ति, तानि चैवं यथा 'क्षितिरक्षिणो राजानो, यस्य कथां निपीय तथा सुधां' इति निजस्य धर्मार्थकाममलक्षणपुरुषार्थत्रयहेतुभूतां[2] वसुधामपि नाद्रियन्ते, स नल आसीत्। अयमर्थस्तु सुधाशब्दादिभूतस्य वकाराक्षरस्याक्षरच्युतकभङ्ग्या च्युतत्वात्। ते हि तच्छ्रवणपरायणाः पुरुषार्थत्रयसिद्धिं तत एव मन्यमाना वसुधामप्यनादृत्य नित्यमहोरात्रं विद्वद्विनोदमुदमेवानुभवन्ति। उत्तरार्धार्थ-युक्तिस्तु[3] सर्वत्र पूर्ववै। एतेन भूलोके प्रतिनृपसभं तत्कथावस्थितिः कथिता।

अन्योऽप्यर्थो यथा- फणमण्डलाग्रधारणादिद्वारेण क्षितिरक्षिणो नागा यस्य कथां निपीय तथा सुधां[4] निजभोजनमपि[5] नाद्रियन्ते। यामाकर्णयन्तः खलु नेत्रकर्णास्तद्रसेनैव परितृप्तत्वात् निजभोजनेऽप्ययत्ना[6] इत्यर्थः। सुधा भुजगभोजनमिति त्वभिधानमस्त्येव। सा तु सुधा कक्कोलाख्या[7] प्रसिद्धा। बुभुक्षिताः सर्पाः किल तां परिलिह्यातीव सुहिताः सन्तः सुखेन बिलेषु शेरते। अनेन तु पातालेऽपि तत्कथा व्यवहरतीति सूचितम्।

---

1. B2. वर्णा-
2. B2. -वय-
3. B2. -श्च
4. B2. सुधान.
5. B2. om. -ज-.
6. B2. om. -य-.
7. B2. कक्कोलकाख्या.

अपरोऽप्यर्थो यथा- यस्य क्षितिरक्षिणो [1] यथाऽवनीपालकस्य राज्ञः कथां निपीय बुधा इति [2] विबुधास्तथा सुधामपि नाद्रियन्ते। अस्यास्ततोऽप्यधिकत्वात्। अयमप्यर्थो विशब्दस्य च्युतत्वात्। देवानाममृतभोजनं तु सुप्रसिद्धम्। एवमपि च स्वर्गेऽपि तत्कथा सबहुमानं प्रचरतीति दर्शितम्।

'सितच्छत्रिता कीर्तिमण्डले राष्ट्रे यस्य' इत्यादि व्याख्यानं तु विचार्य-माणमसङ्गतमिव व्यधिकरणासिद्धबहुव्रीहिसमासादिदूषणोत्पत्तेः। उत्तरश्लोके 'सुवर्णदण्डैकसितातपत्रित' इत्यत्र विसंवादात् च।

महद्भिरुत्सवैरुज्ज्वलः [3] कान्तिमानित्यप्यर्थोऽत्र। महोज्ज्वल इति केचिन् महसां राशेरेव विशेषणमाहुः। 'महान् गुरुरुज्ज्वलः कान्तो महसां [4] राशिरेव स नलः आसीत्' इति। प्रसिद्धे महोराशौ गौरवं कान्तत्वं च नास्ति। अत्र त्वेतद्द्वयमस्तीत्येतावानेव भेद इति च [5] तत्त्वार्थः।

त्रिभुवनव्यापिन्याः [6] कीर्तेर्मण्डलायस्थानवर्णनाद् अत्र हीनोपमत्वमिति शङ्का न विधेया। त्रिभुवनस्थाय[न]वि[पि]धानक्षमस्य तस्य विपुलस्यैव विवक्षित-त्वात्। सर्वस्यैव हि कीर्तिर्भूयसी वर्ण्यते। विशेषत[7]स्त्वेतादृशस्य राज्ञः [8] तादृश्याश्च कीर्ति[र्ते]र्म[9]ण्डलेनापि तादृशेनैव भाव्यम्। कीर्तेश्च मण्डलरूपेणा-वस्थानं [10] भूयस्तया सप्रसरं विश्वे मातुमशक्यत्वात्।

---

1. B2. यथावद् भूपालकस्य.
2. B2. om. वि-.
3. B2. कान्त्य-.
4. B2. राशेरिव.
5. B2. तत्रार्थः
6. B2. कीर्ति-
7. B2. om. -त-
8. B2. तादृशा;
9. B2. om. -ले-.
10. B2. तथा.

अत्र केचित् किञ्चिज्ज्ञाः सर्वज्ञा इव विचिकित्सन्तः प्रलपन्ति- 'निपीय- इति पदं स्वादनार्थ[1]सन्निहित पानार्थ[2]वाचकममङ्गलव्यञ्जकमत्र धुरि न युज्यते' इति। तच्चैवं 'निपीय' इति पदं मुख्यवृत्त्या रसनेन्द्रियग्राह्य- सुधादुग्धादि द्रव[3]द्रव्यविषयः। अत्र तु तद्गुणातियोगाद् गौणवृत्त्या तमु[दु]- -पादाय श्रवणेन्द्रियविषयभूतायां कथायां प्रयुक्तम्। परार्थेषु हि सर्वत्र महाकवीनां बाहुल्येन गुणग्रहणपूर्वैव प्रवृत्तिः। या चेयमीदृशी सा कथममङ्गलव्यञ्जिका भवेत्? अन्येषामपि सर्वेषां सज्जनानां परगुणकीर्तनैकपूर्वः समाचारः सर्वदर्शनेषु महते मङ्गलाय। धर्मशास्त्रा- -णामादिसूत्रं प्रथमपदत्वेनोपवर्ण्यते तद्रहस्यवेदिभिः। यच्च कश्चि- -निराशः खलु विपश्चित्पाशः क्षितिरक्षिण इत्यत्र रौक्ष्यकार्कश्य- -मन्यत्रापि 'कथां तथा' इत्यादावत्रानुप्रासः किमप्युल्बण इति निजचातुरी- -मात्समेषु प्रचारयति। तत्राप्येवं कान्तार नामानो रसाला[4] इव विरलप्रचाराः सन्तः कियन्त एव रसभारमन्थरं[5] नृत्यन्तीव[6] पदानि मन्दमुच्चारयन्तः - -स्तद्वर्णसौकुमार्यमुज्जीवयन्ति। न पुनः सुदुर्दान्तखलिबलीवर्दविषमोत्पथ- -प्रवर्तितविकटशकटगतिमनु कुर्वन्ति।

---

1. B2. वोपनार्थं.
2. B2. पादनार्थं.
3. B1. om. द्रव.
4. B2. रासोला.
5. B1. रसभारमन्थमणिं.
   B2. रसे नार मन्थराणि.
   -मन्थरं corrected.
6. B2. नृत्तन्तीव.

ह्लादुत्फुल्योत्फुल्य पठन्त: प्रतिपथ[1]सुलभा: शुष्कशमीकाष्ठनीरसा: शठा अत्र विचारणायां कुशा[2]ग्रीयमतीनामेवं सञ्चरणं, न पुनर्मुशलाग्रमतीनामिति। ये तु मिथ्याऽनुप्रासव्यसनिनस्तत्त्वमविदित्वैव 'कथास्तथा' इत्यत्र 'कथा' शब्दं बहु-वचनान्तं पठन्ति। तेषामेकवचनबहुवचनकृतविशेषाविशेषदर्शिन्या ज्ञानमयदृष्टे-र्यदि किल सृष्टिरेव नास्ति, तत्किं मुखलग्ना वृद्धोलूकानुकारिणी चर्ममय्यपि स्फुटिताय(क्षि)का? याऽ[3]त्रैव द्वितीयश्लोके तृतीयश्लोके चैनमेव कथाशब्दमेक-वचनान्तं पुस्तकेष्वपि लिखितं न पश्यति। अत्रै(थै)वात्र सिद्धान्तो यथा—

गौणं स्वादु कथाश्रितं धुरि पदं कान्तं निपीयेति यत्
साकूतं तदुदीरणादिह सृजेदानन्दमन्त: सताम्।
तस्मान्मङ्गलमेतदेव परमं काव्यस्य वस्त्वादिमं
ये मूढा: किल दूषयन्ति तदिदं ते पापिन: पित्सव: ॥१॥

माधुर्ये(र्यं) कर्कशत्वं च पदवाक्यार्थसङ्गतम्
स्वसंवेद्यं सतां तस्माद् विवेच्यं तद् द्वयं बुधै: ॥२॥

पियूषाब्धेर्यदि सुरगवी[4] जन्म विन्देन्नवीना
तत्कच्छोत्थं तृणमथ चरेत्सा पिबेत् तस्य तोयम्।
दुग्धं तस्या: क्वथितमथितं पिण्डितं खण्डयोगात्
श्रीहर्षस्य श्रुतिमधुगिरस्तत् प्रसह्यानुकुर्यात् ॥३॥

'निपीय यस्य' इत्यत्र यकारद्वयस्य [4.a.] अनन्तरितस्यान्यत्र क्षिद्वयस्य, थाद्वयस्य, धाद्वयस्य, लत्रयस्य, राद्वयस्य, वकारद्वयस्यान्तरितस्यावृत्तत्वादत्रानुप्रासोऽलङ्कार: ॥१॥

---

1. B2. —पथ—
2. B1. कुशी—.
3. B1. सङ्कायत्रैव.
   B2. सकात् त्रैव.
   याऽत्रैव. corrected.
4. B2. —गवीं.

रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद्गुणाद्भुतः।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥२॥

यस्य कथा रसैर्मृष्टत्वसम्पदा कृत्वा सुधावधीरिणी, सुधां साध्ववधीरयति, तृणायापि न मन्यते। ततोऽप्यधिकं सुमृष्टेति भावः। स नलो भूजानिर्भूपतिरभूत्। कीदृश इत्याह। गुणाद्भुतः। गुणैः शौर्यादिभिर्लोकोत्तरैरद्भुतो विस्मयकृदिति। कथानायकत्वेनास्य वर्णनेऽधिकारित्वमुक्तम्। ईदृश एवावश्यं वर्णनार्हः। तथा चायमेव कविः पुरो वक्ष्यति – 'वाग्[1]जन्मवैफल्यम[2]सह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्' (नै. ८.३२) इत्यादि। गुणैरद्भुताख्यो रस एव वा। अद्भुतादयः शब्दा हि यौगिका अपि तन्नामप्रसिद्धेषु [3]रसेषु रूढत्वेनैव प्रवर्तन्ते। यथा – कोऽयं रस इत्यादि पृष्टेऽद्भुत [4]इति प्रत्युत्तरम्। अत एव पुनः कीदृश इत्याह। सुवर्णदण्डेत्यादिविशेषणविशिष्टः। सुवर्णस्य दण्डः सुवर्णदण्डः। एकमद्वितीयं सितमातपत्रं एकसितातपत्रम्। सुवर्णदण्डश्चैकसितातपत्रं च सुवर्णदण्डैकसितातपत्रे, तद्वदाचरिते सुवर्णदण्डैकसितात[5]पत्रिते। ज्वलन्ती प्रतापस्यावलिः ज्वलतः प्रतापस्यावलिर्वा ज्वलत्प्रतापावलिः। कीर्तेर्मण्डलं कीर्तिमण्डलम्। ज्वलत्प्रतापावलिश्च कीर्तिमण्डलं च ज्वलत्प्रतापावलिकीर्तिमण्डले। सुवर्णदण्डैकसितातपत्रिते

---

1. B2. om -ग्-  3. B1, D. om. रसेषु.  5. B1. D. —पत्रे.
2. B2. om -म-  4. B1, B2. om. इति.

ज्वलत्प्रतापाचलितकीर्तिमण्डले यस्य स तथेत्यत्र यथासङ्ख्या[1]लङ्कृतिः । यस्येदृशमभिनवमातपत्रं जगत्त्रयस्य तापत्रयमपनयत् सुस्थितं चिर-मुत्थितं बभूवेत्यर्थः । अत्र केचिदाहुः । यस्य कथा रससम्पत्त्या सुधातोऽप्यधिकेति ग्राम्योक्तिरियम् । सर्वः कोऽपि हि दध्योदनादि भुञ्जानः 'कीदृशमिदमस्ति ?' इति केनचित् पृष्टः सन्नमृतवदित्यमृतादप्यधिकमिति वा प्रतिवक्ति । तन्नैवम्[2] । यतोऽत्र नेयमुपमा ग्राम्योक्तिसमा, अपि तु युक्ति-विशेषप्राप्तादुपमानाधिक्यात् महत्यलङ्कृतिराक्षेपः । तथा हि । सुधा तावत्[3] स्त्री । इयं कथाऽपि स्त्री । सुधायामधिको रसः । अस्यां त्वधिकतरः । तथाऽपि सुधा[4]स्वस्याँऽस्याश्च[5] साम्यं मन्यमाना सार्धमनया स्पर्धते । ततश्च स्वपर-बलाबलमविदित्वा दुष्टेयं विचेष्टमाना निकृष्टा चेटी दूरमुपेक्षणीयेति तामियमवधीरयति । निजतो हीन एव हि स्पर्धमान उपेक्ष्यते[6], न त्वधिकः । स स्व[4-6]तु यथाकथञ्चित् त्वरितमेव प्रतिकर्तव्यो न चेन्महदनिष्ट-मापतेदिति । या चेयमीदृशी भणितिभङ्गिः सा कथं ग्राम्योक्तिसमा ? अयं च व्यवहारः किञ्चिन्न्यूनाधिकरूपगुणयोर्नृपादिवनितयोर्दृश्यत एव ।

---

1. B. repeats ख्या.
2. B2. तन्नैवम्.
3. B2. तत्.
4. D. स्वधा.
5. B2. –प्यास्याश्च.
6. D. उपेक्षते.

व्याख्यानान्तरमपि यथा- 'रसैर्नवसङ्ख्याकैः शृङ्गारादिभिः कृत्वा यस्य कथा सुधावधीरिणी' ते हि सम्पूर्णरूपा यथास्थानमिह सन्ति। सुधायां त्वेक एव मृष्टत्वलक्षणो रसः सुप्रसिद्धः। अत एव स्वेन सह स्पर्धमानां तामधिकत्वादियमवधीरयति[1] एतच्च न घटते। एकजातीयेनैव कारणेन न्यूनाधिकतया स्थितेन लोके स्पर्धेयमीदृशी दृश्यते। यथा- यथार्थं विद्यया गुरुणा स्पर्धते, दानेन कल्पतरुणा, धनेन धनदेनेत्यादि। गुरुकल्प-तरुधनदा विद्यादानधनैरधिका विश्वप्रसिद्धाः। यत्र तु विजातीयन्यूनाधिक[2]-कारणकृताऽपि स्पर्धा दृश्यते, तत्राप्यधिककारणगुणाध्यारोपात्। यथा- कश्चन पापीयान् मत्सरी गर्दभारूढो मूढः केनापि पुण्यवता वरतुरगा[3]-रूढेन सह स्पर्धते। किञ्चस्त्वयमश्वकमारूढयैवं[4] गर्वभारमुद्वहति, ममार्थं गर्दभ एव भुजङ्गरिपुगतिस्तुरङ्ग इति। सुधायामेक एव रसः। अस्यां तु नवसङ्ख्याका रसा इति शब्दमात्रेण न्यूनाधिककारणसजातीयत्वं वा। केचन सुधायां षड्रसानाहुः। 'यो रसः किल यस्मै रोचते, सुधा तस्य तद्रूपतया परिणमति' इति। तदप्यसङ्गतम्। मृष्टतयैव[5] तस्याः सुप्रसिद्धत्वात्। मृष्टत्वं तु रुचिकरत्वमुपचाराम्माधुर्यमेव।

---

1. B2. om. यथा. 3. B1. वरतुरगाधि- 5. B2. पूर्णं तयैव.
2. B1. च- द्वी- तीय. 4. B1, 2. किं वस्त्व-

'रसैः' इत्येकस्यापि रसस्य महत्त्वाद् बहुवचनम्। करणेऽत्र तृतीया विशेषणे वा। भूर्जाया अस्येति भ्रूजानिर्बहुव्रीहिः। सुवर्णदण्डैकसितातपत्रिते सुवर्णदण्डैकसितातपत्रीकृते ज्वलत्प्रतापावलिकीर्तिमण्डले[1] इत्यत्र सितच्छत्रितवद्रूपसिद्धिः। अथवा प्रकारान्तरेण यथा- सुवर्णदण्डैकसितातपत्रिते करोतीति धात्वर्थविवक्षायामिणिति। सुवर्णदण्डैक- -सितातपत्र्यैते स्मेति वाक्ये क्त:, तस्मिन्निट् णिचि टीन इति तस्य लोपः। ततः सुवर्णदण्डैकसितातपत्रिते सुवर्णदण्डैकसितातपत्रीकृते ज्वलत्प्रतापावलि- -कीर्तिमण्डले येन यस्य वा। एतच्च गरीयः[2] प्रक्रियागौरवमुभयथा[3]ऽप्यत्रार्थस्य[4] गरीयसः प्रकारान्तरेण समावेशयितुमशक्यत्वात् कवीश्वरेणानेन स्वीकृतमिति न दोषः। सुवर्णदण्डयुक्तं प्रथमत एवास्ति। यदस्य सितमातपत्रं तद्रूपतां प्राप्ते ज्वलत्प्रतापावलिकीर्तिमण्डले यस्येति तु प्रतीयमानहीनोपमं व्याख्या [5.07] नं कविसमयबहिर्भूतानामेव[5]। आवलिः पङ्क्तिः। सा च कारणविशेषं विना तिर्यग- -वस्थितिरेव। अतस्तस्याः कथमूर्ध्वस्थितसुवर्णदण्डरूपतेति न जाने। यथाकथ- -ञ्चिद्दनेनैव राज्ञा तद्रूपतां प्रापिते वा। योग्यतया वा। आवलिरुपचाराद्रुच्छ्रितो राशिरेव वा। न खलु प्रतापोऽथमावलिरूपेण स्थितोऽस्ति। अपि तु विश्व- -व्यापिसमुच्छ्रितराशिरूपेणाशेषमन्यत् सहृदया[6] वत्तम्।

---

1. D. om. कीर्तिमण्डले.
2. B2. गिरीयः
3. D. प्रकृया.
4. D. -सुभयथा.
5. D. repeats. भूतानामेव.
6. B1. सहृदय्याया.

गुणा[1] अद्भुता यस्य स गुणाद्भुत इति व्यधिकरणासिद्धो
बहुव्रीहिः प्रायेणासमर्थः पदसंदर्भे तद्विन्यासासमर्थस्यैव । समर्थस्य पुन-
-रद्भुता गुणा यस्य सोऽद्भुतगुण इत्येव स्यात् । किञ्च गुणैरद्भुत
इत्यत्रापि विचार्यमाणमद्भुतत्वं मुख्यतया लोकोत्तरेषु गुणेष्वेवास्ति ।
तद्योगादेव नले । इयं च विचारणा कुशाग्रीयमतीनामेव विषयो, न तु
मुसलाग्रमतीनामिति प्रथमं प्र[2]दर्शितमेव । सुधावधी[3]रणक्षमकथासंबन्धे तादृक्
प्रतापकीर्तिसमु[4]दये चास्य विचार्यमाणं गुणाद्भुतत्वमेव हेतुः । न ह्येत[5]दैकं
विनैतत्त्रयं सम्भवेत् । अत्रापि दूरादूरवर्तिसजातीयवर्णावर्तनादनुप्रासोऽलङ्कारः ।
स च क्वापि निकटमैत्रिकः, क्वापि दूरमैत्रिकोऽत्र । अत्रेयं दीर्घसमासावृत्ति-
-माधुर्यसौकुमार्याभ्यां पाञ्चालीमनुकरोतीत्यतो न वक्तव्यमिह प्रथमत
एव नास्याधिकार इति । प्रतापस्य वीररसमूलत्वात् तद्वर्णनांशे वास्या
उपादानमत्र न विसदृशमिति दूषणग्रहणैकविमुखश्रीजिनप्रभसूरिप्रमुखविद्वज्जन-
-चरणनखसत्सख[6]लालितेन मया प्रलपितम् । पुरोऽपि बहु प्रलपिष्यामीति
निर्गर्वस्य मम सर्वमिदमत्र क्षन्तव्यमेव विचक्षणैः ॥२॥

---

1. B2. गुणो.
2. B1. om. प्र-.
3. B2. -धारण-.
4. B1. समुदाय.
5. B1. om. -त-.
6. B2. -लालितेन.

विवर्णयिषितेऽत्र काव्यवस्तुनि भङ्ग्यन्तरेण स्वस्याधिकारित्वमाह -

पवित्रमातनुते जगद्युगे स्मृता रसक्षालनयेव तत्कथा[1]।

कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥3॥

तस्यैतादृशस्य नलस्य कथा तत्कथाऽत्र पापीयसि कलिनाम्नि युगे स्मृता सती, जगत्पवित्रमातनुते, विश्वं पूतं करोति। अर्थादेतद्युग प्रसङ्गादपवित्रं सत्। नलः किल पुण्यश्लोकः। अत एव तत्कथा शक्तिमती। स्मृता चार्था-ज्ज्ञातैव। जगच्छब्देनात्रोपचारात् तत्रस्थो लोकः। अथवा स्मृताऽत्रैकेन अनेन जगच्च पवित्रं करोतीत्यतिशयोक्तिः। अत्र निमित्तान्तरारोपरूपामु-त्प्रेक्षामाह। उत्प्रेक्ष्यते रसक्षालनयेव जगत्पवित्रमातनुत इति संबन्धः।[5-6] तत्र हि रसाः सन्ति, तैश्च द्रवत्वात् क्षालना सम्भवत्येव। रसैः क्षालितं वसनादिवस्थमपद्रव्यसंसर्गादपवित्रं सत्पवित्रं भवति इत्यत्र रसशब्दस्य च्छलितत्वादयमर्थः। तत्त्वतस्तु रसाः शृङ्गारादयः। ते च युक्तितः संसेव्य-माना: किल महान्तमप्यंहःसमूहमपनयन्ति। सा च तादृशी तत्कथा मम गिरमाविलां कलुषामपि कथं न पवित्रयिष्यति? काव्याऽपि तु पवित्रयि-ष्यत्येवेत्यर्थः। यतः कीदृशीं मद्गिरमित्याह। स्वसेविनीमेव सर्वकालं सर्वथा निजाराधनतत्परां, या[2] किल ध्याता सती दूरतरवर्ति जगत्पवित्रं करोति। सा मद्गिरा शश्वत्सेव्यमानां तां कथं न पवित्रयेत्?

1. B1. यत्कथा. 2. B1. om. या.

स्मरणं हि मानसं कर्म। तद् दूरतोऽपि भवति। सेवा तु कायिकम्।
तत्सान्निध्यादेव[1]। सन्निहितवस्तुनि सन्निहितवस्तुनोऽपश्यं कियन्तोऽपि
गुणाः सङ्क्रामयन्ति, यदि न समस्ताः। अयमर्थस्तु सर्वजनविदित एव।
तस्याश्च पवित्रत्वं दर्शितमेव। गिरोऽत्राविलत्वं पद्[2]वाक्यादिदोषसंसर्गः।
संस्काराभाव एव वा। ततोऽन्यत् पवित्रत्वम्। पवित्रं करोति पवित्रयतीति
धात्वर्थविवक्षायामिन्। आविला गिरस्तत्कथासेवनक्रमवशेन पावित्र्यस्य क्रम-
-भावित्वेन विवक्षितत्वादत्र भविष्यन्ती। पूर्वार्धे युक्तिस्तद्वर्णनमपि॥३॥

पुंसः पुरुषार्थचतुष्टयस्य नानावृत्तीनां च विशिष्टं[3] कारणं विधा एवेति
प्रथमतोऽस्य भक्त्या तासां सम्पूर्णानां[4] सम्प्राप्तिमाह—

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दश स्वयम्॥४॥

न वेद्मि स्वयमात्मनैव चतुर्दशसु चतुर्दशसङ्ख्याकासु विद्यासु विषये
कुतः कस्मादयं नलः पुनश्चतुर्दशत्वं कृतवान् करोति स्मेति। वाक्यार्थ-
-स्यैवात्र कर्मता। विद्यासु चतुर्दशत्वं सर्गक्रमसिद्धमेव प्रसिद्धमस्ति। अनेन
च तासु पुनस्तत्किमर्थं कृतमिति नाहं जाने। घटे हि घटत्वं कुम्भकार-
-कृतं स्वयमेवास्ति। तत्र यदि पुनः कश्चिद् घटत्वं करोति, तत्रान्येन
विलोककेन[5] हेतुर्न ज्ञायते। किं कुर्वंश्चतुर्दशत्वं कृतवानित्याह[6]। अधीत्यादि-
-भिश्चतुर्भिरुपाधिभिरुपायैश्चतस्रो दशा अवस्थाः प्रणयन् कुर्वन् अर्थात्
तासामेव एवमपि हि तासु चतुर्दशत्वं सिध्यति।

---

1. B1. सांनिधीयमेव. 3. B1 विशिष्टकारणां. 5. B2. विलोककेन.
2. B1. कृद–. 4. B1. om. सं–. 6. B1-2. om. hapl. कृतवान ---- चतुर्दशत्वं.

तथा हि चतस्रो दशा यासां ताश्चतुर्दशास्तासां भावश्चतुर्दशत्वमिति चतु-
-र्दशाशब्दस्य त्वप्रत्यये परे पुंवद्भावे सति चतुर्दशत्वरूपसिद्धिः। चतुर्भि-
-रधिका दश चतुर्दश, तेषां भावश्चतुर्दशत्वमिति तु प्रसिद्धमस्त्येवेति
शब्दमात्रेणैव सादृश्यात् पौनरुक्त्यमुत्पाद्य कविरयमुवाच। अर्थतस्तु निर्णये
क्रियमाणे दूरतो भेद एव। कवेरस्य च शीलमिदं यत्प्रायेणैवंप्रवृत्तिः। अधीति-
-रध्ययनम्। बोधो यथा[6·a.]ऽर्थावगमः। आचरणं तदुक्तार्थानुष्ठानम्। प्रचारणं
शिष्येभ्यः प्रतिपादनम्। अधीतिश्च बोधश्चाचरणं च प्रचारणं चेति द्वन्द्वः॥४॥

चतुर्दशत्वं प्रसिद्धविद्यासिद्धिस्तस्य प्रतिपाद्यमतान्तरपरिकल्पिताष्टा-
-दशत्वविद्यासिद्धिमाह –

अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥५॥

[2]रसनाग्रे नृत्यतीत्येवंशीला रसनाग्रनर्तकी स्वतीव स्फुरद्रूपा खल्वमुष्य
पूर्वोक्ता चतुर्दशतयी विद्याऽष्टादशतामगाहत। सैवाष्टादशत्वं सम्पूर्णमवापेत्यर्थः।
किं कृत्वा सतीयमेवं चकारेत्याह। विस्तरं नीता प्रसरं प्रापिता सती। केनेत्याह।
अङ्गगुणेन शरीरधर्मेण। शरीरं हि यत्र यत्र चाल्यते, तत्र तत्र चलति। यथाऽ-
-निर्विण्णीभूय चतुर्दशाऽपि विद्याऽवयवा अनेन वशीकृतास्तथा चत्वारोऽन्येऽपीति
भावः। ते च चत्वारोऽपि भेदाः पूर्वविद्यानामेव प्रसरः। केवेयमष्टादशतामगाहते-
-त्याह। त्रयीव। सङ्ख्येयगता त्रिसङ्ख्येव। यथा कस्यापि गणनप्रवृत्तस्याग्निरुद्र-
-नेत्रादिगता त्रयी त्रिसङ्ख्या खल्वङ्गानामिति सङ्केतवशाल्लक्षणां गुणेन

1. B2. om. दश. 2. B1. 2. 8. om. रसनाग्रे ----- अष्टादशतां.

गणितशास्त्रप्रसिद्धेन वर्तनेन कृत्वा विस्तरं नीता सती सप्तगष्टादशतां गाहते। त्रयः षड्भिर्गुणिता ह्यष्टादश भवन्ति। 'अङ्गानीति च गणितशास्त्रे षण्णां संज्ञा' इति शब्दमात्रेण श्लेषवशादुपमानोपमेयभावः।

केचित् तु त्रयीं वेदत्रयीमाहुः।[1] तन्न। पूर्वव्याख्याने तस्या अपि युक्त्या सूचितत्वात्। वेदानां[2] वा वह्निनेत्रादीनां वा त्रयी भवतु। त्रिसङ्ख्यामात्रेणैवात्र साध्यसिद्धिः। किं विशेषकथनेन?

केचिद् विद्यापक्षे खल्वङ्गानि षट्शीक्षादीन्याहुः। षण्णां शीक्षादीनामङ्गानामेवार्थं गुण उपकारो यच्चतुर्दशत्वविशिष्टा विद्याऽष्टादशत्वविशिष्टा दृष्टास्येति च व्याचक्षते। तच्च विचक्षणैर्विचार्यं अङ्गेभ्यश्चतसृणामायुर्वेदादीनां सम्भूतिर्घटेन्न वेति। गीतयः सामवेदादुत्पन्नास्तासां पुष्टिकृत् तु शिक्षा घटते। छन्दश्च नृत्यादिकलाकौशलकृत्। व्याकरणं च[3] लिपिमूलत्वात् चित्रादिकौशलकृत्। आयुर्वेदधनुर्वेदयोः कुतः सम्भवस्तद्विचार्यम्।

केन हेतुनैव चकारेत्यत्र गम्यमानसम्भावनगर्भहेतुमाह। नवद्वयद्वीपपृथग्जयश्रियां जिगीषयेति। द्वाववयवौ यस्य तद्द्वयं द्विसङ्ख्यापरिमाणम्। द्वयं च द्वयं च द्वयानि। नवद्वयानि नवसङ्ख्याकद्वयसङ्ख्याकानि[4] यानि द्वीपानि, तेषां पृथक् प्रत्येकं या जयश्रियः उत्कर्षसम्पदस्तासां जेतुमिच्छया। यश्च जितः स वशीभूत एव। विद्याबलेन हि सर्वं जीयते। विद्याश्च चतुर्दश, द्वीपश्रियस्त्वष्टादशेति वैषम्याद् विद्यानां प्रत्येकजयश्री जयो दुर्घट इति ताभिरष्टादशभिर्भूतमिति भावः। नवानां नवसङ्ख्याख्या या [6.6] द्वयं ये द्वीपा इति वा।

---

1. B2. तत्र.
2. B1. वेदादीनां.
3. B1. om. च.
4. B2. नवसङ्ख्याकानि.

A no. of meanings embraced by the author

आयुर्वेद, धनुर्वेद, गान्धर्वकलाकौशलभेद[1]चतुष्टयावयवचतुष्टयवशाच्चतुर्दशतय्येव[2] विद्या-
-ऽत्राष्टादशतयी व्याख्यानान्तरलेशोऽप्यस्ति। यथा - अमुष्य नलस्य रसनाग्रनर्तकी
रसनस्य[2] रसनेन्द्रियस्याग्रनर्तकी पुरतो[3] नर्तनशीला विद्या सूपकारविद्या, सा
किल पुरः पुरोभूता नृत्यति। तस्याः पश्चात्पश्चाद्भूतं[4] तया ह्रियमाणं रसनेन्द्रियं
नृत्यति। अतोऽस्या रसनाग्रनर्तकीति नाम रसनेन्द्रियहरणहेतवः। संकीर्णा संकीर्णाः
षडपि रसा उपदेशरूपेण तत्र सन्ति। अत एव विद्या रसनेन्द्रियं[5] तथा विचेष्ट-
-यति। रसनेन्द्रियस्य च रसास्वादलौल्यं सुप्रसिद्धमेव। सा किलाष्टादशतामगाहत।
कीदृशी सेत्याह। अङ्गानां षण्णां मधुरादीनां रसानां गुणेन धर्मेणाष्टादशतां
लेह्य, चोष्य, पेयभेदेन नीता प्रापिता सती। लेह्य, चोष्य, पेयभेदभिन्नं[6] तु प्रधानं
किल भक्ष्यमेकमेव। अदनीयमेव हि भेदत्रयेण भिद्यते। अत्र पक्षे विस्तर-
-नयने नलस्यैव कर्तृत्वम्। अथवाऽङ्गस्य शरीरस्य गुणो लक्षणयाऽतिनिकट-
-वर्ती सूदस्तेन विस्तरं नीता, यथास्थानं विनियोजिता। नलः प्रायेण न स्वयं
पाककर्म करोति। अपि तु निजशिष्यतां गतेनातीवाप्तेन सूदेन कारयति।
सूपकारविद्यायामिदमष्टादशत्वं सृष्टिक्रमसिद्धमेवास्ति। तदा तु तादृग्रूपाया -
-स्तस्या नलात् प्रवर्तनमस्तीति नलस्येयमीदृशीति व्यवहारः। केचित्
त्वमुष्य विद्या ह्यहृदयवेदित्वलक्षणाऽष्टादशतामगाहतेत्याहुः। तस्याश्च विस्त-
-रतो यदष्टादशत्वं तत्त एव विदुः। नात्र मम परिचय इत्युपेक्षितम्।
तत्र अन्यथाघटनमत्र प्राज्ञैरभ्यूहनीयम् ॥ ५ ॥

---

1. B2. – कौशलमभेद– .
2. B2. repeats रसनस्य.
3. B1. पुरो.
4. B1. पश्चा पश्चाद्भूतं.
5. B2. एवेयं इदं.
6. B2. – भेदे भिन्नं.

स खलु शास्त्रानुरोधेनैव व्यवहरति स्म, न पुनः साहसिकतया राभस्येनेति दर्शयति —

दिगीशवृन्दांशविभूतिरीशिता दिशां स कामप्रसरावरोधिनीम् ।
बभार शास्त्राणि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकाम् ॥ ६ ॥.

प्रथमतश्छलपक्ष एव व्याक्रियते यथा — स नलः शास्त्राणि मन्वादिप्रणीतानि चाणक्यादिमूलभूतानि[1] दृशं मुख्यावयवभूतां दृष्टिं बभार । कीदृशीमित्याह । द्वयमुभयमर्थाद् दृशोश्चर्ममयं यदस्ति ततोऽधिका रूपेणातिरिक्ता तां तृतीयामित्यर्थः । तथा कामस्यानङ्गस्य[2] यः प्रसरः स्वैरचारस्तस्यावरोधिनीं निषेधिकां, सैव तत्त्वतः[3] कामप्रसरावरोधे हेतुः । तद्दृष्टिं विना तस्यासम्भवात् । अत एव कीदृशीं तदाह । निजस्यात्मनस्त्रिनेत्रावतरत्वस्य त्रिनयनावत[7.a]रत्वस्य बोधिकां ध्वन-थित्रीमीदृशीं दृशं[4] दृष्ट्वा हि ज्ञायते । नूनं नेत्रत्रयोपलक्षितो यो भगवा-नागमैः सर्वज्ञः स एवायमत्र धरित्र्यां द्वितीयवर्णपतिर्नृपतिरवतीर्ण इति । यतोऽयं[5] त्रिनेत्रावतारस्तत एव कीदृशस्तदाह । दिगीशानामिन्द्रप्रभृतीनां वृन्दे मेलकविषयेऽंशो यज्ञभागस्तथा विभूतिरष्टविधमैश्वर्यं विशिष्टा भूतिर्भस्म वा यस्य स तथा । किञ्च दिशामर्थादीशान्या दिश ईशिता प्रभुः । भगवत-स्त्रिनयनस्यैतदुभयं युज्यत एव । दिशामित्येकत्वेऽपि भगवता भवेन साक्षात् चिरमधिष्ठितत्वात् पूज्यत्वविवक्षायां बहुवचनं[6] शब्दमात्रेणैतदुभयमत्रास्त्येव । तत्त्वतस्तु स शास्त्राण्येव दृशं बभार । तया कृत्वा सर्वं भाविहिताहितमपश्यदित्यर्थः ।

---

1. B1. — सूल —.
2. B1. — मङ्गस्य.
3. B1. om. त —
4. B2. दृशीं.
5. B1. यत्रो —
6. B1. — वचनी.

ईशः कार्यस्य करणात् शास्त्राणां ईशत्वमुपपन्नमेव। कीदृशीमित्याह। दुर्याधिकाम्। अर्थात् गुणेन। न हि शास्त्रदृष्ट्या। यादृशं यावद् दृश्यते तावत् चर्मदृष्टिभ्याम्। किञ्च कामेन निजेच्छया यः प्रसरो निरङ्कुशो व्यवहारस्तस्यावरोधिनीं निवारयित्रीम्। शास्त्री हि सर्वत्र तदेवानुवर्तते। पुनः कीदृशीमित्याह। निजस्य यत् त्रिनेत्रावतारत्व-मीश्वरावतारत्वं तस्य बोधिकाम्। न हि भगवन्तं सर्वज्ञमीश्वरं वर्जयित्वाऽन्यत्रेदृशी विधा घटते। कीदृशोऽयमित्याह। दिगीशवृन्दस्यांशाः कलास्ततो विशिष्टा भूतिर्जन्म यस्य स तादृक्। दिक्पालानां कलाः समादाय किल विधिस्ताभिर्यथास्थानसंयो-जिताभिः क्षितिपालं विदधाति। तथा दिशामीशिता[1] स्वामी तत्तद्दिग्विभवोप-भोक्तेत्यर्थः। एतद्विशेषणद्वयमस्योपपन्नमेव ॥६॥

अवगतबहुशास्त्रपरमार्थतया पार्थिवोऽयमतीव धार्मिकस्तस्य प्रजाऽपि तथैवेति दर्शयति—

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन् दधावधर्मोऽपि कृशस्तपस्विताम् ॥७॥

कृते कृतयुगे के जना न तपः प्रपेदिरे? अपि तु सर्वेषां तपसः प्राप्ति-रभूत्। क्व सतीत्याह। अमुना पूर्वोक्तगुणेन सुराज्ञा सुकृते वृषे। चतुर्भिः पदैः स्थिरीकृते निश्चलत्वं प्रापिते सति। नलः किल कृतयुगेऽभूत्। तस्मिंश्च भुवं शासति, तत्र चतुष्पाद् धर्मः। सम्पूर्णतैव चास्य चतुर्भिः पदैरवस्थितिः। कुत एवं प्रतिजानीते भवानित्याह। यत् कारणादधर्मोऽपि कृशो दुर्बलः संस्त-पस्वितां तपोधनत्वं दधौ। तपस्विन एव हि यमनियमादिक्लेशबाधित्वा[2]दति-दुर्बला भवन्ति। किं कुर्वन्नयमेवं चकारेत्याह।

1. B1. repeats – शिता स्वामी. 2. B1. – बाधितत्वाद्.

एका चासावङ्घ्रिः कनिष्ठाख्याङ्गुली च तया भुवं स्पृशन्। एतदेव च महत् तपः पुरुषस्य यद् बहूपवासादिक्[7. 6]शस्य सतः पादकनिष्ठाङ्गुली-भूस्पर्शपूर्विका चिरकालावस्थितिः। यदा चाखिलपातकोपपातकादिमूर्तिरधर्मो-ऽप्येवं तपस्यति, तदाऽन्ये कथमिव न तपस्येयुः। तत्त्वतस्तु विरलप्रचार-त्वादतीव तनुरधर्मोंऽशांशेन भुवं स्पृशन् खलु तपस्वितां वराकत्वं दधाति[1]। युक्तमेव भुवि सम्पूर्णे धर्मे स्वैरं विहरति सति[2] सर्वेषां जनानां भूयसस्तपसः प्राप्तिः। एक एवाङ्घ्रिर्यस्य स एकाङ्घ्रिकस्तस्य निष्ठा[3] मनस एकाग्रता तयेति वा। कृतयुगे किलाधर्म एकपात्। करुणाप्रतिपादने तपस्वीव॥७॥

शक्तिमतः क्षितिपतेः किलायमेव प्रथमः पृथुर्धर्मो यत् प्रतिपक्ष-विषयविग्रहेणाक्षयकोशवृद्धिरित्यस्य तद्दर्शयन्नाह—

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ॥८॥

स्फुरतः समुल्लसतः प्रतापानलधूमस्येव मञ्जिमा चारुत्वं यस्य तदेवं-भूतमस्य[4] नलस्य यात्रासु भूयो भूयः समारभ्यमाणप्रयाणकविषये यद् बलोद्धतं च तुरङ्गसैन्योत्खातं रजो धूलिपटलं तदेव गत्वा विधौ पतितं सत् खलु अङ्कतां दधाति। किं कुर्वदित्याह। [5]बहुत्वात्कालक्रमेण [6]पङ्कीभवत्। तदेवेदं जम्बालभावमापाद्यमानमद्यापि कलङ्क[7]रूपं दृश्यत इति भावः।

---

1. B2. दधाविति.
2. B2. om. सति.
3. B2. निष्ठो.
4. B1. -भूतस्य
5. B1. यद् यत्.
6. B1. एकीभवत्.
7. B2. कलङ्कि-

यतः कीदृशे विधौ तदाह। सुधायाः अम्बुधावभृतस्य समुद्रे सुधैवाम्बुधीयते यत्रेति वा। अत एवात्र गत्वा पतितस्यास्य भूयसो रजसः कालक्रमेण पङ्क-व्यापत्तिः। अपरेष्वपि[1] हि जलाशयेष्वयं विधिर्दृश्यते। सुधा स्वच्छत्वशुभ्रत्वाभ्यामियं प्रसिद्धैव। गत्वा पतितमिति दवीयोऽध्वगमनखिन्नजनजातिः। स हि गत्वा पतित इत्युच्यते। तस्य खलु गत्वा खट्वादौ[2] पतितस्य चेष्टान्तरशक्तिर्नेष्टा दृष्टात्र सर्वैरेव। अन्यथा गमनं विना तत्र पतनमेव न भवेदिति। तदुपादानं निरर्थकमेव स्यात्। भूमण्डलात् च चन्द्रमण्डली दवीयसी विदित एव। नलबलसमुत्थातस्य धूलिपटलस्य भङ्ग्या धर्मद्वयारोपणेन कवेरस्य ॥✓ कविकर्मणः कौशलमाविष्क्रियते ॥८॥

यात्रानन्तरं यदस्य संवृत्तं तद्दर्शयति —

स्फुरद्धनुर्निस्वनतद्घनाशुगप्रगल्भवृष्टिव्यथितस्य सङ्गरे।
निजस्य तेजःशिखिनः परःशता वितेनुरङ्गारमिवायशः[3] परे ॥९॥

परे शत्रवोऽर्थादस्यैव सङ्गरे संयत्यशो वितेनुः। उक्तहेतुशमिततेजस्त्वात् पलायितानां सत्त्वतया[4] विमुखीभूतानां वा तेषामकीर्तिः खलु भूयसी परितः प्रसृतेति भावः। ते च परःशता असङ्ख्याता, न तु परिमिताः। बहुभिरबहवो जीयन्त इत्यत्र किं चित्रम्। उत्प्रेक्ष्यते। [४.a] इदमयशो नैव किन्त्वेनमङ्गारं वितेनुः। कस्येत्याह। निजस्य तेजःशिखिनः स्वमङ्गपावकस्य। कीदृशस्येति च्छलेनाह। स्फुरद्धनुरित्यादिशब्दमात्रप्रतीयमानकर्तृशमितस्य।

---

1. B1. अपतेरे —
2. B1. खट्पादौ.
3. B1. —रिङ्गाल —
4. B2 निःसत्त्वतया.

तच्चैवं यथा- स्फुरदुल्लसद् धनुरिन्द्रायुधं यत्र स्फुरद् धनुः । निस्वनं गर्जन[1]-
-शब्दं तनोतीति निस्वनतत् । एवंभूतो यो[2] घनो मेघस्तस्याशुगा वेगवती[3]
प्रगल्भा स्थूलबिन्दुमती या वृष्टिस्तया व्यथितस्य शमितस्य । एवंभूत-
-स्याग्नेरङ्गारः खलु लोकोक्तौ कुलाख्यया[4] प्रसिद्धो मषीनिर्माणक्षमोऽतीव
कृष्णो भवति । अत एवायशोऽत्र तद्रूपतयोत्प्रेक्षितम्[5] । कविसमये ह्ययशो
मूर्तं कृष्णं च वर्ण्यते । तत्त्वतस्तु तत्तेजसो यादृशस्य तच्चैवं यथा-
स्फुरन् धनुषो निःस्वनो[6] विस्फारो यत्र सा तादृशी घना निरन्तरा
तस्य *नलस्याशुगानां[7] बाणानां प्रगल्भा प्रौढा दृढा, न तु शिथिला
या वृष्टिः[8] सततपतनाख्या[9] तया व्यथितस्यास्तनीतस्य एवं च तेषां
तेजसः शरीरस्थस्योत्साहलक्षणस्य व्ययो युक्त एव । तस्येति प्राधान्यात्
तदुपादानम् । एवंभूताया बाणवृष्टेरन्येषामपि हि तद्धन्विनां संबन्धो-
-ऽस्ति । इयद्दयवेदित्वाद् वरतुरगारूढस्य धावित्वा पुरोभूय युध्यमानस्य
तस्यैव वा शार्ङ्गधनुःकौशलं कथितमिति । परःशता इति शतात् परे ।
परःशताधास्ते येषां परा सङ्ख्या शताधिकात् । रेकारद्वयस्य पञ्च-
-माक्रान्तगकारद्वयस्य[10] च दूरावर्तनाद् दूरमैत्रीकोऽयमनुप्रासः । अन्य-
-वर्णकृतस्तु स्वयमेव पाठकैर्ज्ञेयः ॥९॥

1. B2. गर्जनं.
2. B1. om. यो.
3. B1. om. -व-.
4. B1. -ख्यया.
5. B1. तद्रूप-
6. B1. विस्वना.
7. B2. om. -गा-
8. B2. दृष्टिः
9. B2. सं-
10. B2. -पकार-.

* B1 & B2 om. hapl. नलस्य ----- तनीतस्य.

एवं विधिवद्दिग्विजयं विधाय, विजयश्रिया शालमानो[1] विशालमानो नलः पुरस्कृताक्षतबलः[2] स्वपुरमाययाविति दर्शयन्नाह –

अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजधः ॥१०॥

स राजधः प्रतिनृपहन्ता नलो नीराजनया रराज । कीदृश्येत्याह । जयाय सृष्टया । नीराजना हि जयार्थं क्रियते । किं कृत्वा[3] रराजेत्याह । भुवो वलयं धराया मण्डलं प्रदक्षिणीकृत्य । भूर्वसुन्धरा, तस्या वलयं मण्डलम् । अथ च वर्तुलहुसन्तिकाख्यं[4] कुण्डरूपं वा । तस्य प्रदक्षिणीकरणानन्तरं हि राजभिर्जयदायिनी नीराजना स्वीक्रियते । अस्य त्वयमन्य एव कोऽपि तत्स्वीकारप्रकारः । कीदृग् भुवो वलयमित्याह । निजस्य निजैर्वा प्रतापैर्महोभिर्ज्वलत्प्रदीप्यमानम् । अन्यच्च ज्वलनयोगात् प्रज्वलत्प्रसिद्धमेव । कीदृशैस्तैरित्याह । अनल्पानि बहूनि विपुलानि वा दग्धानि यान्यरीणां पुराणि तेषामनलस्तद्वदुज्ज्वलैस्तद्रूपैरित्यर्थः । तेनोज्ज्वलैरधिकश्रीकैर्वा । एवं हि प्रतापानामधिकमौज्ज्वल्यं भवति । प्रतापानां ह्येतदेव फलं यदरिपुरप्रज्वालनम् । नीरस्य शा[४-७]न्त्युदकस्याजनं[5] प्रक्षेपो नीराजना लोके व्यारात्रिकाख्यया[6] प्रसिद्धा । केचित्तु नीराजनां नीराजकीकरणमाहुर्मुख्यतः । शान्त्युदकप्रक्षेपे तु गौणम् । अत्र हि प्राधान्येन नीराजकीकरणमेवाभीष्टमस्ति । तत्र पक्षे च जयाय विजयार्थं सृष्टयेत्यतीव सार्थकम् ।

1. B2. शोभ–
2. B2. –क्षव–.
3. B2. कृत्वा तया रराज.
4. B2. –काव्यं.
5. B1., D. आञ्जनं.
6. B2. –काक्षया.

तथैव हि जयो भवेत्। तद्रूपसिद्धिस्त्वेवं यथा – राज्ञामभावो नीराजं, तत् करोतीति धात्वर्थविवक्षायामिन्। ततो नीराजनं नीराजनेति वाक्ये ईषि--ग्रन्थ्यासीतियुः ( )। शेषं सुबोधम्। जयाय सृष्टयेति व्याख्याना--न्तरमपि यथा – जयस्याय आगमनं जयायस्तस्मिन् सति सृष्टयेति। अन्येषां राज्ञां भाविजयप्राप्तये निराजनं[1] क्रियते। अस्य तु जयप्राप्ति--समनन्तरमिति। तेभ्योऽस्य महान् विशेषः। अरिराजचक्रं निहत्य निवृत्तवतोऽस्य राजघ इत्यतीव सार्थकं विशेषणम्। राज्ञो हन्तीति कृत्वा राजघः। प्रसिद्धवह्निहसन्तिकापक्षे भूर्वसुन्धरा। सा च मृत्तिका। तथा हि मध्यदेशे विवाहचुल्ल्यादियोग्यां मृदं[2] मङ्गलभूतनामत्वाद् वसु--न्धराशब्देन व्यवहरन्ति। अमुकं दिनं वसुन्धराग्रहणयोग्यमस्तीत्यादि ॥१०॥

यथाऽयं परेषां राष्ट्रं विगृहीतवानेवमस्य परैर्विगृहीतं भविष्यती--त्याशङ्कायां तन्निषेधं पतिपुत्रादिवधदुःखप्रबाधितरिपुवधूनयनानि निरन्तरमतितप्तं जलं प्रवहन्ति स्मेति च भङ्ग्याऽऽह –

निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः।
न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः ॥११॥

अतिवृष्टयो नूनमनन्यविश्रमाः सत्यस्तस्य प्रतीपभूपालमृगीदृशामरिनृपवधूनां दृशो न तत्यजुः। यदि च तासामन्यत् खेदापनोदस्थानं भवेत्, तदा न तत्रैव ताश्चिरमवस्थितिं बध्नीयुः। ननु भूमण्डलमखण्डमस्ति। तत् किमिति क्वापि तदेकप्रदेशांशं[3] गत्वा नताः। स्वैरं विह्वल्या[4] इत्याह।

---

1. B2. नीराजना.
2. B2. मृदङ्ग.
3. B1. – प्रशांशं.
4. B2. विह्वला, B1. विह्वल्याता.

कीदृश्यस्ता[1]? अखिले महीतले तेन सुराज्ञा नलेन निवारिता निषिद्धप्रवेशाः। यतः कीदृशे? निरीतिभावं गमिते, निरीतित्वं प्रापिते। यच्चैवंभूतं भूतलं, तत्र कथं मुख्याया ईतेरतिवृष्टेरवकाशः[2]? यत्र[3] च तस्या अपि नावकाशस्तत्र कथमन्यासामनावृष्ट्यादीनां गौणीनाम्? अन्यास्ततोऽधरोत्तरक्रमेण प्रधानभूता यत्रावकाशं न लभन्ते, तत्र कथं परचक्राख्यायाः सर्वाधरवर्तिन्या ईतेस्तत्प्राप्तिः? ईतीनां मुख्यामुख्यक्रमः परिगणनक्रमादेव। यथा— अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः।

स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः॥ [9. a.] इति।

तत्त्वतस्तु परेषां निहतत्वादेव नलराष्ट्रे तच्चक्रानाक्रमणम्। अन्यासां तु तदागमप्रतिहन्त्रीणामिष्टीनां[4] यजनाद्भूतलस्पर्शस्यापि निषेधः। अन्योऽपि केनापि बलवता क्वापि निवारितसञ्चारः सन् क्वापि वनादौ वृक्षादिच्छायामाश्रित्य स्थितिं करोति। निर्गता ईतयो यतस्तन्निरीति[5], तस्य भावः। विश्रम्यते विश्रमन्ति वाऽस्मिन्निति विश्रमः। नान्यो विश्रमो[6] यासां ता अनन्यविश्रमाः॥ ११॥

सहायसामग्रीं विनाऽन्यस्यापि सामान्यस्य जीवनमात्रमूलं कृषिवाणिज्यादिकार्यं न सिध्यति। विशेषतो राज्ञः श्रीकीर्तिमूलं रणकर्मेत्यस्य तत्सम्पदमाह—

---

1. B2. कीदृशाः
2. B2. इति दृष्टेरव कीदृशाः
3. B2. तत्र.
4. B1. विधीनां
5. B1. यत्र.
6. B1. विश्रामो.

सितांशुवर्णैर्वयति स्म तद्गुणैर्महासिवेम्नः सहकृत्वरी बहुम् ।
दिशाङ्गणस्यावरणं रणाङ्गणे यशःपटं तद्भटचातुरीतुरी ॥१२॥

तस्य भटा योद्धारस्तेषां चातुरी वैदग्धी, सैव तुरी [1]कौलिकोपकरण-विशेषतया ख्याता। सा [2]बहुं बहुलं पृथुलं दिशाङ्गणस्यावरणं यश एव पटं वयति स्म, निर्ममे। कैः कृत्वेत्याह। सितांशुवर्णैश्चन्द्रोज्ज्वलै-स्तस्य नलस्य गुणैः शौर्यादिभिः। अथ च सितैः सूत्रैः। अन्यो हि पटः प्रायः सितसूत्रैरूयते। तद्गुणैरेव यशः समारब्धं तद्भट[3]चातुरीतुरी संयोगमात्रकरणे हेतुः। परकीयसूत्रनिर्मिते पटे यावन्मात्रं कुविन्दस्य कारणत्वं, तावन्मात्रं नलगुणोत्पादिते यशसि तद्भटानामित्यत्र परमार्थः। एतेनापि सङ्गराङ्गणगतानां द्विषां [4]विविधा बाधा कथिता। तुर्याः स्वप्राधान्येन कर्तृत्वं न घटतेऽपि त्वर्थतः परम्परया तद्भटानामेव। तुरी च [5]कुविन्दस्यैव भवतीति तत्संबन्धात् तेषां कुविन्दत्वमायातम्। तच्चात्र प्रशस्यं [6]वाणिकर्मप्राविण्यमेव ग्राह्यं, न तु निन्द्यजाति[7]त्वादीनि। नात्र हीनोपमा। वय वयति स्मेत्याह। रणस्याङ्गणं तद्योग्यः समो भूभागस्तत्र। कुविन्द-श्रेणिपतिः खलु [8]राज्यादियोग्यं पटमङ्गण एव वयति, न [9]त्वन्यत्र विषमभूभागे गृहमध्ये वा। तस्य हि कुविन्दपतित्वेन

---

1. B1. कालि-
2. B. om. बहुं.
3. B2. -चातुरी तु योगमात्र-
4. B2. द्विविधा.
5. B1. कुन्दस्यैव ववतीति,
6. B1. वणिक्कर्म.
7. B2. -त्वादीति.
8. B1. राजादि-
9. B2. न त्वत्र.

लक्षजनसमक्ष तत्सूत्रक्षममङ्गणं धरत एव । राज्ञां चाकपरयुद्धस्य
समभूमावेव व्यवहारात् तस्याः समविषमभावस्य संशोधनादङ्गणत्वं
युक्तम् । कीदृशी सेत्याह । सहकृत्वरी सहकर्त्री । कस्येत्याह । महासि-
-र्महाप्रमाणः कृपाणः स एव वेमा वानदण्डः कौलिकोपकरणविशेष-
-तया प्रसिद्धस्तस्य । वेमा च[1] तुरी च गौणमुख्या[2] [ख्य] भावं विनैव
सम्भूय पटं[3] वयतस्तथापि वेम्नः किमपि तत्र प्राधान्यमतस्तुर्याः
सहकारित्वम् । अत्र तु खड्गचातुर्योस्तथैव ज्ञेयम् । न ह्यनयोरन्यतरेण
विना प्रकृतस्य कर्मणः [9.6]. सिद्धिः । अयं च[4] राजा दिशां पति-
-स्ताश्च स्त्रियः । अतस्तद्वृन्दस्याच्छादकमेकमेव । बृहन्तं पटं निर्माप-
-यितुमस्य प्रयत्नो युज्यते एव । राज्ञश्च गुणानां बहुत्वाद्यशःपटस्यापि
बहुत्वम् । यावत्सूत्रसम्भवं हि कौलिकः पटं वयति । सूत्रस्वामिनः
समक्षमसमक्षं वा कौलिकः पटं वयति । तद्वदिहापि यशःपट-
-निर्माणे गुणस्वामिनो नलस्य तद्भटानां च वेदितव्यम् । असिवेम-
-चातुरीतुर्योर्जातावेकवचनम् । भटानां बहुत्वात् तयोरपि हि बहुवचनं
न्याय्यम् । एतादृशस्य यशःपटस्य युगपत्पर्यायेण वा बहुकर्तृकत्वं युक्तमेव ।

---

1. B1. चातुरी.
2. B1, B2, D. —मुख्या.
3. B2. om. पटं वय—
4. B1, B2. om. च.

Specific explanations of kanhere!



एककर्तृकत्वेन सम्यक्सिद्धेरसम्भवात् । भरेऽपि जात्यैकवचनं वा । सहुकरोतीति सहुकृत्वरी । कृञश्चेति क्वरप् ( ) सहकृत्वरी । शब्दागवर्तिन्युपमार्थे इवशब्देव शब्दे वाऽव्यये व्याख्यायमाने हुङ्कारः केवल एवावशिष्यते । स च हुङ्कारः परमं वाग्बीजमुच्चरणमात्रेणैव कविकर्मसिद्धिप्रदमिति भङ्ग्या कविरयमिह तं निहु[हि]तवान् । सहकृत्वरी वेत्युपमानार्थेऽप्युद्भाव्यमानेऽत्र न काचित्प्रकृतार्थहानिः । न च वक्तव्यमिवशब्दस्यान्तस्थो वकारो बहुशब्दस्यादिभूतस्तु पवर्गीय इति । भाषायां यमकश्लेषचित्रादिषु बाहुल्येन तयोरभेददर्शनात् । यद्यत्र कवेरयमभिप्रायो न भवेत् तदायं बहुमिति ग्राम्यं यशःपर-विशेषणं न कुर्यात् । इदं चाम्नायान्मया व्याख्यातं, न पुनर्निज-बुद्धिविभवतः । "सितांशुवर्णैस्त्वद्गुणैः" इति राज्ञः खलु सूत्रनामानोऽपि गुणा ईदृशा[1]स्सम्भवन्त्येव । अत्रानुप्रासोऽलङ्कृति माधुर्यं च गुणस्तत् एतद् द्वयमुञ्जीवयद्भिः[2] शिष्यैः श्लोकोऽयं पठनीयः ॥ ३२ ॥

स एव हि राजाऽत्र चिरं नन्दति । यश्चारैराजल्य निवेदितान् दूरादूरवर्तिनो हिताहितान् विचारयननुगृह्णाति निगृह्णाति वा, न तु राभसिकतयेति भङ्ग्याऽस्य तत्सम्पदमाह —

---

1. B1. om. स-   2. B1. उपजीवयद्भिः .

प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।
अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत॥१३॥

ततो नलाधिकाभीस्तया[1] कृत्वा विरुद्धधर्मैः चरार्धैः छलभङ्ग्या प्रदर्श्य-मानैरपि भेत्तृता परस्परबाधकता किमुज्झिताऽर्थात् तस्मिन्नेव। कैरित्याह। प्रतीपभूपैरिव। अरिराजवृन्देन हि ततो भीतेन सा त्यक्ता-ऽऽसीत्। ननु क्वैवं दृष्टमित्याह। यत्कारणात् स भूपतिरोजसा कृत्वा खल्वमित्रजिन्मित्रजिच्च विचारदृक्चारदृगप्यवर्तत सञ्जातः। एतच्च विरुद्धम्। तथाहि न मित्रं सुहृदं जयतीत्यमित्रजित्। मित्रं तदेव जयतीति मित्रजित्। विगता चारुरूपा दृग् यस्य स विचारदृक्। चारुरूपा दृग् यस्य स चारदृक्। मित्रजित्वामित्रजित्वे धर्मौ परस्परं विरुद्धौ विचारदृक् च चारदृक्त्वे च। अस्मिंश्च नृपे ते द्वेऽप्यविना-भावेन न स्थिते। तत इयं सम्भावना एतच्च शब्दमात्रेणैव। अर्थतस्त्वविरोध एव। यथा—अमित्रानरीन् जयतीत्यमित्रजित्, मित्रं सूर्यं जयतीति मित्रजित्। विचारो विवेको दृग् यस्य स विचार-दृक्। चारा गूढपुरुषा दृक् यस्य स चारदृग्। एतदेव द्वयं गौण-मुख्यभावं विना मिलितं[2] स्थितं राज्ञो युक्तमेव वा।

1. B2. नलो धिका—. 2. D. मिलितौ.

विरोधस्त्वत्र सहानवस्थानलक्षणो[1] वेदितव्यः । तद्भेदास्तु वध्यघातका[2]-दयोऽन्ये तत्प्रतिपादकशास्त्रतो ज्ञेयाः । मुख्यास्तु तत्र ते[3] त्रय एव । मैत्रता बाधकता, प्रतीपभूपपक्ष उपजापप्रयोक्तृता वा । ओजसेति करण-पदं यथार्थसम्भवमभित्रजित्वादिभिश्चतुर्भिः सह संबन्धनीयम् । न ह्योजो विनैतच्चतुष्टयमपि घटते[4] । सूर्यपक्षे पुनरोजस्तेजस्तन्मूलत्वादो-जसः । अन्यत्र त्रये तूत्साह एव ॥१३॥

एवं च व्यवहरतोऽस्य महीयसी प्रतापयशसी जगति स्थेयसी सम्पद्येतामिति दर्शयति —

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा ।
तनोति भानोः परिवेषकैतवात् तदा विधिः कुण्डलनां विधोरपि ॥१४॥

तस्य नलस्य यदोजस्तेजो यशश्च प्रसिद्धं, तयोः स्थितौ सत्तायां सत्यामिमौ द्वावपि निरर्थकाविति । विधिः स्रष्टा[5] यदा यदा स्वचित्ते[6] कुरुते, स्मृतिपथमवतारयति, तदाऽथापि भानोर्विधोश्च निरर्थकत्व-सूचिकां कुण्डलनां तनोति, परितः सृजतीति साकूतं[7] सकाकुतः सम्भावना ज्ञेया । एतत्कार्यद्वयस्य तद्द्वयेनैव क्रियमाणत्वान्नूनमयमेवं करोतीति भावः । कस्मादित्याह — परिवेषकैतवात्, परिधिमिषेण ।

1. B1. सद्भावस्थान-
2. B1. -घातका-
3. B2. त.
4. B2. घटेत.
5. D. सृष्टा.
6. B2. स्वे-
7. B2. साकूत काकुतः

निरर्थकेषु पुस्तकाक्षरेषु कुण्डलिका प्रसिद्धैव। यथासङ्ख्यमलङ्करणम्।

तदेत्यत्र वीप्सा ज्ञेया ॥१४॥

यतोऽयमेतादृशस्तत एव नृपान्तरं विहाय मार्गणगणैः समाश्रित इति भङ्ग्या दर्शयति[1]—

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः ॥१५॥

नृपः प्राकरिको (राजि..?) भूपतिरर्थिजनस्य ललाटे जाग्रतीमति विस्पष्टां[2] "अयं दरिद्रो भविता" इत्येवंरूपां[3] वैधसीं[4] विधिसंबन्धिनीं लिपिं वर्णावलीं मृषा न चक्रे, अन्यथा न कृत[10.b]वान्। अपि तु[5] प्रकृत्यैवावस्थापि-तवानिति। तात्पर्यवृत्तिप्राप्तस्यार्थस्यापेक्षया यस्यार्थस्य पूर्वकालता तमाह। किं कृत्वैवं कृतवान्? दारिद्र्यस्य दरिद्रतां प्रणीय कृत्वा। अर्थादर्थि-जनस्यैव। दारिद्र्येण हि दरिद्रो निःस्वो यस्तस्य भावस्तत्ता ताम्। अन्यत्सर्वं स्वमस्यास्ति, केवलं दारिद्र्यलक्षणमेकं[6] नास्तीति। तेनैव परमयं निःस्व इत्यर्थः। वेधसा ह्ययं दरिद्रो भवितेति साध्यनिर्देश एव कृतो, न त्वनेन वस्तुनेति साधननिर्देशः। अतोऽत्र दरिद्रत्व-सद्भावान्न[7] तन्मिथ्यात्वम्। दरिद्रत्वं त्वत्र यतस्ततो वा भवतु।

1. B1. प्रदर्शयति.
2. B2. —स्पृष्टां.
3. B2. —रूपी.
4. B2. वेधसी.
5. B2. om. hapl. अपि तु ------ कृतवान्?
6. B1. om. —मे—
7. B1. सत्वद् —

अयं त्वनिव दान्यत्वादल्पितकल्पपादपो लघूकृतस्थूललक्षत्व[1]प्रसिद्धसिद्धवृक्षः।
स खल्वेतत्संविधानकं न विधत्ते। मृषाकरणनिषेधापेक्षया दारिद्र्यदरिद्रता-
-करणस्य यदि पूर्वकालता क्रियते [क्रियेत], तदा विवक्षितोऽर्थो
विघटेत। प्राप्तिपूर्वको हि प्रतिषेधः। यथा– "अयं नृपो दारिद्र्यदरिद्रतां
प्रणीय वैधसीं लिपिं मृषा चक्रे, न वा[2]" इति केनचित् पृष्टे सति, तद्
योग्यतायां वा नेति निषेधः दारिद्र्यदरिद्रताकरणपूर्वमस्य वैधस्या
लिपेर्मृषाकरणमुचितं, तन्न कृतवानिति चार्थोऽवतिष्ठते। स चानिष्टः।
एवं हि दारिद्र्यदरिद्रताकरणमकृतमेव[3] स्यात्। यथाऽन्यत्र– अनेन पुंसाऽस्य
बहुप्रलापिनो मुखं चपेटया प्रहृत[त्य] वक्रं न कृतमित्यादौ[4]। यदि
हि मुखं चपेटया प्रहृतं भवेत्, तदा वक्रं भवेत्। न च
[5]तत् प्रहृतं, न च वक्रं भूतमिति प्रहरणनिषेधः। एवं च सति
विवक्षितार्थप्राप्त्यर्थं तात्पर्यवृत्तिप्राप्तादेवार्थात्पूर्वकालता ग्राह्या, न पुनः
पदसमुदायप्राप्तादित्यत्र सहृदया एव प्रमाणम्। अथवाऽन्यथैव
व्याख्येयम्। यथा– दारिद्र्यदरिद्रतां प्रणीयाल्पितकल्पपादपो नृपोऽर्थि-
-जनस्यैवंरूपां लिपिं मृषा न चक्र इति। तेन तस्य तथा
दारिद्र्यदरिद्रता कृता यथा कल्पतरुरपि कर्तुं[6] न क्षमः।

1. B1. लक्ष्यत्व.
2. B2. चेति.
3. B2. करणमेतमेव.
4. B1. क्षतम्–
5. B2. om. तत्.
6. B1. चाक्षमः.

एवं च दरिद्रत्वसद्भावाद् वैधसो लिपिर्मृषा न भवेत्। दारिद्र्यदरिद्रतयाऽर्थि-
-जनस्य संबन्धत्वात्। वेधस इयं वैधसी यस्य यद् वस्त्वधिकं भवति, तस्य तदेव स्वत्वेन व्यवह्रियते। यथा—कञ्चन मृषावादिनं प्रति कश्चन प्राह—"अस्य मृषावादित्वमेव स्वं मूलपूञ्जिकेति[1] वा। वैधसीलिपिश्च केना-
-प्यन्यथा कर्तुं न शक्यते।" तथा चोक्तम्—"धात्रा स्वहस्तलिखितानि ललाटपट्टे को वाऽक्षराणि परिमार्जयितुं समर्थः?" इति। देहिनां जन्मतिथेर्या षष्ठी तिथिर्भवति,[2] तद् रात्रौ तेषां लला[ट]टे किल विधिना भाविशुभाशुभसूचकान्यक्षराणि लिख्यन्ते ॥१५॥

सामान्येनार्थिजनस्य कृतार्थनं प्रतिपाद्य श्रोत्रियादिविशिष्टपात्रस्य कृतार्थनं भङ्गिविशेषेणाह—

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः।
[3]अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम् ॥१६॥

तेन राज्ञा तन्निजस्य निजं वा शिरःस्थितमयशोयुगममानि। अयशसो-
-र्युगं अयशोयुगम्। किं च [वा]स्त्वेवं[4] ज्ञातमित्याह। द्विफालबद्धाश्चिकुराः द्विखण्डसंयताः केशाः। अयं च तत्रत्य एव व्यवहारो,

1. B2. मूलं.
2. B2. भिर्भवति.
3. B2. अमान यत्तेन.
4. B1. किं त.
B2, D. किं च.

यत्र प्रायः पुसां सीमन्तः। लोकोक्तिसमाश्रयणादिदं वचनम्। तत्र
ह्येतदयशो मम मस्तके चटितमित्यादि व्यवहारोऽस्ति। तत्किमयशो-
-युगमित्याह। मेरुः कनकरत्नमयत्वेन प्रसिद्धे विभज्य वँटित्वा[1]
यदर्थिसादर्थ्यायत्तो न कृतः। उत्सर्गजलव्ययैर्दानोदकवर्तनैः कृत्वा
सिन्धुर्जलराशिर्मरुवद्[2] वा न कृतः। यावत्कनकरत्नमयो मेरुरक्षत-
-स्तिष्ठति, यावच्च सिन्धौ जलं, तावत्कीदृशं मम यज्ञादिधर्म-
-कर्मप्रवृत्तस्य दातृत्वमिति तेन निजमनसि घृणा धृतेति वाक्यार्थः।
एतेन मेरुसिन्धुवर्जमन्यत्रास्य दानानुपयुक्तयोः सुवर्णजलयोः सत्ता
निरस्ता। उत्सर्गस्त्याग इति वेदविधिमार्गप्रसिद्धः संकेतः। तत्र हि
दानानन्तरं स्वसत्तानिवृत्तये परसत्ताऽऽपादनाय चैतत् ते न ममेति
भूम्यामुदकत्यागः क्रियते। तमेव च छान्दसा होमादौ त्यागसंज्ञया
व्यवहारयन्ति। अर्थिसान्न कृत इति पदयोजनाकाले नकार-
-व्यवधानेऽपि गमकत्वात् सातिर्न[3] विहन्यते। नार्थिसात्कृत[4]
इति तु संबन्धो न तथा वाक्यार्थक्रमपुष्टिकृत्। जलेषु
व्ययीभूतेषु सिन्धोर्मरुस्थलत्वं क्रमेण भवत्येव ॥१६॥

---

1. B1. वँटयित्वा. B2. वँदित्वा.
2. B2. मरुद्वन्वा.
3. B2. शाति.
4. B2. सत्कृत.

विद्यावृद्धसंसर्गान्नैसर्गिकतेजोनिधेः सञ्जातप्रतिभोदयस्यास्य राज्यश्रीः
प्रतिदिनमधिकाधिका ववृद्ध इति दर्शयति — 1

अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च ।
दधौ पटीयान्समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥१७॥

अयं देवो राजा दिने दिने प्रतिदिनं पटीयान् पटुतरमतिः[1] सन्नुदयं दधौ, राज्याङ्गानामधिकाधिकमुपचयं प्राप । किं कुर्वन्नित्याह । मुदैव प्रीत्या केवलम् । न तु वृत्त्याद्यनुरोधेनाजस्रमनवरतमभ्यासं समीपमुपेयुषा प्राप्तवता कविना काव्यकर्त्रा बुधेन शास्त्रविदा विदुषा च समं सहैव समयं कालं नयन्नतिवाहयन् । अत एव कीदृशोऽयमित्याह । दिनेश्वरस्येव श्रीः शोभा [1.6b] यस्य स तथा । दिनेश्वरोऽपि देवः सुरप्रीत्यैव सततं समीपस्थेन कविना, शुक्रेण, बुधेन, सोमसुतेन च समयं नयन् प्रतिदिनं पटीयान् पटुतरकरनिकरः सन्नुदयमुद्गमं दधाति । सूर्यशुक्रबुधानां
योगोऽन्योऽन्यस्य सुष्ठुतरामुपकृतिकृदन्येषां च कविबुधयोगादस्य 2
देवस्य रवेश्च[2] पटीयस्त्वम् । नानृषिः कुरुते काव्यमिति प्राधान्यात् कवेः प्रथममुपादानम् ॥१७॥

---

1. Br.–सतिः 2. Br. रवेश्चर पटीस्त्वं.

इदानीं राज्यादिलाभसूचकशुभलक्षणपूर्वमपूर्वरीत्या कविवरोऽयं नृपवरस्यास्य वर्णनं करोति। तस्य च प्राप्तयौवन एवात्र पात्रमिति तत्ज्ञगज्ज्यमित्या-दितो वेदितव्यम्[1]। ऊर्ध्वरेखा तु जन्मतः शिशोरपि विशिष्टा दृष्टा। तल्लक्षणविचक्षणानतीव चमत्कारयतीति प्रथमतस्तदुपादानम्।

अधोविधानात्कमलप्रवालयोः शिरस्सु दानादखिलक्ष्माभुजाम्।
पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया ॥१८॥

वेधसाऽस्य नृपस्य पदं तत्पादाख्यमूर्ध्वरेखया कृत्वा किमित्यस्मात् कारणादङ्कितम् इति किमित्याह। इदं पुरोर्ध्वं भवत्युपरि भविष्यतीति। कस्य कस्येत्याह। कमलप्रवालयोरखिलक्ष्माभुजां च पद्मस्य पल्लवस्य च। कस्मादित्याह। अधोविधानादधःकरणात्। यो हि येन युद्धविधिना निर्जित्याधोविधीयते, तलदन्तः क्रियते[2], तस्य तदुपरि भवनमुपपन्नमेव। लक्षणया त्वधःकारो निर्भर्त्सनपूर्वः पराभवः। तत्र लौहित्यमार्दवसंस्था-नाधिक्यं प्रसिद्धो हेतुरस्त्येव। समस्तभूभुजां कस्मात् तदाह। शिरस्सु दानात्। मूर्धसु दृढविन्यासात्[3]। यच्च यस्य शिरसि विन्यस्यते तत् तदुपरि भवत्येव। इहाप्युपचाराज्जय एव विवर्तते। अत्र च शौर्यादयो गुणाः शक्तिमत्त्वातिरेकस्य प्रसिद्धो हेतुः।

1. B1. om. -दि- 2. B2. क्रियन्ते 3. B1. -स्यात्.

[1]अतोऽत्रोभयत्रापि निर्हेतुत्वदोषशङ्का न विधेया । प्रसिद्धो [2]निर्हेतुत्वं न दोष इति महाकविभिरादृतत्वात् । तथा च श्रीकालिदासः – "चन्द्रं गता पद्मगुणान्न भुङ्क्ते" इत्यत्र रात्रौ पद्मस्य सङ्कुचितत्वादिति पद्माश्रिता चान्द्रमसीमभिख्यामित्यत्र च दिवा चन्द्रस्य विच्छायत्वादिति हेतुनो- -क्तत्वात् । यदि चैतद् दूषणं भवेत् तदा निखिलकविकुलभूषणं कविवरोऽयं नैवं [3]व्यवहरेदिति । अत्र [4]लौहित्यमात्रसाम्यात् प्रवालं विद्रुममपि केचिदाचक्षते । तदपि भवति । [5]किन्तु लौहित्याकारादिकृत- -सादृश्यात् कमलस्य सजातीयस्य साहचर्याच्च पदस्य करस्येव पल्लव एव स्पर्धमानः खल्वधोविधानार्हः । लतोद्भवत्व [12-a]- -मार्दवलौहित्यधर्मयोगसाम्यात् तयोरेव सजातीयत्वम् । [6]विद्रुमस्य लतातो न जन्मास्तीति चेत्, तन्न । परिपाकदशायां [7]काठिन्यातिशययोगात् तस्य स्मृतेर्दूरतोऽपेतत्वात् । तदेव हि विद्रुमे लौहित्यं न लतासंबन्धेन [8]कोमले रेखादिगत ऊर्ध्वशब्दोऽयं व्यञ्जनत्रय- -संयोगवान् वाच्यलिङ्गः । उपरिपर्यायः पुनरूर्ध्वशब्दो व्यञ्जनसंयोगी । स चाव्ययप्रतिरूपतयैव प्रयुक्तो दृश्यते । तदिदं विचार्यम् ।

1. B1. om. अतो.
2. B1. om. -तु-
3. B1. om. -दि-.
4. B2. दोहित्य.
5. B2. om. किन्तु.
6. B2. विद्रुमस्यापि.
7. B1. काविन्य-
8. B2. कौमले.

[1]केचिदेतदर्थद्वयप्रतिपादनशक्तिकमेकमेव व्यञ्जनत्रयसंयोगवन्तमाहुः। न च
वक्तव्यं व्यञ्जनद्वयसंयोग्येवायमिति। [2]कुलावूर्ध्वौ भव इति [3]विध्यास्मदिति
व्यञ्जनत्रयसंयोगवदेव [4]पठ्यमानत्वात्। पुरा योगे भविष्यति काले
[5]वर्तमाना। पदमिति जातावेकवचनम्। तच्चात्र पादतलं तत्रैवोर्ध्व-
-रेखासम्भवात्। अङ्क्यते स्मेत्यङ्कितम् ॥१८॥

जगत्त्रयं तेन च कोशमक्षयं प्रणीतवान् शैशवशेषवानयम्।
सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ॥१९॥

अयं राजा शैशवशेषवान् पूर्णषोडशवर्ष एव पूर्णसमस्तशक्तिमत्त्वा-
-ज्जगत्त्रयं पूर्वोक्तदिग्विजयलक्षणं प्रणीतवान् विदधे। तेन च
जगत्त्रयेणाक्षयं कोशं प्रणीतवानिति स्वरूपकथनमात्रमेतत्। अथ
पश्चाद् यौवनं कर्तृ स्वल्पस्य कर्मतापन्नं वपुरालिङ्गत्। कथं यथा
कः किमित्याह। रतीशस्य सखा ऋतुर्वसन्तनामा वनं यथाऽऽलिङ्गति।
आलिङ्गनेन प्रेमातिशयो व्यज्यते। तेन च जीवदानादिमहोपकरणम्।
यौवनस्य चायमेव महानुपकारो यत्समस्तावयवानां सम्यगुपचयः,
कान्तिमत्ता, बलवत्ता, बुद्धिमत्ता, विविधभूषणाभिलाषः, शृङ्गारचेष्टाऽऽ-
-विर्भावः, सद्वधूप्राप्ति[6]र्विषयरसामृतमज्जनसुखमिति।

1. B1. केचिदर्थ—
2. B1. कुलादूर्ध्वौ
3. B1. विधा—.
4. B1. पठ्यमानत्वात्.
5. B2. वर्तमाना:
6. B2. —विषयी—.

वनस्य पुनर्वसन्तकृता[1] या उपकृतिः, सा च प्रतिवर्षं कृतिभिरकृतिभिश्च सत(ह)र्षमनुभूयत एव। तदवयवानां वर्णनात् तु तस्यैव प्रधानतया संबन्धो विवक्षितः। रतीशस्य सखेत्यनेन वसन्तस्यातीवोद्दीपनत्वं कथितम्। 'सखा ऋतुः' अत्र सन्धिर्न विवक्षितः। ईदृशं लिङ्गवैषम्यं नोपमादोषः ॥१९॥

चरणकराननानां[2] लौकिकं शास्त्रीयं चोपमानं प्रायः कमलकिसलये चन्द्रस्य तदयं कविराक्षेपभङ्गिभिस्तेभ्यः सुदूरे प्रक्षिपति।

अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे।
तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्वणशर्वरीश्वरः ॥२०॥

पद्मेषु बहुजातीयेषु विषये तस्य नल[12.b]स्याङ्घ्रिणा घृणा धृता। पल्लवे च तस्य शयः पाणिस्तच्छयस्तस्य बह्वीच्छाया तच्छाया[3] लवोऽपि लेशोऽपि क्व? अपि तु न क्वापि। किञ्च शारदः शरदिजः पार्वणशर्वरीश्वरः पूर्णिमाचन्द्रस्तस्य यत्खल्वास्यं मुखं तस्य यद् दास्यं दासकर्म तत्राप्यधिकारितां नियोगित्वं न गतः प्राप्तः। अत्र च घृणाधारणादेव पद्मेषु वर्तमानं घृणाकारणमनुमितम्। न हि कारणं विना कार्यमुत्पद्यते। पल्लवे च यदि तत्पाणेश्छायालेशोऽपि भवेत्, [स] दृश्यते (श्येत)। यच्च[4] न दृश्यते, तन्नास्त्येव।

1. B1- वसन्तश्चकृता.
2. B1., &- चरणकरणानां.
3. B2. तच्छाया तस्य लवोऽपि.
4. B1, B2. om- यच्च ---- नास्त्येव.

शर्वरी रात्रिः। सा च पापा तमोमयी मायोपजीविनामसुरराक्षसादीनां कालः। तत्पतिः क्षीणोऽपि धार्मिकस्य विजिगीषोर्[1]निकरीकर्तुं न युज्यते। विशेषतः समयविशेषमवाप्य समधिकश्रीरुपचितपूर्णवपुः। केचित्त्वन्यथैवात्र हेतूनुत्पाद-यन्ति। यथा पदश्चरणस्य मा श्रीर्यत्र तानि पद्मानि। यत्र च निज-दत्तैव श्रीर्भवति, ततः स्वयं तद्ग्रहणं घृणाकरमेव। निजदत्ता च घृणा धारणादेवानुमीयते। यदि च पदःसकाशाद् बलेन छलेन वा तैः सा गृहीता भवेत्। ततस्तेषामभिमानाद्यथाकथञ्चित् तां प्रत्यानेतुं प्रयत्नः कर्तुं प्रयुज्यते[2]। साम्यं चात्रा[3]स्मादेव हेतोर्घृणाकरमेव। पदः पादस्य लवो लेशः पल्लवः। यत्र[4] पादस्य लेशस्तत्र कथमिव तत्पाणिलक्ष्मीलेशोऽपि भवेत्। शॄधातु हिंसार्थः। शरणं शारो हिंसा। शारं ददातीति शारदः। केचित्पुनः शारं विषमाहुः। यश्चेदृशस्तस्य कथं तन्मुखदासकर्मण्यपि नियोगाधिकारः॥२०॥

राज्यप्राप्तिचिह्नं राज्ञामङ्घ्र्योरेकैकमेव लोम भवतीति भङ्ग्या तत्सद्भावमाह—

किमस्य लोम्नां कपटेन कोटिभिर्विधिर्न रेखाभिरजीगणद् गुणान्।
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः॥२१॥

---

1. B2. विजिषीगीषो.
2. B1, B2. युज्यते.
3. B2. वात्र.
4. B1, B2. यश्च.

विधिरस्य गुणान् किं नाजीगणत् ? अपि तु गणितवानेवेति काक्वार्थः। काभिरित्याह। रेखाभिर्गणनकर्मप्रसिद्धाभिः। कतिभिरित्याह। कोटिभिर्दशलक्षीभिः। केनैवं कृतवानित्याह। लोम्नां कपटेन। अस्याङ्गे यानि लोमानि तानि खलु गुणगणनरेखा एव वेधा न्यस्तवानिति भावः। कोट्यस्त्वेता अर्थादृष्टसङ्ख्या एव। तावद् य एव किल लक्षणवतामङ्गे स्युः। यथा द्वात्रिंशद् दन्ताः। एतद् न्यूनाधिक्यं त्वलक्षणवताम्। गणनारेखा ह्येकैकैव क्रियते परस्परासंकीर्णानां[1] लोम्नां चैकत्रैकत्र द्वित्रि, त्रित्रि सद्भावे तन्न [13a] घटेदित्येषामेकैकत्वमायातम्। ननु गुणदूषणयोर्व्यवहारः छायातपयोरिव लग्न एव वहतीति यावन्तो गुणास्तावन्ति दूषणान्यपि भविष्यन्ती-त्याशङ्क्याह। जगत्कृतेति तेनैव विधिना दूषणानां शून्यबिन्दवः किं न कृताः ? काक्वा अपि तु कृता एवेत्यर्थः। कस्मादित्याह। रोमकूपाणा-मोघस्तस्य मिषात्। प्रति[2]रोमकूपं दूषणानामभावात् तेषां स्थाने व्याजेन शून्यबिन्दवः एव न्यस्ता इति भावः। गणितेन गणनीयता [येनां]-शेन तस्य स्थाने शून्यबिन्दवो दीयन्ते। शून्यत्वसूचकानां खटिकादि-कृतबिन्दूनां तत्र शून्यनाम्नैव व्यवहारः। जगत्कृतेति तेनानेनेति [3]तत्पूर्ववस्तुपरामर्शि। यथा-'प्रणीय दारिद्र्यदरिद्रतां नृपः' [नै. १.१५] इत्यत्र

---

1. A. om. -नां. 2. B2. एते रोमकूपा. 3. B2. वत्पूर्व-.

नृपशब्दः पूर्ववस्तुनो नलस्यैव परामर्शकृत् । अतोऽत्र तेनेति[1]वत्पूर्ववद्
वस्तुपरामर्शि वक्तुमुचितमिति न वाच्यम् । जगत्कृतेत्यनेनैव तच्छब्दार्थ-
-स्योक्तत्वात् । एवं च वाक्यवैसंष्ठुल्य शङ्का दूरीकृतैव ।
एवं रोमकूपौघमिषादत्रापि तेषामिति तच्छब्दप्रयोग[2] एव युक्तः ।
उक्तिप्रत्युक्तिन्यायेन नामान्तरोपादानान्न दोषः । किञ्च तेषां लोममूल-
-गर्तकानां रोमकूप इत्येव संज्ञा ॥२१॥

दिग्विजयात् पूर्वमिमौ वक्ष्यमाणौ भुजवक्षसोर्धर्मौ यस्य न[3]
तामिदानीं तु दृश्येते, नल एवैवं सम्भावयन्नाह —

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता ।
उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता ॥२२॥

~~[12.a]~~ अस्य बाहुभ्यामर्गलस्येव दीर्घपीनता विशालमांसलता । नूनमरि-
-दुर्गाणां लुण्ठनावसरे गृहीता । तस्मिंश्च रिपुदुर्गलुण्ठनावसरे वक्षसश्चारुतया
गोपुरे पुरद्वारे स्फुरन्ती विचित्रविविधयुद्धवशाद् घटनोद्घटनभङ्ग्या
विचेष्टमाने ये कपाटे तयोस्तिरःप्रसारिता तिर्यक्-प्रसरणशीलता गृहीता ।
अस्य दिग्विजयसमये रिपुदुर्गलुण्ठनायां प्रवृत्तायां येन येन यद् यद्
ग्रहीतुं पारितं, तेन तेन यथाशक्ति स्वैरं तद् गृहीतम् ।

---

1. B2. om. –वत्पूर्ववद्.
2. B1. –प्रयोगो युक्तः
3. B1. नास्तां.
   B2. नास्तां.

आभ्यां त्विदमिदं गृहीतमिति भावः। यच्च यतो लुण्ठितं भवति, तत् तत्र न भवति। अर्गलकपाटानां तु त्रोटितपाटितत्वादुक्तौ धर्मौ न स्तः। वर्ण्य--मानयोस्तु तावाधुनिकौ दृश्येते तत एवायमूहः। इयमूहयुक्तिस्त्वत्र प्रसारयितुं न युक्तेत्युपेक्षिता[1]। कपाटमररम्। तद्विष्कम्भोऽर्गलामर्गलोऽपि। दीर्घं च तत्पीनं च तस्य भावस्तत्ता। पुरद्वारं तु गोपुरम्। ग्रामनगरपुराणामपि लुण्ठि--तत्वात् तान्यनादृत्य दुर्गोपादानं विशेषार्थम्। तत् खलु विषमगिरि--शिखरादिस्थितत्वाद् दुर्ग्रहमिति प्रधानं वस्तुजातं तत्रैव भवतीति तद्ग्रहणादेव महान् खलु रत्नलाभः कीर्तिश्च ॥२२॥

स्वकेलिलेशस्मितनिन्दितेन्दुनो निजांशदृक्तर्जितपद्मसम्पदः।
अतद्द्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ॥२३॥

[13-b] चरं चाचरं च चराचरम्। तस्मिंस्तन्मुखस्य प्रतिमा प्रतिकृति-र्नास्ति। ननु चरे चन्द्रोऽस्तीति। तन्नेति विशेषणद्वारेण तस्मिन्निषेधमाह। कीदृशस्य? स्वकेलेर्निजनर्मणो लेशमात्रं यत् स्मितं, तेनैव निन्दित इन्दुर्येन तत् तथा। तर्हि चरे[2] पद्ममस्तीत्यत्रापि तथैवाह। निजस्यांशोऽवयवमात्रं या दृक्, तयैव तर्जिता पद्मस्य श्रीर्येन तत् तथा। एतद्द्वयमेतया युक्त्या यद्यतीवास्य हीनमुपमानं तद्धन्यात्किमपि विचिन्त्यतामित्याशङ्क्याह। कीदृशे तत्र। एतद्द्वयीजित्वरसुन्दरान्तरे। तयोरिन्दुपद्मयो[3]र्द्वयी तद्द्वयी।

1. B1 उपलक्षिता. 2. B2 अचरे. 3. B1, B2 -रिपु-

न विधत्ते तद्दूयीजित्वरं सुन्दरान्तरमन्यत् सुन्दरं यत्र तत् तथा तस्मिन्। निन्दितेन्दुन इत्यत्र नपुंसकलक्षणोऽनुगागमः ॥२३॥

अमुमेवार्थं पाठान्तरेणाह -

सरोरुहं तस्य दृशैव तर्जितं जिताः स्मितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो गरीयसी तदाननस्योपमितौ दरिद्रता ॥२४॥

अहो चित्रं तन्मुखस्योपमानिमित्तं[1] महद् दारिद्र्यं निपतितम्। यतो [2]लोके शास्त्रे च मुखस्योपमानत्वेन यत्पूर्वैः परिकल्पितं पद्मं तत् तस्यांशभूतया दृशैव भर्त्सितम्। यश्च चन्द्रस्तत्र तेनैव तस्योपमानपदे प्रतिष्ठितस्यापि कान्तयः स्मितमात्रेणैव जिताः। अर्थात् स्मितेन तस्यैव परमाभ्यामन्यद् भव्यं सुन्दरं कुतः। कस्माद् बलवतः कारणादस्ति येनैतदुपमीयत इति भावः। लोकोक्तेरनुकृतिरियम् ॥२४॥

स्वबालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः।
अनागसे शंसति बालचापलं पुनः पुनः पुच्छविलोलनच्छलात् ॥२५॥

चमरी गिरिगवी सैव तस्योत्तमाङ्गजैः समं तुलाभिलाषिणः साम्यकामस्य स्वबालभारस्य निजकेशराशेर्बालचापलं शिशुकर्म शंसति, सश्लाघं कथयति। कस्मादित्याह। पुनः पुनः पुच्छविलोलनच्छलात्। किमर्थम्? अनागसे अनपराधाय। एतेषां दूषणं न ग्राह्यम्।

1. B2. - निमित्तिं 2. B2. लोके.

बाला मूले प्रकृतिचपला यदि न प्रतीतिस्तर्हि दृष्टिप्रसादं करोतु स्वामी भवन्ति चपला[1] नै वेति। भूयो भूयो लाङ्गूलदोलनमिषेण[2] तत्पुरतश्चापलं कुर्वतस्तान् सा निदर्शयतीति भावः। चमर्यः किल निसर्गश्लाघीयांसं निज-पुच्छकेशगुच्छमितस्ततो भूयो भूयो विक्षिपन्त्य एव क्षितिधरधरित्रीषु प्रचरन्ति। शिशवश्च बहवः क्रीडारता गतव्रीडा मृन्मयं [14.a] इयमधिष्ठाय लब्धप्रतिष्ठा इव तुरगपतिसमानमात्मानमभिजयन्तः प्रतिस्थाजमनुभूयन्ते। इयमुक्तियुक्तिस्तु पवर्गीयबकारान्तस्थवकारयोः श्लेषाद्यभेदस्याङ्गीकरणात्। शिशुपर्याये हि बालशब्दे पवर्गीयो बकारः। केशपर्याये त्वन्तस्थसंज्ञः। पदस्याभिप्रायस्त्वेवं यथा। यैः सार्धमेते बालाः स्पर्धमानाः सन्ति, तेषां जन्म तस्य निरुपमगुणगणस्य[3] सचेतनशिरोमणेः शिरोमणि-कान्तिभरैरभिषिच्य दिष्टदैवताप्रसादावाप्ताऽभिनवशोभा कुसुमसङ्कुलोत्तमाङ्गात्। अमीषां तु पशुमुख्यभूता या गिरिचरी चमरी तस्या अपानप्रति-वेशमूलात् लाङ्गूलात्। श्लोकस्यास्य प्रसन्नगम्भीरगतिसंरम्भमनुभूय प्रहृष्टमनसः सर्व एव कविकर्ममर्मविदो विस्मयरसावेशमभिनयन्तः पलायध्वं पलायध्वं रे वराका अपरे श्लोका इति साकूत-ससम्भ्रममुच्चैर्वाचमुच्चारयन्तु ॥२५॥

---

1. Br. चपलानि वेति
2. Br. –दोलनिमिषेण.
3. Br. om. निरुपमगुणगणस्य.

सम्भोगविप्रलम्भभेदेन द्विविधस्यापि यस्य शृङ्गाररसार्णवस्य वर्णनमत्र काव्ये कविरयं प्रतिज्ञातवानिदानीं तत्पात्रसंयोगयुक्तिबीजमङ्कुरयन्नाह —

महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया ।
द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां मन्मथविभ्रमोऽभवत् ॥२६॥

तस्मिन् प्राकरणिके पूर्वोक्तगुणे नृपे नले विषये जगत्त्रयीभुवां नतभ्रुवां वामलोचनानां द्विधा द्वाभ्यां प्रकाराभ्यां मन्मथविभ्रमोऽभवत् । तदेव द्वैविध्यमाह । कया कया ? तस्य नलस्य महीभृतो राज्ञः संबन्धिन्या मन्मथश्रिया च तं प्रति निजस्य चित्तस्येच्छया च । तस्य नलस्य महीभृतो राज्ञो, न तु यस्य कस्यापि सामान्यस्य च । मन्मथसंबन्धिनी श्रीस्तया तावन्मन्मथस्य विशिष्टो भ्रमोऽधिका मिथ्या मतिरभवत् । स्वमनसस्तु यस्तमन्यभिलाषस्तद्वशेन विभ्रमो विलासः । अत्र केचन स्थूलदृशस्तत्र नृपे तस्य महीभृत इत्येकार्थपदद्वयोपादानात् पौनरुक्त्यमाहुः । तन्न । नृपेत्यत्र नृपशब्दः सामान्यं नाममात्रार्थमुपादाय [1]स्वसंकेतितायां व्यक्तौ प्रवर्तते । 'महीभृत्' शब्दस्तु विशिष्टमहीभृत्त्वं तस्य नलस्य महीभृद्गुणयोगादेव मन्मथश्रीसंबन्धः । यथा– 'देवदत्तस्य ब्राह्मणस्य विद्यया सर्वत्र पूजावाप्तिः' । यदि देवदत्तस्य ब्राह्मणसंबन्धिन्या विद्यया संबन्धो न भवेत्, तदाऽयं सर्वत्र पूजां न प्राप्नुयात् ।

1. B1 & D. om.–संकेतितायां ---------- मन्मथ– .

Smt. HANSA MEHTA LIBRARY

तथाऽत्र। तस्य यदि महीभृतो राज्ञो मन्मथश्रियासंबन्धो न भवेत्, तदा तत्र नले मन्मथविभ्रमोऽपि न भवेत्। 'नृपे तत्' इत्यत्र प्राकरणिकं राजादिविशेषणार्थसंबन्धवर्जितं नलमेवाह। महीभृच्छब्दस्तु सप्ताङ्गराज्यसङ्गमित्यत एव [14.7] तद्विशेषणविशेषिते पुंसि मन्मथ-श्रीसंबन्धः नले[1] सर्गक्रमादेव मन्मथश्रीरस्तीति चेत्, तन्न। पित्रादि-संबन्धेन राज्यश्रिय एव तादृशरूपलाभस्य निदानभूतत्वात्। अन्येऽपि राज्यश्रिया समाश्रिताः कामकान्तयो दृश्यन्ते। अयं च कविरेवमन्यत्रापि प्रयुक्तवानस्ति। यथा – 'प्रणीय दारिद्र्यदरिद्रतां नृपः' (नै. १.१५) इत्यत्र नृपशब्दो[2] नल इति नाममात्रं वक्ति। 'न रोमकूपौघमिषाज्जगत्कृता' (नै. १.२१) इत्यत्र जगत्कृच्छब्दो विधिनाममात्रवचनस्व तत्रेत्यनेनैव तत्प्रतीतिर्भवेत्। किन्तु प्रकरणसमाप्तौ प्रकरणान्तरस्यारब्धत्वादनुवाद-रूपेण नामनिर्देशो युक्त एव ॥२६॥

ता एव जगत्त्रयस्य सुभ्रुवो मन्मथविभ्रमाभ्यां यथा विचेष्टितवत्य-स्तत् सर्वं तत् क्रमेणैवाह –

निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः।
अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुनापि लोचनैः ॥२७॥

---

1. B1, 8. नलः      2. B1. नृपस्तदा.

त्रिदशीभिर्देवीभिर्निर्निमेषशून्यया दृष्ट्या तं नलं चिरमादरेण दृष्ट्वा यः संचितस्तमेव परिचयगौरवमथापि ताः खलु निमेषपराङ्मुखैर्नयनपूरैः अकरयन्ति । शफरीणामिव सुरीणां नैषा दृष्टिः सृष्टिक्रमाच्चिरमस्पृष्ट--निमेषाऽपि त्वस्मादेव संविधानादिति भावः । सम्भावनाऽत्र वाक्यार्थ--पर्यालोचनयोर्लभ्यते एव ॥२७॥

इदानीं नागाङ्गनापतिव्रतविप्लवमाह –

अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥२८॥

अद[1] एतन्नोऽस्माकं दृशोर्द्वयं तं नलमाकर्णयन्तीत्येवंशीलं तदाकर्णि--त्वतो हेतोः फलाढ्यजीवितमतीवसफलं धन्यमिदं यद्बहुवर्ण्यमानान्नलस्य गुणान् पिबन्ति । अस्मद् दृशोर्जीवितस्यैतदेव[2] फलं यदेतादृश निज--विषयोपलम्भः[3] । न परं फलाढ्यजीवितमतीवसफलं[4] धन्यमिति तं नलं न[5] वीक्ष्यत इत्येवंशीलं तदवीक्षीत्यतो[6] हेतोरफलं निष्प्रयोजनं च । किमनेन मुखलग्नेन, यन्न नलमवलोकयति ? चक्षुःश्रवसामक्षि दृष्टिनां प्रियाश्चक्षुःश्रवस एवात्मनस्तद् दृशोर्द्वयं नले विषये नलमुद्दिश्य हृदा स्वां तेनेत्येवं[7] स्तुवन्ति स्म निन्दन्ति स्म ।

---

1. B2. अदं
2. B1. -स्येद महत्-
3. B2. -फलन्तः
4. B1, 8. om. अतीव ----- धन्यमिति.
5. B1, B2. om. न.
6. B2. om. -तो.
7. B2. त्यनेनत्येवं.

द्वयं युगपच्चक्रुः यदि हि तास्तादृशमद्भुतयौवनकान्तिधनविराजमानं राजानं प्रियजनसमक्षमन्यत्र वा निजनयनस्तुति[1]निन्दावचोऽमृतविषविषयतां निन्युस्तदा प्रेमरसभङ्गं नि[2]ग्रहप्रसङ्गं वा ततः स्वस्य प्रसञ्जयेयुः। चक्षुःश्रवसामिति साभिप्रायं नाम। तेषां हि रूपशब्द [15.a] लक्षण-विषयद्वयग्रहणं चक्षु[3]र्भ्यामेव न च वाच्यमन्यजातीया अपि प्रियाः सम्भवेयु[4]रिति। मुख्यतया तासामेव विवाहविधिना दत्तानां जायाभावेन वर्णनयोग्यत्वादुक्तचक्षु[5]र्गतसंविधानकेन तासामेव सम्भवाच्चेति। तासां पुनरुरगरूपेणैवै[6]तद् घटते, इतरदेवकन्याराजकन्यावत्। नागकन्यानां स्वरूपेण वर्तमानानां तद्वदेव हि पञ्चेन्द्रियव्यापारो युक्तः। आपातमात्रार्थमादाय वा कवीनां वक्रोक्तयः प्रवर्तन्ते, न तु यथावत् पर्यस[7]न्नतत्त्वार्थमादाय ॥२८॥

विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि।

अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः॥२९॥

मानुषीरस्य दर्शनविषये निमेषजनितः प्रत्यूहकणोऽपि न लब्धः। यतो निरन्तरध्यानशक्तितश्चक्षुःपुटसंघट्टनेष्वपि पश्यन्तीभिः।

---

1. B2. om. -न-
2. B2. निग्रह-
3. B2, 8. चक्षुर्भ्याम्.
4. B1. सम्भवेयुः इति रिति.
5. B2. चक्षुर्गत-
6. B1. -रूपेणैतद्.
7. B2. पर्यवसन्ने-
8. B2. -जनितः.

एतत् च सर्वेषामनुभवसिद्धमेव । पूर्वेषां तु प्रायेण दर्शनाभावादिदं न घटते भावनावासनाध्यानम् ॥२९॥

न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते[1] च का न तम् ।
तदात्मताध्यातधवा[2] रते च का चकार वा न स्वमनोभवोद्भवम्[3] ॥३०॥

रात्रौ स्वप्नरूपेण[4] प्राप्तं, स्वप्ने वा प्राप्तं, तं का नापश्यत्, एकान्तनामविपर्ययेषु तं का नोदचारयत् । सुरते च का वा तत् स्वरूपचिन्तितपतिका सती स्वस्य मनोभवोद्भवं[5] कामोत्पत्तिं नाकरोत् । अपि तु सर्वा एवैतत् त्रयं चकुरिति[6] काक्वार्थः । मिथुनकर्मणि स्थितौ पुमान्नारी वा बलीयः कारणवशेन विरक्तावपि चित्तभित्तिलिखितरुचिरजनध्यानात् तत् फलमखण्डं प्राप्नुत इव । अत्र त्रिः 'किम्'[7] शब्दप्रयोग उक्तप्रत्युक्तिभेदात् ॥३०॥

इदानीं शृङ्गाररससर्वस्वपात्रीकर्तुमिष्टस्य कथानायकयोग्यनायिका-रत्नस्य संयुक्तिसूते: प्रणवमुच्चारयन्नाह —

श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः ॥३१॥

1. B. स्खलने. 4. B1. स्वरूपेण: 7. B. किमच्छब्द.
2. B1. तदात्माध्यात- 5. B2. मनोद्भव.
3. B. -भयम्. 6. B2. चक्षुरिति.

कया स्वरूपवत्या युवत्या तेजोऽहंकाररहितया सत्या मुकुरमण्डलाभोगः खलु [1] निःश्वासपवनेन मालिन्यं नानीतः। अपि तु सर्वाभिरेव। किं कृत्वेत्याह। भैमीं विहाय, दमयन्तीं वर्जयित्वा। अत्रार्थे सा परं ताभिरात्मना सह न मेलिता। एवं [2] दर्पणधारणानन्तरं केवलं [3] भैम्येव स नैवं कृत इत्यर्थः। सा खलु नलस्य च [4] स्वस्य च कनककरकरत्नश[5]लाकयोरिव योगं योग्यमेव [6] मेने। कीदृशः स इत्याह। तं नलमालोक्य स्वमाननमीक्षितुं करे धृतः। कथमित्याह। जिया रूपसम्पदा कृत्वाऽहमस्य योग्या योगार्हाऽस्मीति। शाकूतकारणेन। यदर्थमेतया [15-6] किलैवं कृतम्। तत्र नलस्यात्मनश्च [7] जात्य-कनकस्फुटितवराटिकयोरिव दवीयस्तरमन्तरं बुद्ध्वा तथा निःश्वास-मोक्षणं कृतं, यथा तेन घनच्छाययैवाखण्डमपि मुकुरमण्डलं विच्छायं सम्पन्नमिति भावः। दर्पणस्य फलस्येव पृष्ठदेशे मुष्टि-ग्रहणयोग्यमन्यदेव लोहादिमयं वस्तु भवेदतः [8] कृत इति कर्तव्ये धृत इति दृढग्रहणार्थम्। श्वासवातसंसर्गेण [9] दर्पणः खलु

---

1. B2. निःश्वास एव नेन न·
2. B1. दर्पणं·
3. B2. भैम्येव
4. B2. om. स्वस्य.
5. B2. –शालाकयो–
6. B2. मेते·
7. B2. जात्येन कनकटंक–
8. B1. वृत;
9. B2. दर्पण·

56

मलिनो भवत्येव। कयाचित् स्वयं विलोकितः, कयाचिदाप्तवचनात्, कयाचिच्चित्रपटे, कयाचिद् बंधादिभिर्वर्ण्यमानस्तथा श्रुतो यथा साक्षाद् दृष्ट इव ज्ञातः। अतोऽत्र तमालोचयेत्युपपन्नमेव ॥३१॥

दर्पणदर्शनसमनन्तरं दमयन्त्यां यद् वृत्तं तदत्र संदर्भमात्रोपमानोप-मेयभङ्ग्याऽऽह —

यथोह्यमानः खलु भोगिभोजिना प्रसह्य वैरोचनिजस्य पत्तनम्।
विदर्भजाया मदनस्तथा मनो नलावरुद्धं वयसैव वेशितः ॥३२॥

वेशितः संचारितः। कः? मदनः कामः। किं कर्मतापन्नम्? मनश्चित्तम्। कस्याः? विदर्भजाया दमयन्त्याः। कथं वेशितः? प्रसह्य हठात्[1]। यतः कीदृशं मनः? नलावरुद्धम्। नलेन निजस्थित्या[2] परितो व्याप्तम्। अत एव बलात् तत्र प्रवेशनम्। तद् विना प्रवेशस्याप्राप्तेः[3]। अथ च तत्र नलप्रवेशानन्तरं बलान्मदनः प्रविष्ट[4] एव। केन वेशितः? वयसैवावस्थाविशेषेणैव[5]। केन वयसा? भोगिभोजिना। भोगिभिर्विषयसुख-लंपटैः पुण्यवद्भिर्भुज्यते[6], सम्यगुपयुज्यते इति भोगिभोजि, तेन यौवनेनेत्यर्थः।

---

1. B1. हठात् -
2. B2. जिन -
3. B2. -स्याप्तिः
   B. -स्याप्राप्तेः
4. B1. प्रवेष्ट -
5. B2. -विशेषणैव.
6. B1. पुन्य -

तदेव ह्येतस्मिन्नर्थे समर्थं किं क्रियमाणो मदन इत्याह। [1]उह्यमानः।
नूनमत्र मदनोऽस्तीति सप्रतिज्ञं तर्क्यमाणः। केन हेतुनेति चेद् ब्रूमः।
अर्थात् तेनैव। अत एवात्रायमेव शब्दः सफलः। येन प्रवेशितस्तेनैवोह्यमान
इत्येतस्यार्थस्य तेन प्रतीयमानत्वात्। [2]दमयन्त्या हि यौवनं प्रत्यक्ष-
-प्रमाणेनानुभूयमानमस्ति। यत्र च यौवनं, तत्रावश्यं मदनोऽनुमीयते। तयो-
-रविनाभावेन वर्तमानत्वात्। यथा पर्वते धूमदर्शनाद् वह्निरस्तित्वेनानुमीयते।
उपमानपक्षेऽपि श्लेषभङ्ग्या प्रवेशनवहनलक्षणे कर्मद्वयेऽपि खल्वियमेव
युक्तिरस्ति। खलु वाक्यालङ्कृतौ। अत्रोपमानमाह। कथं यथा वैरोचनिजस्य
बाणासुरस्य पत्तनं यथा यादृशरीत्याऽयं मदनः पूर्वं बाणनगरीं
प्रवेशितः। कथं प्रसह्य बलात्। यतः कीदृशमनलापरुद्धं वह्निवेष्टितम्।
तस्य किल ज्वलदनलमयं वलयाकारेण परितो वेष्टनमासित्।
[16-a] तत् केन वेशित इत्याह। वयसैव पक्षिणैव। न हि
पक्षिणमन्तरेण तत्र कर्मणि परः समर्थः। केन वयसा ?
भोगिभोजिना। भोगिनः सर्पान् भुङ्क्ते भक्षयति, तत् शीलो
भोगिभोजि, तेन गरुडेनेत्यर्थः। किं क्रियमाणः ? उह्यमानः।
पृष्ठमारोह्य नीयमानः। केनैवं क्रियमाणः ? अर्थात् वयसैव।

---

1. B2. om. उह्यमानः. 2. B2. om. दमयन्त्या ------ यथा पर्वते -

प्रथमपक्षे भोगिभोजिनेत्यत्र यथाकथञ्चित् कर्मोपपदत्वमवगतार्थम्। अथवा भोगिनो भुजवित्त निजाधिष्ठानेनोपभुङ्क्ते यत् तत् तथा। भोगिदेहेषु हि तत् स्वैरं[1] व्याप्नुवद् व्यवहरति। मदनोऽत्र पक्षे प्रद्युम्नः। स किल साक्षान्मदन एवावतीर्णः। अयं व्यतिकरस्तु यथावदुषाहरणोपाख्याने। "उषा नाम्नी या बाणपुत्री, तस्या हरणा-[2] -वसरे सम्यक् प्रपञ्चितोऽस्ति। अतोऽत्राभियोगपरैस्ततो ग्राह्यः[3]। [4]विरोचनो नाम यो दानवस्तत् तनयो वैरोचनिर्बलिर्नाम निखिल- -दानवकुलमुकुटमणिस्तस्माज्जातो बाणो नाम महासुरः। यत्पक्षपातितया [5]प्रसन्नो भगवान् भवानीपतिः। किलोषाहरणपर्वणि रोषात् सगर्वेण हरिणा सार्धं युद्धमकार्षीत्" इति। उह्यमान इत्यूरुवितर्के। उह्यमान इति तु बह्वायणे ॥३२॥

यदा मदनेन तस्या मनोऽधिष्ठितं, तदा सा किं चकारेत्याह—

नृपेऽनुरूपे निजरूपसम्पदां दिदेश तस्मिन् बहुशः श्रुतिं गते।
विशिष्य सा भीमनरेन्द्रनन्दिनी मनोभवाज्ञैकवशंवदं मनः[6] ॥३३॥

---

1. B1. स्मारं, D. स्वरं.
2. B2. हरणोवसरे.
3. B2. अत्राभियोग—
4. B1. विरोचना नामाधो.
   B2, D. विरोचनो नामाधो.
5. B2. प्रमत्तो.
6. B2. मनः

सा पूर्वश्लोककथितस्वरूपा भैमी मनोभवाज्ञायामेकमद्वितीयमपूर्वं निदेशवर्ति सन्मनश्चित्तं विशिष्याधिकतया तस्मिन्नृपे नले दिदेश ददौ। कीदृशे? बहुभ्यः सकाशान्निजकान्तकान्तिश्रियामनुरूपे[1] योग्ये श्रुते सति। नलरूपसम्पच्च दमयन्तीरूपसम्पच्च यदि परस्परं मिलितस्तदाऽतीव श्लाघ्योऽयमनयोः सिन्धुसरस्वत्योरिव सङ्गम इति नानाजनाननेभ्यः[2] किल यदाऽसौ श्रुतवती, तदाऽधिकतरं कृत्वा मन्मथाधीनं मनस्तत्र दत्तवतीति भावः ॥३३॥

सा तादृग् मनो नलैकविषयं विधाय कथं कथं विचेष्टितवती तदाह-

उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु बन्दिनाम्।
पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ॥३४॥

सा प्रतिदिनं रक्ता जाताऽत्यासक्ता बभूवेत्यर्थः। केषु? बन्दिनामवसरेषु नानानृपगुणबिरुदकीर्तनक्षणेषु। किं कृत्वा? पितु-स्तातस्योपासनामेत्य सेवामागत्य। कुमाराः कुमार्यश्च प्रतिदिनमेक-कृत्वा[3] द्विकृत्वा वा तातस्य सेवामायान्तीति स्थितिः। अतः सा प्रतिवासरं स्तुतिपाठकाना-[16·b]-मेवावसरेषु विशेषं कृत्वाऽस्य सेवा-समायाति स्म। एतत्प्रसङ्गेनापि यद्यहं नलं शृणुयां, तत्तो भव्यं भवतीति।

1. B2. -कान्तिकान्ति-
2. B2. om. नाना-
3. B1. अेक कृत्वो द्वि कृत्वो. B2. एकत्कत्वा द्वित्कत्वा.
4. ~~B1 B2 D.~~ सेवाम्

अतस्तस्यास्तत्र रागो महती प्रीतिः। बन्दिनामवसरास्तस्यै किलातीव रुचिपात्रीभूता इति भावः। तदनु सा तत्र किमकरोदित्याह। तेषु बन्दिष्वलं बाहुल्यात् प्रतिभूपतीन् भीमस्य प्रतिक्षितिपतीन् पठत्सु तारस्वरेण हस्तोत्थापनपूर्वमुच्चैरुच्चारयत्सु[1] नलं कीर्तनपात्रीकृतमाकर्ण्-
-यन्ती सती[2] कण्टकिलाङ्गयष्टिर्बभूवे इति श्रवणानुरागः सूचितः। अस्य स्वरूपं तु तत्प्रतिपादकशास्त्राद् ग्राह्यम् ॥३४॥

तमेव श्रवणानुरागं पल्लवयन्नाह—

कथानुषङ्गेषु मिथः सखीमुखात् तृणेऽपि तन्व्या नलनामनि श्रुते।
द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया ॥३५॥

अनया भैम्या रहसि कथाया अनुषङ्गेषु प्रस्तावपर्णनीयेषु नद्यादिषु[3] विषये सखीमुखात् तृणनाम्न्यपि नले श्रुते सति द्रुतं तच्छ्रवणं समनन्तरमेवान्यद्[4] वर्ण्यमानं[5] हंसकोकबकमकरमत्स्यकमलमृणालादि[6] विधूयेतस्ततः क्षिप्त्वा प्रीत्या तच्छ्रवणैकाग्रश्रवणया किलाभूयत भूतमिति भावे वचनमिदम्। अन्याऽपि कन्या निशि दिवा वा रहसि स्वैरं स्वानुसारेण सरागाः परस्परं कथानिकाः कथयन्ति।

---

1. B1. उच्चचारयत्.
2. B2. सिती.
3. B2. नाद्यादिषु.
4. B2. समनन्तरमेवा- repeated.
5. B1. वर्णमानं.
6. B1. -कोकचक्र-

इयं च राजकुमारी नलस्तस्याः सख्यश्चन्द्रमुख्यः सकलकलाकुशलाः
शलाकाञ्जनरञ्जनमञ्जुनयना ध्यानकीहरणादिवस्तुश्रोतृश्रवणहारितत् तद्-
-विविधप्रबन्धपथाश्रिताभिर्गाथाभिर्गायन्त्य सान्द्रजलतृणवणवर्णनाव्यायातं
[1]नलनामधाम [2]नलापरपर्यायं तृणं वर्णयन्ति स्म। तत्र च तथाविधेऽपि
नले श्रुते निजमनीषितप्रियनामगौरवादितरन्[3]महत्तरमवगणय्य तच्छ्रवण-
-प्रवणं श्रवणं [4]हर्षादसौ [5]व्यधादिति वाक्यार्थः ॥३५॥ किञ्च—

स्मरात्[6]परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा।
जनेन [7]यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥३६॥

[8]नलप्रसङ्गार्थतया कश्चन कुब्जवामनादिजनप्रयुक्तो यूनः
प्रस्तुतान् कांश्चन वर्णयन् स्मरेणोपमितवान् तत्र यद् वृत्तं
तदाह। भो अमुक! अहं परासोर्मृतादनिमेषलोचनादुन्मीलिताक्षादिति
परस्परहेतुभूतविशेषणद्वयविशिष्टात्[9] स्मराद् बिभेमि। यतोऽयं परासुरत
एवा-[17·५]-निमेषलोचनः स एव चिरमीदृशो भवति। यश्चानिमेषलोचनः
सोऽवश्यं [10]परासुः। ततः किं क्रियतामित्याह।

---

1. B2. नलानामधम.
2. B1-B2-8. नापर.
   नलापर-corrected.
3. B2. महत्तरमप्यव-
4. B2. हर्षादिसौ.
5. B2. व्यवधादिति.
6. B2. परासौ.
7. B2. युवः
8. B2. नलप्रसङ्गार्थं तयाः
9. B2. विशिष्टा.
10. B2. पराशु.

तस्मात् [1] स्मरात् भिन्नमन्यमुदाहर [2] निदर्शयेत्यनेन प्रकारेण तस्य स्मरस्य [3] पदे स्थाने सा भैमी निदर्शनं दृष्टान्तं नैषधमभिषेचयति स्म। स्मरेणोपमितस्य यूनो नलमेवोपमानीकारयामासेत्यर्थः। कैनैवं कारयामासेत्याह। यूनः स्तुवता जनेन प्रयोज्येन कर्त्रा स्मरादितरो नल एव खलु तत्कर्मयोग्यः। [4] तद्दर्यं कान्त्या नलसदृशोऽस्तीति सा तं वारयामासेति भावः ॥३६॥

नलस्य पृष्टा निषधागता गुणान् मिषेण दूतद्विजबन्दिचारणाः।
निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया ॥३७॥

निषधनाम्नो देशादागताः स्वदेशीयाः परदेशीया वा दूता द्विजा बन्दिनश्चारणाश्च यथाप्रसङ्गं [5] मिषेण नलस्य गुणाः [6] पृष्टाः। अर्थादनया कीदृशोऽस्ति निषधाधिपो राजा तत्कथ्यतामित्यादिव्याजेन तद्गुणश्रवणार्थं ते प्रत्येकं पृच्छ्यन्ते स्म। अथ पश्चात् तेभ्य-स्तत्कीर्तेः कथां प्रबन्धकल्पनां निपीय कथमस्य प्राप्तिर्भविष्यतीति चिन्तावशादनया चिरं कालं विमनायमानया विमनस्कीभवन्त्या तस्थे स्थितमिति भावः ॥३७॥

1. B1, B2. सुरात्
2. B1. निदर्शनैयेत्यनेन
3. B1. स्मरस्यास्पदे.
4. B2. तद्वर्यं.
5. B2. निमिषेण.
6. B2. गुणा न पृष्टा.

प्रियं प्रियां च [1] त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्ति कावपि।
इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च [2] सख्यमीक्षते ॥३८॥

हे अमुक! ममाधिलीलागृहभित्ति केलिभवनभित्तौ कावप्यनिर्दिष्ट-नामानौ त्रिजगज्जयिश्रियौ त्रिभुवनपरिभावुकरूपसम्पदौ प्रियं पतिं प्रियां च पत्नीं च परस्पराभिमुखस्थितौ [3] मध्यस्थितमणिशारिफलकौ [4] शारिक- [5] -पाशकक्रीडानिरतौ निपुणं लिख इत्येवं कारुतरेण चित्रकरेण प्रयोज्येन कर्त्रा लेखितं निर्मापितं नलस्य च स्वस्य च सख्यं सौहृदं सा भैमी किं किलेक्षते स्म। तं पुमांसं नलं तां स्त्रियं चात्मानं परिकल्प्य वह्निसाक्षिकं देवानां दत्तं यत्पतिपत्नीसख्यसौख्यं तदेवं सा निर्दिशति स्मेत्यर्थः। कारुः शिल्पी, प्रकृष्टः कारुः कारुतरः। स चार्थाच्चित्रकर एव। सर्वेषां हि शिल्पिनां निजनिजकर्मणि निपुणानां स एवोपमानी-क्रियते। यतस्तस्य सूक्ष्मकूर्चिकाग्रनिवर्तनीयमतीवसूक्ष्मतरमनेकविधं विविधं कर्मलेखनमन्यदपि चित्रैकाग्र्यनिर्मेयं [6] किं पुनश्चित्रम् ॥३८॥

---

1. B2. चरित्रिजग-
2. B2. om. hapl. च सख्य
3. B1. -मुखस्थौ.
4. B2. -सारि-
5. B2. शारिपाशक.
   B1. सारिकपाशक.
6. B2. om. किं.

मनोरथेन स्वपतीकृतं नलं [1]निशि क्व सा स्म स्वपती न पश्यति ।
अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् ॥३९॥

सा भैमी स्वपती निद्रान्ती सती क्व निशि नलं न पश्यति स्म । अपि तु सर्वासु [17-6] रात्रिष्वपश्यत् । कीदृशम्? मनोरथेन चित्तवृत्त्या कृत्वाऽस्वपतिं [2]सन्तं स्वपतीकृतं निजभर्तृभावं प्रापितम् । युक्तोऽयमर्थः । सुप्तिर्निद्रा खल्वदृष्टमप्यर्थं जनस्य दर्शनातिथिं [3]दर्शनदर्शनमान्यं प्राघूर्णकं करोति । अतीव रुचिरं वस्तु दर्शयतीति भावः । [4]अन्यो ह्यतिथिर्भोजनदानादिना सत्क्रियते । अयं तु दर्शनेनैवातो दर्शनातिथिः । कस्मादियमेवं करोतीत्याह । अदृष्टस्य दैवस्य वैभवात् प्रभावाद् यदियमेवं [5]कारयति, तत्र तत्त्वतो [6]दैवमहिमैव हेतुः ॥३९॥

एतमेवार्थं भङ्ग्यन्तरेणाह —

निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् ।
अदर्शि सङ्गोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः ॥४०॥

स महीपतिर्निद्रयाऽक्षियुगाच्च हृदोऽपि सकाशात् सङ्गोप्य सम्यग् गुप्तः कृत्वा दर्शितः । [7]अर्थात् तस्याः तयोरपि द्रष्टुं न दत्त इत्यर्थः ।

---

1. B2. om. नि-
2. B2. मन्तं.
3. B2. दर्शन मान्यं.
4. B2. अन्योन्यतिथिभोजनदावादिना.
5. B1. कायति.
6. B2. दैवमेव.
7. B1. अस्या.

कीदृश इत्याह । कदापि कस्मिन्नपि काले खल्ववीक्षितोऽदृष्टोऽदृष्टपूर्व इत्यर्थः । कीदृशादक्षियुगादित्याह । [1] निमीलितान्निमिषितादर्थान्निद्रयैव । इदः कीदृशादित्याह । कदापि कस्मिन्नपि बाह्येन्द्रियमौनमुद्रितात् । बाह्येन्द्रियाणि चक्षुरादीनि, तेषां मौनं [2] निजचेष्टानिरोधस्तेन मुद्रितात् दत्तमुद्रान्निरुद्धादित्यर्थः । चक्षुरादीनीन्द्रियाणि निजविषयेषु प्रवर्तमानान्यधिष्ठाय बहिरन्तश्च मनः प्रवर्तते । तैश्चेन्मौनं निजचेष्टानिवर्तनं कृतं, तर्हि मनो मुद्रितमेव । वाहनव्यापारनिवृत्तौ हि [3] तदधिष्ठितनिवृत्तिर्भवत्येव । देहः खलु गृहं, तदन्तवर्ति-मनश्चक्षुरादीनि [4] द्वाराणि । अतो द्वाराण्युद्घाट्य तदधिष्ठितानीन्द्रियाणि यदि निजविषयेषु धावन्ति, ततो गृहान्निर्गत्य तदधिष्ठितं मनोऽनुधावति । एतच्च तत्संविधानकस्य प्रत्यक्षतो दृश्यमानत्वात्स्थूलदृष्ट्यैवोक्तम् । सूक्ष्मदृष्ट्या यदि चिन्त्यते, तदा स्वप्नदर्शितस्यापि वस्तुनो [5] दर्शनं बाह्यवन्मनोऽधिष्ठि-तेन्द्रियद्वारकमेव । तत्रापि हि [6] प्रियजनदर्शनादिविविधभावानुभवस्तत्पूर्वक एवेति । विशेषश्चात्र सहृदयवशः । कदाप्यवीक्षित इत्यत्रासमर्थः समासस्तद्विधिश्च [7] नलोपो यथैवासूर्यंपश्या राजदारास्तथैव कदापि कस्मिन्नपि काले ह्यवीक्षितः खल्वदृष्टस्तस्या इति संबन्धविवक्षा । यथा किमप्यद्भुतं श्रुत्वा कश्चिदाह –

1- B2. om. निमीलितान् ------ बाह्येन्द्रियमौन.
2. B1. निजचेष्टानुरोधः
3. B2. om. -धि-
4. B1. चक्षुरादीनीन्द्रियाणि.
5. B1. निदर्शनं.
6. B1. प्रयोजन-
7. B1. तद्विविधश्च.

अयमर्थ इतःपूर्वं सर्वेषामश्रुतः। यथा राज्ञां पूजितोऽयं देवदत्त इत्यादि च। कदापीत्यत्र तु बृहत्काकुगर्भ्यं[1] वस्तु। यः कोऽपि कालो भवतु, तत्र न वीक्षितोऽस्तीति तत्त्वार्थः। पर्यवतिष्ठत इत्यत्र काक्वर्थं निषेधरूपं विहाय विधिरूपस्यार्थ-[१४-१७]-स्य भ्रान्तिर्न कार्या। कस्मिन्नपि काले खल्ववीक्षितो न सर्वस्मिन्निति। अवीक्षितः सन् कदापि दर्शित इति तु[2] गण्डशैलपण्डितव्याख्या। मनोऽङ्कुरागुरुसूक्ष्ममतीनां तु पूर्वैव। यदि चादृष्टो दर्शित इत्ययमेवार्थः कवेरभिप्रेतो[3] भवेत्, तदा कदापीति न वदेत्। तेन विनाऽपि साध्यसिद्धिः[4]। न च तथा सति निद्रायाः प्रभावातिशयो दर्शितो भवेत्। अन्या अपि कस्या अप्यतीवापूर्वं रहस्यं मुद्रितनयनाद् गृहमध्यन्यसनपूर्वदत्तकपाटमुद्रिताच्च कुतः कुतश्चित्[5] प्रवेशिनः[6] सङ्गोप्य दर्शयति। मुद्रां चिह्नविशेषं करोतीति धात्वर्थविवक्षायामिन्। मुद्र्यते स्मेति मुद्रितम् ॥७०॥

प्रथमश्रवणानुरागवनशाखिनः कुसुमोद्गमदशां दर्शयन्नाह—

अहो! अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम्।
तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभराम्बभूविरे ॥७१॥

---

1. B1. –गर्तं. 4. B2. –सिद्धः
2. B1. om. तु. 5. B1. कश्चित्-
3. B1. कवेरवि– 6. B1. प्रवेशितः

अहो विस्मयः । तां स्मरेणार्दितां प्रत्यहोभिर्दिनैर्महिमा द्राघिमा[1] प्राप्तः । कदा ? हिमस्य तुषारस्यागमे प्राप्तावपि । तदा दक्षिणायने भगवतः सूर्यस्योदयस्थानादस्ताचलस्य[2] निकटत्वादमन्दगतित्वाच्च दिनानां लघिमा युक्तः । किञ्च तपनाम्न ऋतोः पूर्तौ प्रौढत्वेऽपि विभावरीभिर्निशाभिर्मेदसां शरीरस्य चतुर्थधातूनां भरास्त्यागधनसञ्चया[3] बिभरांबभूविरे पोषिता धृता वा । अत्र चोत्तरायणे भानोरुदयभूमेरस्ताचलस्य दूरदेशस्थितत्वेन मन्दगतित्वाच्च वासराणां गरिमा खलूपपन्नो, निशानां तु ह्रसिमैव । तत्त्वतस्त्वत्र तस्याः स्मरार्दितत्वं हेतुरस्त्येव । ईदृशोऽयं दग्धमन्मथप्रभावो यद्वशाद्विरहिषु[4] सर्वं प्रतीपरूपतया परिणमति । मेदसां भरा इत्यनेन स्थौल्यं लक्ष्यते, तेन च गौरवम् । दीर्घस्य च गुरुसंज्ञाऽस्त्येवेति गौरवाद् दैर्घ्यमायातम् ॥४१॥

एवं दमयन्त्याः प्रथमविरहदशां प्रतिपाद्य, नलस्यापि तां प्रतिपादयितुकामस्तामपि[5] प्रस्तावयन्नाह –

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्यलोपिनं[6] नलोऽपि लोकादशृणोद् गुणोत्करम् ॥४२॥

1. D. द्राघिमा. 4. B2. विरहेषु.
2. B2. अस्तांचलस्य. 5. B1; B2, D. तमपि.
3. B1. भरास्त्याव -- सञ्चया. 6. D. लोपनं.

कदाचिन्नलोऽपि लोकाद् दूतादिकान्निबद्धादनिबद्धाद् वा बालगोपालादेस्तस्या गुणानामुत्करं राशिमशृणोत्। अयं हि प्राधान्यादनवरुद्धः। अतो यतस्ततोऽपि[1] शृण्वन्तमेतं[2] को निवारयितुं समर्थः। स्त्रियस्तु सामान्या अपि प्रायेणावरोधार्हाः। तादृशी नृपकुमारी पुनर्दमयन्ती विशेषेणेति[3] यतस्ततस्तस्या नलगुणश्रवणप्रस्ता-
-सम्भव एवेति। पूर्वं तद्विषये दूतादिनिर्देशः कृतः। किं कुर्वन्तमित्याह। स्वकान्तिकीर्तिव्रज एव मौक्तिकस्रग् मुक्ताव-[१४०७]-ली तस्या अन्तर्मध्ये धटना सन्मानयोग्यता, स एव गुणो धर्मस्तस्य श्रियं सुष्ठुतां जयन्तम्। मौक्तिकस्रजो हि कान्तिव्रज[4]रूपताऽस्ति। व्रजे च व्यक्तयो बहवो भवन्तीति तासां गुम्फनयोग्यान्यपि सूत्राण्यपि बहूनि युज्यन्त इति गुणोत्करमित्युक्तम्। गुणो हि सूत्रम्। तस्य प्रोयितुमिष्टमौक्तिकादिच्छिन्नसन्मानलक्षणो यो गुण-
-स्तानवादिधर्मस्तस्य श्रीः सूक्ष्मागत्यादिचारुता युज्यते। तद्वैपरीत्यं हि दोषः। तादृश्याः कान्तिमत्या नृपकुमार्या दमयन्त्याः स खलु गुणगणस्त्रिभुवनयुवसु ध्रुवमेतादृशस्य कान्तिमतो नलस्यैव राज्ञः स्वतीव[5]तरां सदृश इति। स नानाविध[6]बालगोपालविबुधकविबन्दिनटभटविटकुट्टिकारादिजनैर्निजनिजोचित-
-विविधभङ्गिभिर्वर्ण्यमानमितस्ततः प्रतिदिनं श्रवणातिथीचकारेति वाक्यार्थः।

---

1. B1. om. अपि.
2. B1. एनं.
3. B2. विशेषेणेति.
4. B2. -स्रज-
5. B1. सुस्वतीव.
6. B2. विविधबुधकवि.

[1]तत्र किञ्चिद् यथा तादृग्गुणा दमयन्ती तातवेश्मनि यौवनं गमयन्तीव शोभते । चिरमुरसि स्थिता नलं रमयन्ती वा । अथ कश्चिल्लोकोक्तिसंकीर्णमिव किंचिदाह स्म- "साधु साधु स्वर्णमुष्टिना [2]कट्टारिकापिट्टारिकान्तःकायकाया श्लाघमाना वा वरं वीरपुरुषेण करिनिबद्धा श्रियमापाद्यमाना वा" । अन्य आह- "शकुन्तला दुष्यन्तेनेव यदि किलेयं दमयन्ती कथमपि नलेन मिलेत् तदा रोहिणीचन्द्रमसोर्योगः सपत्नमवतीर्णं वीक्ष्य तत्प्रतीकाशाय [3]तत्पतीवासमाश्रयत् । पार्वतीवृषपती वा । इतरोऽपि । "सा किल चपला श्रीरहर्निशमब्जयोः सेवायै याला [4]यालमभ्यस्यतु । जन्मसहस्रेणापि दमयन्त्या नलस्य च वदनश्रियः खलु परिमलौज्ज्वल्ययोरंश-लेशमपि लभेत" । अपरोऽपि । "सा खलु दमयन्ती सौन्दर्यकल्पलताऽभिनवमञ्जरी । यद्येषा किल निजगुणसौरभ्येण नलमलियुवानमनुरञ्जयेत् तदा स्वजनस्य [5]मनसः समयोगदर्शनप्रीतिः परमात्मानममृतरसपानसौख्यमनुभावयेत्" इत्यादि । कीदृशं गुणोत्करमित्याह । युवधैर्यलोपिनम् । यूनां धैर्यं वयःकृतं भयादिष्वपि मनसः स्थैर्यं तल्लुम्पति खटिकादिलिखिताक्षरवद् ध्वंसयतीत्येवंशीलास्तम् । एतेन तस्य धैर्यस्थैर्यशैथिल्यं कथितम् ।

---

1. B2. om. तत्र किञ्चिद् ---- आह स्म.
2. B2. कट्टारिकान्तं कायिकया.
3. B1. तिलत्पती -
   B2. रति तत्पती -
4. B1. यामभ्यस्यतु.
   B2. पालमभ्यस्यतु.
5. B2. om. hapl. मनसः ---- स्थैर्यं.

यौवने कौलिकारयो[1]ऽपि प्रकृत्यैव दूरपरा[2]: शृगालाः सिंहकिशोरंमन्या भवन्ति। किं पुनरन्ये धन्या ये सहजधैर्यवीर्याः क्षत्रकुलमुकुटमणयः शार्दूलशावलीला जल्पादयः ॥४२॥

भङ्ग्याऽस्य / तमेव धैर्यभङ्गफलोपलम्भमाह —

तमेव लब्ध्वाऽवसरं ततः स्मरः शरीरशोभाजयजातमत्सरः।
अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नै[पकन्य]बधम् ॥४३॥

पूर्वमेव तत्कुलेन निजशरीरशोभाया जयेन बलात् ग्रहणेन जातमत्सरः समुत्पन्नकोपव्यसनः स्मरः। तमेव पूर्वोक्तमवसरं प्रस्तावं लब्ध्वा तया रमयन्त्या निजया स्वस्वामिकया मूर्तया देहवत्या स्वफलममोघया सफलया शक्त्या सामर्थ्यापरपर्यायये[3]व कृत्वा तं वशीकर्तुमभिललाष। अन्योऽपि कोऽपि केनापि बलेन गृहीत--निजसर्वस्वाच्चिरसंचितद्वेषः कुतोऽपि हेतोः प्रस्तावं प्राप्य निजया [4]ननु कयापि परसंबंधिन्या शक्त्या कासूनामप्रहरणविशेषापरपर्यायया कृत्वा तं जेतुमिच्छति। स्मरस्य सर्वस्वं शरीरशोभैव। तां विना तस्याकिंचित्करत्वात्। नन्वे किल स्मरस्यैव रूपश्रीः ॥४३॥

---

1. B1. कालिक —
2. B2. दूरप.
   B. दूरप.
3. B. -एव.
4. B1. न नु.

दूरस्थितत्वात् तथा सर्वथैव मनीषितकार्यसिद्धिमधिगन्तुमशक्तेन स्मरेण निजमेव सर्गक्रमायातमायुधं नैषधं वशीकर्तुमादृतमिति दर्शयति –

अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजालयः।[1]
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥४४॥

तेन क्षमाभुजा भैम्याधारो गुणः कान्तिमत्त्वादिलक्षणः श्रवणयोरतिथिरादरे त्वा
श्रवणसत्करणीयः प्राघुणकः कृतः। तस्योच्छ्रितं यद्धैर्यं तन्नाशाय योजित[2]निशितशरेण स्मरेण च निजधनुरधिष्ठितो गुणः शिञ्जिनीनामा श्रवणस्य दक्षिणकर्णस्यातिथिरादरेण तत्समीपोपनयनयोग्यः कृतः। अत्र पक्षे श्रवणसमीपप्राप्तिरेव, वाऽतिथित्वम्। सामान्येन गृहागत एवातिथिरभिधीयते। तत्पक्षे श्रवणमाकर्णनं वा। आदरेण कृत इत्यर्थः। एवं च श्लेषमात्रं, न तु विशेषः। पूर्वस्मिन्पक्षेऽप्यस्यैवार्थस्य परिणामित्वात्। गुणशब्दस्यो[3]भयार्थत्वात्। तमेवैकं रूपमात्रेणावर्त्येति रचितवान्। साकूतकाकुविशेषात् पूर्वापरीभाव-स्थितयोर्वाक्यार्थयोरेककालत्वम्। तत् कार्यद्वयं सममेव जातम्। वक्तुं त्वेवमेव शक्यते। यथा – रामरावणादियुद्धादिविधिरक्रमं समसमयसिद्धोऽपि ? क्रमेणैव वाग्व्यवहारमध्येऽवतारयितुं शक्यते ॥४४॥

---

1. B1. –श्रयः
2. B2. –निश्चत– –भयार्थत्वात्। ----- वाक्यार्थयो–
3. B2. om. hapl.

इदानीं तद्धैर्यमद्भुतरीत्येतद् व्यतिकरप्रबलसमीरसमूलोन्मूलन कर्मण: सन्निधावपि बहुमूलत्वाद् दोलनाभावमाह –

अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखै: सनाथयन् ।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥४५॥

खलु नूनमत्र सन्देहो नास्ति । अमुष्य धीरस्य स्थिरतरचित्तस्य जयाय साहसिकत्वात् तत्र काले स्मरो ज्यां विशिखै: सनाथयन् सस्वामिकां कुर्वन्, प्रसिद्धेन त्रिलोकीविजयेनार्जितानि बहुकालसंचितान्यपि यशांसि संशये अस्तिनास्तिरूपे निमज्जयामास दोलयामास प्रयत्नातिशयेनाप्युद्धरणाद् दूरस्थितानि चकारेति [१.८] यावत् । य: खलु सहजधीरगुणाधिष्ठितो भवति, स पराभवितुं न पार्यते[1] । तथापि यथाशक्ति साहसं कृत्वा खलूद्यम: क्रियते । साहसमतीव[2] निर्विचारा प्रवृत्तिरस्यास्तीति साहसी, तेन [3]नानाविधविधया त्रिलोकी जिता परमेवंविधं धैर्यं तत्र क्वापि नाभूदिति साहसिकतया तत्र कर्मणि प्रवृत्त स्मर इति भाव: । कर्मसिद्धेरस्तिनास्ति-भावमङ्गीकृत्यैव हि साहसं क्रियते । एतत्पूर्वमनेन क्वापि नैवाहवे हारितम् । इदानीं चेदनेन समं समरमुपक्रममाणो हारयति, तदा[4] पूर्वकृतमशेषं वृथा भवेत् ।

1. B1 पार्वते.
B2 पर्यते.
2. B1, B2 अतीवा.
3. B1 नानाविधाया.
4. B1 तदा कृतं.

धीरस्येति पाठाद् वीरस्येति पाठोऽधिकं सजीवः। न हि धैर्यं विना वीरत्वम्। ये किल मुख्यतो धीरास्त एव वीरकर्मप्रवर्तनाद् वीरशब्दवाच्या भवन्ति। वीरा एव च प्रायेण साहसिकतया जीवसन्देहतुलामधिरुह्य पातालप्रवेशादिना नागकन्याप्राप्त्यादिसिद्धिं कामयमाना विक्रमादित्यादयः खलु बृहत्कथादौ प्राधान्येन वर्ण्यमाना दृश्यन्ते। अन्योऽपि प्रशंसार्थं तद्गुणयोगाद् वीरोऽयमस्ती-त्युपचारवृत्तिविषयतामानीयमानो[1] दृश्यते। सिंहो माणवक इत्यादिवत्। धीरस्येति तु विशेषणपदस्य साकूतकाकुपदविशेषाद् भवति साभिप्रायता। परमार्थो विचार्यमाणः पूर्वस्मादतीवदूरं प्रयाति। अत्र च ध्वनिमुख्य[2]विविध-शास्त्रमहार्णवतरणानुषङ्ग[3]परिशीलिता मज्जनोन्मज्जन[4]कलायाः परिणतबुद्धेर्बलेन सुगृहीता तत्सुतत्त्वानुविद्धपरमार्थसारमणीनामन्तर्वाणिशिरोमणीनामधिकारो न पुनः शैशवतिमिरान्धबुद्धिघटनाविक्रान्तः सुदृढमधिष्ठाय प्राप्तलघुशास्त्रैकदेशनभः सरित्पूरोऽनतिदूरपाराणामात्मसंसदुद्वारणां विशिखपरमात्मानं विना धनुर्लता-तनुमध्यवर्तिगुणमनोवृत्तेर्नैरर्थक्यमेवेति विशिखेन मौर्व्याः सनाथत्वम्। परम्परया तु धनुषः। धनुर्वियुक्तायाः ज्याया बाणेन सस्वामिभावो न सम्भवतीत्यर्थबलेन तस्याप्तत्वात् तदुपादानं किमिति न कृतमिति न वाच्यम्।

---

1. B2. विषय एताम्.
2. B1. -मुख-
3. B2. परिशीलितनो.
4. B2. मज्जनकलायाः

विशिखैरिति बहुवचनमेकेन प्रकृतकर्मणोऽसिद्धेर्बहूनां व्यापारितत्वात् ।
संधानावसर एव वा पूर्वपूर्वाकृचौ [1] परापरयोजनात् ॥७५॥

अत्र व्यतिकरे बलानुबलनुन्नपूर्वतनुरतनुर्दृश्यमदृश्यमेनं जिगाय तत्र दैवमेव हेतुरिति दर्शयन्नाह –

अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत् ।
अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्यकञ्चुकम् ॥७६॥

तथा वक्ष्यमाणस्वयंवरविधानेनानेन नलेन सह दमयन्तीं मेलयितु-कामस्य वेधसो वन्ध्येतरमनो-[२०.a]-रथतया कर्त्री तत्सर्वं सहेलं विचेष्टितं यत्तस्य तत्तादृग् दूतकर्मावसरानुमितं धैर्यमेव कञ्चुकं वारबाणाऽपरपर्यायं भिन्नं निजप्रवेशावकाशयत्कृतम् । कैरित्याह । अनङ्गस्य वितनोर्धन्विनः पौष्पैः कुसुममयैर्मार्गणैरनङ्गो धन्वी कौसुमा-बाणा(णः) अनया सामग्र्या ह्येतद् वज्राधिकसारधैर्यकञ्चुकभेदनलक्षणं [2] दुष्करं कर्म न घटते । परं विधेरिच्छा सदा फलवती, [3] बलवतीति भावः । विधिश्चिन्तितमात्रेणैवैतादृशानि कति कर्माणि न कृतवान्, कति न कुर्वन्नस्ति, कति न करिष्यतीति परमं तत्त्वम् । अवन्ध्या खल्विच्छा यस्य स तथा, तस्य भावस्तत्ता । घटधातुश्चरादौ [4] सानुबन्धः [5] ॥७६॥

---

1. B1. परपरा याजनात्.
   B2. परपर योञ्जनात्.
2. B2. — भेदेन.
3. B1, 8. फलवतीति भावः । om. बलवती.
4. B1. —श्चुरादौ.
5. B1. मानुबन्धः ।

किं चास्य मानुषस्यैवं व्यवहरतो दोष एव नास्तीत्युपपादयन्नाह–

किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो ।

स्मरं तनुच्छायतया तमात्मनः शशाक शङ्के स न लङ्घितुं नलः ॥७१॥

अन्यत् किं तस्य पौरुषं कथ्यते । यस्यास्त्रेण तापितो व्यथितः पितामहः सर्वस्य जगतः पूर्वतरः पुरुषो वर्षीयान् श्रुतिस्मृत्यादिस्मर्ता कर्ता विचित्राणामर्थानामद्यापि वारिजं जलसम्भवत्वादतीव शीतलमिति मत्या सम्यग् यथावदाश्रयति । स खल्वेवमुपहतः सन् जलराशिशयनस्य पुण्डरीकनयनस्य नाभिपुण्डरीकगुणसामग्रीं विमृश्य तत्रैव चिरस्थितिं बध्नातीति भावः । तमेतादृशमनतिलङ्घ्यपौरुषं स्मरं शङ्के खल्वात्मनः स्वस्य तनुच्छायतया स नलो लङ्घितुं[1], क्रमेणातिवर्तितुं, न शशाकेति । वाक्यार्थस्यैव कर्मता शङ्कनक्रियायाः । तनोश्छाया प्रसिद्धा खल्वविनाभावेन स्थिता यद्वा[2] तपप्रत्यनीकिनी सा कथमिव लङ्घयितुं पार्यते । लङ्घनक्रिया-कर्तुरनुकर्तृकत्वात् तस्याः । अयमर्थः सुप्रसिद्ध एव । यद् यद् विचेष्टितं मूर्तिः करोति, तदनुलग्ना तच्छायापि तथैव तत् तदेव करोतीत्यतः कथं लङ्घनक्रियाकर्मता तस्याः स्यात् । अयमर्थस्तु कान्तिपर्यायस्य छायाशब्दस्य प्रतिच्छायिकार्थत्वेन छलितत्वात् ।

---

1. B2. लङ्घयितुं. 2. B2. पद्मावतया.

तन्वत्वस्तु तन्वी स्तोका च्छाया कान्तिर्यस्य तस्य भावस्तत्ता। यदि पूर्वेव छायाऽभविष्यत् तदाऽयं तमजेष्यत्। इदानीं विरहेण विच्छायित्वात्[1] प्रकृत-च्छायमेनं विजेतुं कथमस्य शक्तिः। यथा विरहस्तत् प्राप्तौ सुखातिशयेन कान्त्याधारस्य देहस्य पुष्टत्वादनेन तथा कृत्वा कामो जेष्यत एव।

पितामहो वाग्मिमित्यत्र 'हो' इति यथा सुश्लिष्टता भवति, तदा(था)[2] पदावसानं जागरयता पठनीयम्। अन्यथाऽत्र विसर्गस्याभावे सति, परस्पर-पदसांकर्येण पठनाद्दुच्चयञ्जुलिरत्र न तथा समञ्जस-[२०.b]-त्वं[3] द्योतयेत्। द्युवेति च होकारवकारसंधानेन ग्राम्यस्त्रीनामप्रतीतिर्ग्राम्यत्वं स्मारयेत् ॥४७॥

कविसरणिमाश्रित्य दमयन्त्या नलचित्तप्रवेशे हेत्वन्तरमाह—

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयःकृतेन किम्।
त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ॥४८॥

तत्किं कुम्भयुगेन जृम्भितमधिकं विचेष्टितम्। कीदृशेन कलशद्वयेनेत्याह। उरोभुवा, उरसि स्थितेन, वक्षसि धृत्वा, दृढगृहीतेन। पुनः कीदृशेनेत्याह। वयसा यौवनेन। कर्त्रा कृतेनोपनीतेन नवोपहारेण नूतनोपायनेन तस्य मनोहरस्यागमनानन्तरमेतस्य मनोहरस्य दृश्यमानत्वादित्युक्तिः।

---

1. B1. विच्छायत्वात्.

2. B1. -था. *interlinear*

3. B1. न समञ्जसत्वं.

सर्वः कोऽपि हि निजानुरूपां महतः खलु ढौकनिकामुपनयति ।अतोऽस्या ईदृश्या राजकुमार्या यौवनस्य गुणागुणविचारपूर्वं यथायथं स्थावरजङ्गमस्य श्रीमत्त्वविधायिनः काऽप्यपूर्वा ढौकनिका युक्ता । नारीणां च कुचद्वयादपरमपूर्वं विश्वमोहनं किमपि नास्तीत्यत एतस्यां नियस्तुकामेनानेन यौवनेन कर्त्रा केनापि निपुणेन स्वर्णकारेण प्रयोज्येन कर्त्रा आत्यकनकमयमेतत् कलशद्वयं निर्माय्योपहारीकृतम् । किं तज्जृम्भितमित्याह । यस्मा तन्वी कृशाङ्गी नलस्य हृदयं विवेशमनः प्रविष्टा[1] । किं कृत्वेत्याह । प्रपामेव सरिद्दुर्गं जलखातिकारूपं प्रकर्षेण तीर्था । नलस्य मनो हि सत्पुरुषत्वाद् दुर्लंघ्य प्रपादुर्गवेष्टितमस्ति । तन्नैवंविधेन व्यतिकरेण विना परनारी प्रवेशस्य कुत एवावकाशः । स च सम्पन्नः तन्नेतस्या द्रमथन्त्याः कुचद्वयमेव परम्परया मुख्यो हेतुः । तन्वीति साभिप्रायं कुचकलशस्य संपूर्णत्वद्योतनपरम् । तादृश्याः खलु तद्द्वयमन्तरिक्षलग्नमिवावभासते । अन्यापि कापि यथापि तन्वी दुर्बला कुम्भकारादिना नवढौकनिकत्वे परिकल्पितेन वक्षसि धृत्वा, दृढगृहीतेन कुम्भयुगेन सरिद्दुर्गमपि प्रतीर्य नलस्योपपत्तिसंकेतीकूलस्य सरलजलतृणविशेषस्य रात्रौ दिवा वा हृदयं नीरन्ध्रं मध्यं प्रविशति । दुर्बलाप्येवं करोति ।

---

1. B1. om---प्रविष्टा । ---------- परनारी.

सङ्केतभङ्गेन प्रेमभङ्गस्य सम्भवात् । दमयन्तीपक्षे व्याख्यानलेशो यथा । नव: प्रत्यग्ररचन उप समीपे हारो मुक्तासरो यस्येति । एतत् तु तच्छ्रीमण्डनमस्त्येव । तच्चपक्षे वयसा कृतेन प्ररोहणपूर्वं विहितेन चूचिकारूपेण । तद्धि प्रथमत एवास्ति, मूलशिरोभूतं नारीणां नराणां च । तदा च न स्तनादिविशेषनाम । तस्मात् तद् विधानं यौवन ए-[२१-a]-व । यथा पुंसां दाढिकाया: । अत एव समीपवर्ती मुक्तासरो[1]ऽस्तीति विशेषणं सोपपत्तिकम् । उरोभुवेति उरसि भवतीत्युरोभू:[2], तेनेति तच्चपक्षे, छलपक्षे पुनरुर एव भू: स्थानं यस्येति । नपुंसकलक्षणस्यागमोऽस्ति विकल्पितस्तत एव नायमत्र[3] ॥७८॥

तस्यामेवं हृदि प्रविश्य कृतसुखनिवासायां स किमकृतेत्याह –

अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ॥७९॥

जनाय चन्दनादिकर्मनियुक्ताय सामान्यस्य[4] वा निजामधीरतां[5] विरहज्वरजनितां कातरतां[6] गोपायतस्तस्य कामेन यत्कृतं, तत्सर्वं जागरदुःखसाक्षिणी शशाङ्ककोमला निशा चाबोधि शय्या च । अत्रान्यस्यानवकाशात् । शुक्लपक्षे विरहिण: किल मन्मथोऽतीव व्यथयतीति स्थिति: । तथापि तैस्तापशान्तये स खल्वभिलष्यते । हंसरोमतूलकादिमृदुशीतलप्रकृति किमपि तथैव ।

---

1. B1. -शिरो-.
2. B1, D. -भु. B2. -भू.
3. B1. नाम यत्र.
4. B1, D. सामान्य.
5. B2. नीचधीरतां.
6. B2. कान्तरितां.

अतोऽयं मणिकुट्टिमे वस्त्राप्यनाच्छादिते शशाङ्ककोमलां शय्यामधिष्ठाय श्रीसहाय एव मितपरिजनो पाकरद्वयपरिवर्तनेन शशाङ्ककोमलां निशामतिवाहयति स्म। अत एव जागरणदुःखोपहृतत्वं तयोः। जनाय तु विरहदशाप्रकटनलज्जाभयात् [1]स्वस्वरूपं नाकथयद् यथायं तच्छान्तये प्रयतेत। निशा तावच्छशाङ्केन कोमला म्रदीयसी। शय्या च शशो जीवविशेषस्तस्याङ्कः क्रोडदेशस्तद्वत्कोमलेति मुख्यवृत्त्यैव। निशापक्षे तु कोमलेव, कोमला त्वगिन्द्रियाह्लादकत्वेन तद्गुणानुभवात्। शशस्याङ्कः किलातीव मृदुशीतलो भवति। एतद् द्वयं चातीवोद्दीपनम् ॥४९॥

विवाहविधिना यथेयं प्राप्यते, तथायं किमपि[2] न प्रयतितवानित्याह—

स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनुजामयाचत।
त्यजन्त्यसून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥५०॥

स प्रभुः सर्वत्र समर्थः। अत एव स्मरेणोपतप्तोऽपि भीमं तत्पुत्रीं न ययाचे। स प्रभुत्वात् सर्वस्मै सर्वं यथायथं ददाति, न पुनर्याचते। युक्तमेवेदम्। [3]यतः मानधनाः असून् प्राणान् वरमङ्गीकारपूर्वं त्यजन्ति। शर्म सुखं च गौणभूतं त्यजन्ति। न त्वेकमद्वितीयं निर्मूल्यमयाचितव्रतं त्यजन्तीत्यभिसम्बन्धः। याचितस्य वस्तुनो व्रतं नियमः। यथा 'दुग्धस्य व्रतमस्यास्ति' इत्यादि। तत्र हि दुग्धेनैवायं वर्तत इति परिणतोऽर्थः। अयाचितस्यायाचनस्य[4] वा व्रतम्।

1. B2. om. स्वरूपं ------ मुख्यवृत्त्यैव। 3. B1. यनः.
2. B1. किमभि. B2. किमिति. D. किमति. 4. B2. – याचितस्य.

तावदेव हि प्रभुत्वं यावन्न याचते। विद्भिरागमिति मुख्यं कर्म। तनुजामिति तु [२१.७] गौणम्। अयं च प्रसिद्धो लोकव्यवहार एवात्र निबद्धः। अन्यथा ह्यनिष्टार्थापत्तिः स्यात्। यथा कश्चित्कञ्चन देवमाराध्य तनुजं तनुजां च याचते, तथा याचितवानिति। असूंस्त्यजन्ति, शर्म च त्यजन्तीति चकारोऽयमसूंश्च त्यजन्तीत्येवं यदि सम्बध्यते, तदा खल्वप्यर्थे प्रतीयमानोऽतीवार्थस्य[1] पुष्टिः स्यात् तस्मात् तथैव व्याख्येयम्। वरमित्यव्ययं सानुमताङ्गीकारे ॥५०॥

गोपयितुमशक्यानां विरहलिङ्गानां गोपनसंविधानकमाह-

मृषाविषादाभिनयादयं क्वचिज्जुगोप निश्वाससतिं वियोगजाम्।
विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम् ॥५१॥

अयं नलः क्वचित्कस्मिन्नपि केनापि कृते कर्मणि 'त्वया नेदं सुसदृशं कृतं' इति मृषा वितथस्य विषादस्य दुःखपूर्वशोचनस्याभिनयादनुकारात् विरहजनितां निश्वासानां ततिं परम्परां गोपितवान्। विलेपनस्य चन्दनस्याधिका योग्ययोजनातिरिक्ततया चन्द्रभागता कर्पूरांशता, तस्या विभावनात्, प्रदर्शनात्। पाण्डुतां चापलपति[2] स्म। अहो! पश्यत विलेपनान्तः कर्पूरांशोऽधिकोऽभूदत एवायमस्मद् देहे पाण्डिमेति। प्रायेण च मुख[3] एव विरहकृतसितत्व-दर्शनमिति तत्प्रधानवस्तुकथनम्। धनिनः सर्वकालं चन्दनेन मुखमुद्वर्तयन्ति।

1. B1. अतीतार्थस्य· 2. B2. चपलति· 3. B1. सुख·

सर्वाङ्गचन्दनारोहणं तु ग्रीष्मादावेव। सर्वकालं वा राज्ञां यस्य लोके प्रशंसार्थानुपरि[1] संज्ञा। अन्यदपि कुङ्कुमादि वा यथार्हं विलेपनं यक्षकर्दम एव वा सर्वत्र[2] तु योग्यत्वादत्र ग्राह्यः। स खलु कर्पूरागरु[3]कस्तूरीकक्कोलसमांशयोजनेन भवति। स च सर्वत्र तु सेव्यः। शरीरपाटवाय[4] त्रिफलेव। अभिनयनमनुकृतिवशादवयवानामितस्ततः करणं, विभावनं तु मुख[5]चलनपूर्वं चक्षुःकरसंज्ञया प्रदर्शनम् ॥५१॥

ननु यद्यहमेवं न विचेष्टेयं, तदा मामपरे विरहव्यसनाभिभूतमव- -बुध्येरन्निति यावदुभयाव[6]लम्बनं मनस्तावत्त्वच्च परमं प्रेमयोगिन इव परब्रह्मणि प्रेप्सिते। प्रेप्सिते रुचिते वस्तुनि देहिनो यत्र मनस ऐकाग्र्यं स्यात्, तत्रैवं तत्परं भवेदित्याशङ्क्य पूर्वतत्त्वप्रवृत्तस्य योगिन इवास्य चलाचलद्विरूपं चित्तस्यैकाग्र्यमाह। एकरूपं तु पुरो वक्ष्यति—

शशाक निह्नोतुमये न तत्प्रियामयं बभाषे यदलीकवीक्षिताम्[7]।
समाज एवालपितासु वैणिकैर्मुमूर्छ यत्पञ्चममूर्छनास्वपि ॥५२॥

अये! इत्यनुशयपूर्वं आश्चर्ये। अयमलीकवीक्षितां भ्रान्तिदृष्टां प्रियां यद्बभाषे, 'प्रिये! कस्त्वादेशस्तमविचारयन् सम्पादयामि' इतिप्रभृति यदुक्तवान् तन्निह्नोतुं गोपायितुं[8] न शशाक, यच्च समाजे विविधजनमेलक एव मुमू-[१२.व]- -र्च्छीत् तदपि निह्नोतुं न शशाकेत्यभिसंबन्धः। कासु सतीषु तदेवमित्याह।

---

1. B1, D. -नुपरि. B2. -भुपरि.
2. B1. सर्वर्तु. D. सर्वर्तु.
3. D. -गुरु-.
4. D. -पाटवये.
5. B1. -चालन-
6. B1. om. -व-.
7. B2. om. hapl. यदलीक ----- यद्बभाषे,
8. B1. गोपयितुं.

पञ्चमाख्यस्य स्वरस्य मूर्च्छनासु सारणासु वैणिकैर्वीणाकर्मोपजीविभिरालपितासु प्रथमत एव प्रारब्धासु । पञ्चमाख्यः स्वरः खलु स्थलीवोद्दीपनः समाज एवेति पूर्वत्रापि वेदितव्यम् । गीतप्रबन्धाधद्दःस्यालाप इति संज्ञा । अन्तिमस्य त्वाभोग इति । केचित् तु अथेन शुभदैववशात् तन्निञ्झोतुं शशावेति कल्पयन्ति । तच्चोत्तरार्थेन विसंवादान्न मनश्चमत्कृतिकृत् ॥५२॥

एवं वृत्ते स किमकरोदित्याह –

अथाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥५३॥

स नलस्तावद् भूपतिः । तत्रापि जितेन्द्रियाणामादौ शंसिताचारः । अत एव असंवरे संवरणवर्जिते शम्बरवैरिविक्रमे कामस्यातिशक्तिमत्त्वे तत्र तादृशे जने क्रमेण प्रकटत्वमुपेयुषि प्राप्ते सति सापत्रपतामवाप । समाजस्थितेभ्यो जनेभ्योऽतीवतरां लज्जित इत्यर्थः । संवरणं संवरः । स्वरवृद्गमिग्रहामलित्यल् । न विद्यते संवरः संक्षेपो यस्य सोऽसंवर इति बहुव्रीहिः । संवरणं गृहाङ्गणादौ शोषयितुं प्रसारितानां यवगोधूमादीनां संक्षेपेण[1] प्रसिद्धम् ॥५३॥

नन्वेवंविधा महाशया विवेकपूर्वमेव व्यवहरन्ति । तत् तस्मिन् सत्येव किमित्ययमेवंकूलवानिति तस्य सानुरागस्यात्र[2] कर्मणि तं प्रत्यकिञ्चित्करत्वमाह –

---

1. B1. संक्षेपणे. 2. B1. om. -रा-. B2. तस्यानुगस्य.

अलं नलं रोद्धुमिदं किलाभवन् गुणा विवेकप्रमुखा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः ॥५४॥

किलेति सम्भावने । विवेक, बहुश्रवण, सत्सङ्गादयो गुणा नलमिदं चापलं रोद्धुमलं समर्था नाभवन् । एवं चापलमवलम्बमानः किलायं तैर्न वारयितुं पारित इति भावः। एतच्च युक्तमेव । यतः स तादृशः स्मरो रत्यां दृढप्रेमग्रन्थिरूपायां सत्यां देहिनं यदनिरुद्धं रोधक्रियारहितमेव करोति । अयमीदृश एष एवंरूपः सर्गनिसर्गः सृष्टिपरम्परायाः[1] प्रकृतिरेवेयमीदृशी । ब्रह्मादयोऽपि[2] रि वश्य एवं व्यवहृताः श्रूयन्ते । तदस्य राज्ञो मानुषस्यैवं व्यवहरतः किं दूषणमिति भावः । अथ चार्थान्तरं[3] यथा — स प्रसिद्धः स्मरः कामो रत्यां निजपत्नीविषये यदनिरुद्धनामानमेवं[4] तनयं सृजति, जनयति । अयमीदृशः सृष्टिस्वभावः । कामस्य रतिसम्भवः किलानिरुद्ध एव तनयः । अत्र पक्षे सृजतीति यदा सृजनक्रिया[5] वर्तमानाभूत् साकूतकाकुस्वरात् तत्प्रतीते वर्तमाना । यथा कश्चिदाह— 'रामो यत्किल रावणं मारयति, नूनं तत्र सीताहरणमेव हेतुः' इत्यादि । प्रथमपक्षे तु [२२-६]. वर्तमानव्यवहारापेक्षयैव । नलमिति मुख्यं कर्म, चापलमिति तु गौणम् । यथा — 'गामवरुणद्धि[6] व्रजम्'- इत्यत्र गोव्रजौ । तत्र गोष्ठमध्यगतीकृतां कृत्वा रुणद्धीत्यर्थो यथा तात्त्विकस्तथा नले विषये वर्तमानं चापलमिति ॥५४॥

1. B2. सृष्टि°. 2. B2. ब्रह्मादयो. 3. B1, 8. वा—. 4. B1. —मेव. 5. B1. सर्जन—
6. B2. —द्धि व्रजम्.

अथैवं सति स किं चकारेत्याह-

अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि।
क्षणं तदारामविहारकैतवान्निषेवितुं देशमियेष नैषधः ॥५५॥

यत्नवान् कृतयत्नोऽपि सन्नलः पूर्वोक्तमनङ्गस्य[1] चिह्नं विना यदा कस्मिन् काले संसदि सभायां किलासितुं स्थातुं न शशाक, तदोपवनदर्शनव्याजेन क्षणमात्रं निषेवितुं समाश्रयितुं देशं स्थानमिच्छति स्म। अत्र देशमर्थादाराममरूप- -मिति केचिदाहुः। तन्न[2]। क्षणमित्यवसरदायकमित्यस्यार्थस्य कविना विवक्षितत्वात्। क्षणो ह्यवसरोऽवसरः क्षण इति पर्यायरूपत्वमनयोर्गौणमुख्यभावविरहितमेवास्ति। केवलं प्रसिद्धाप्रसिद्धत्वेन विधेयानुवादकृत एव विशेषः। यः प्रसिद्धस्तस्यानुवाद- -त्वमप्रसिद्धस्य तु विधेयत्वमिति। तस्मात् क्षणदायित्वाद् देशोऽपि[3] क्षण एव। क्षणमिति विजनमित्यर्थः। अयमेवंरूपश्च विजनपर्यायः क्षणशब्दोऽपभ्रंशः एवान्य- -जनवस्तुप्रभृतिः(ति) शून्ये गृहादौ भाशानकादिदेशे व्यवहरति। एतमर्थं विनाऽत्र वाक्यसङ्गतिरपि न तथा युक्तिमती प्रतिभासत इति। शेषमत्र सहृदया विदन्ति[4]। यत्ते स्वीकरिष्यन्ति, यत्र त्वादरेणाधिकावृत्तिः सा सेवाशब्देनोपचर्यते। यथा- 'शरधातपं न सेवेत, सेवेत शशिनः करान्' इति। 'देवदत्त! धर्मार्तोऽसि गत्वाऽस्य वटस्य[5] च्छायां सेवस्व', 'हरीतकीं सर्वकालं सेवेत' इत्यादि।

1. B1. मनं यस्य.    3. B1. देशोऽपि.    5. B1. वटच्छायां.
2. B2. तत्र    4. B1. वदन्ति.

संसारं विहाय कू[1]लस्थेन भूत्वा व्यवह्रियते, स च न राज्ञो धर्मः। तेन हि विरचितपरिकरवत् स तस्य सभाम[2]ण्डपस्य मण्डनीभूतेन निजोचितकनकरत्न-सिंहासनोपविष्टेन शरच्चन्द्रप्रसन्नवदनेन भवितव्यमिति सदसी[ती]त्यैव सञ्जीवम्॥५५॥

उपवनदर्शनसंविधानसम्पदमाह -

अथ श्रिया भर्त्सितमत्स्यलाञ्छनः समं वयस्यैः स्वरहस्यवेदिभिः।
पुरोपकण्ठे स वनं दिदृक्षिता दिदेश यानाय निदेशकारिणः॥५६॥

अनन्तरं स नलो यानाय वाहनानयनायादेशविधायिन आदिष्टवान्। कीदृशः? दिदृक्षितेति व्याजेनैव। पुरसमीपवर्ति वनमीक्षिता द्रष्टा, द्रष्टुकाम इत्यर्थः। कीदृशः सन्नेवं चकारेत्याह। श्रिया मण्डनजनितया शोभया तिरस्कृतमीनकेतुः। तान्[शुल्व]-दृश नृपयोग्यानि समस्तमण्डनानि पूर्वं कृत्वा तदनु त्वरावशादुपर्युपरि समा-दिष्टवाहनश्च इत्यर्थः। कथमीक्षितेत्याह। स्वस्य रहस्यं गोपनीयमप्यर्थं विदन्ति[3], तच्छीलाः स्वरहस्यवेदिनस्तैः स्वरह[4]स्यवेदिभिर्वयस्यैः सखिभिः समं न त्वन्यैर्मान्यैरित्यर्थः। ईक्षितेति तृन्। (                ) । स्वस्तनीप्रयोगेऽपि न कदाचिदर्थक्षतिः। यथासम्भवं तु व्याख्येयम्। यद्यपि सर्ववाहनानि यान-शब्दवाच्यानि, तथापि प्रस्तावादश्व एवात्र ॥५६॥

1. B2- कूण-
2. B1- om- मण्डपस्य-
3. B1, D- वदन्ती.
4. B2- om- स्वरहस्यवेदिभिः

अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम् ।
उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोभितमन्दुरोदरम् ॥५७॥

अनन्तरममी आदेशकारिणोऽश्वमुपाहरन्, अग्रेस्थितं कृत्वा न्यवेदयन् । औयस्वामिन् पादोऽवधार्यतामिति । कीदृशमित्याह । विभूषितं यथावदलङ्कृतम् । सितं स्निग्धावदातं जवे वेगेऽपि माने उच्चप्रमाणेऽपि च पौरुषाधिकं; पुरुषोचितश्चिच धर्मस्तेनाधिकं पौरुषात् पुरुषप्रमाणादधिकं च । सततचपलैः शफप्रान्तैः कृत्वा क्षोभितमन्दुरोदरं संचालितहयशालान्तरमिति तेजस्वित्वकथनम् । ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु । वीनां पक्षिणां भुवि भूमावुषितं विभूषितमिति व्याख्यानलेशः । यो हि कियन्त्यपि दिनानि सर्वकालं वा यत्र भुवि कृतवासो भवति तस्मिन्नवश्यं केऽपि तज्जनजगुणाः संक्रामन्ति । पक्षिभूमौ चान्यदेशजनवत्पक्षिण एव वासिनः । तेषां व्याधो गुण उड्डयनमेव स चाश्वस्तदानीमुड्डयनेच्छुरिव दृश्यते । ततः पक्षिभूवाससम्भावनम् ॥५७॥ तमेवाश्वं वर्णयति —

अथान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहःसहोदरैः ।
निगालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः ॥५८॥

---

1. B2. – रत्न.
2. B1. – स्वामिन्.
3. B1. – दाती.
4. B2. – त्रिमाने.
5. B1. द्दियानि
6. B1. अश्वार्थं.

अथ स क्षितिपाकशासनो भूमीन्द्रस्तमेतादृशं हयमारुरोहेति कुलकान्तस्थितेना-भिसंबन्धः। कीदृशमित्याह। केसराणां स्कन्धकेशछटानां ये केशास्तेषां रश्मयस्तै-र्विराजितं शोभितम्। तदानीं तस्य तेजस्वित्वात् शिरोधूननपूर्वं हिणिहिणायमानस्य केसराणां केशाः प्रकीर्णा यदि विरलीभवन्ति, तदा तेषां रश्मयोऽनुभूयन्ते। कीदृशैः? निशीथिनीनाथमहसां सहोदरैरिव सहोदरैः। रश्मिरूपस्य विशेषानुपलम्भा-च्चन्द्रस्य महसैव सादृश्यम्। यदि च केसरकेशानामेव रश्मित्वमारोप्यते, [1]तदेदमनुपपन्नमेव स्यात्। केशानामतीव रश्मिसादृश्यान्निशीथिनीनाथकराग्रसोदरै-रित्यादि विरुध्यात्। किञ्च सूक्ष्मदृष्ट्या चिन्त्यमान उपमानोपमेयभावोऽप्येवं-कृतेन घटते। निगालगाद्देवमणेरिवोत्थितैः केसरकेशरश्मिभिर्विराजितमित्येषा सम्भावना, तदैव सम्भवे-[२३.७]-द् यदि केसरकेशानां पूर्वसिद्धं रश्मित्वं स्यात्। यदा च देवमणेः सकाशादुत्थितैरिव केसररूपै रश्मिभिर्विराजितमित्यपि [2]क्रियते, तदापि स एवार्थः परिणमतीति पूर्व एवार्थः श्रेयान्। [3]तुरङ्गाणामङ्ग-रोमभ्योऽपि सूक्ष्मा रश्मय उल्लसन्ति, तेषां तदातीव दृश्यमानत्वाद् देव-मणिरश्मित्वारोपणार्थत्वाच्चात्र वर्णनम्। इदानीमुत्प्रेक्ष[4]ते। तैः कीदृशैः? देवमणेर्देवमणिनाम्न आवर्तविशेषादुत्थितैरुद्भूतैः। शब्दमात्रेण देवमणिश्चिन्तामणि-रन्यो वा प्रशंसनीयो मणिः। देवशब्दः प्रशंसार्थो बहुशः प्रयुज्यमान एवास्ति।

---

*Mss. B2 & D. read केशर for केसर.
1. B2. तदेयम्.
2. B2. क्रियेत.
3. B1. तुरङ्गमाणाम्.
4. D. उत्प्रेक्ष्यते.

गोवृन्दारकवत्। [1]ननु कुतो देवमणेः सांनिध्यं यदेवं सम्भावनेत्याह। कीदृशात्? निगालगात्। निगालो गलोद्देशस्तत्र [2]स्थितात्। तत्र यः किलाखण्ड आवर्तस्तस्य देवमणिरिति संज्ञा। तच्चाश्वानामतीव शुभं लक्षणमिति भङ्ग्या तत्सद्भावः सूचितः। ननु यदि गलोद्देशेऽसौ स्थितस्तत्कथं तद् रश्मीनां स्कन्धे संचार इत्याह केनोत्थितैः? [3]आन्तरेणमध्य[4]भवेनावटुगामिना कृकाटिकायायिनाऽध्वना मार्गेण, यो मार्गः कृकाटिकां याति तेनेत्यर्थः। विराजितमित्यर्थान्तरलेशोऽप्यस्ति। यथा वीनां राजा विराजो गरुडस्तद्वदाचरितम्। अन्यत्सर्वं पूर्ववद् यथाघटन--मनेन संबन्धनीयम् ॥५८॥

अजस्रभूमीतटकुट्टनोद्गतैरुपास्यमानं चरणेषु रेणुभिः।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः ॥५९॥

पुनः कीदृशमित्याह। अनवरतभूपृष्ठाहननोत्पतितैः पांसुकणैश्चरणेषु सेव्यमानम्। [5]उत्प्रेक्षते। जनस्य चेतोभिरेवं क्रियमाणं ननु कुतो [6]ज्ञातम्। यदिमानि जन--मनांसीत्याह। यतोऽणुत्वेन चिह्नितैः। अणुप्रमाणं किल मनः। लिङ्गेन लिङ्गी सर्वत्राप्यनुमीयत एव। ननु किमर्थं तैरिहागतैरित्याह। जवाधिक्यपाठायातैः। मनांसि तावत्प्रजवीनि। अयं तु बहुना ततोऽधिक इति नूनमेषामेवं कर्तुमुचितम्।

1. B2. न तु तत्र.
2. B1. स्थितात्.
3. B2. आन्तवेण.
4. B. -भावेना-
5. B. उत्प्रेक्ष्यते.
6. B1. ज्ञायते.

अन्योऽपि कोऽपि विद्वान् वैयाकरणादिवृत्तिपंजिकादिविन्तदुपरियर्तिविशेषग्रन्थाध्ययनाय यदि तद् वेदिनः सन्निधिमायाति, स संवाहनादिप्रसङ्गेन तस्य चरणलग्न एव तिष्ठति। उपासनं समीपोपवेशस्तेन च सेवा लक्ष्यते। पुनः कीदृशमित्यपेक्षायामुत्तरश्लोकेषु वर्तमानानि[1] तमित्यस्य विशेषणानि यथाघटनं नियोज्यानि[2]। पदार्थस्तु तत्र तत्र कथयिष्यते ॥५९॥

चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम्।
अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनिमास्थितम् ॥६०॥

चलाचलोऽतिचपलः प्रोथो घोणा य-[24.a]-स्य तस्य भावस्तत्ता, तया कृत्वा महीभृते नलाय स्वस्य वेगस्य विषये ये[3] दर्पाः सतेजस्का अहंकारास्तान् कथयितुमुत्सुकमिव। तर्हि किमिति[4] तत्करोतीत्याह। गिरा वचनेनालं पर्याप्तं वक्तुं [5]नैवाधिकारोऽस्ति। यतोऽयं किल हयस्याशयमभिप्रायं स्वयमात्मनैव वेद। अयं हि हयहृदयवेदी। यावती हयजातिस्तावत्या हृदयमयं जानाति। अहं च हयोऽस्मि, अतोऽनेन ममाशयो ज्ञानमान[6] एवास्ति किं निष्प्रयोजनेन तन्निवेदनेन' इति मौनिमास्थितम्। मौनं कृत्वा स्थितमित्यर्थः। मौनमित्यव्ययम् ॥६०॥

---

1. B2. वर्तमानो नित्यमित्यस्य.
2. B1. –पि.
3. B1, B2. om. ये.
4. B2. किमिति न.
5. B2. नैवात्र–
6. B1. ज्ञायमान.

महारथस्याध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशःसितम् ।
स्वावशांशुमिवाद्वनीदशां हसन्तमन्तर्वत्मवर्तनी रवेः ॥६१॥

अध्वनि चक्रवर्तिनो महारथस्य परानपेक्षं यदुद्वहनं, तत एव हेतोर्यद्यशो, न तु नैसर्गिकं गुणान्तरजं वा तेनैव सितं शुक्लं, न तु प्रकृत्या। रवेर्वर्त्म बहूनामश्वानामध्वनि चक्रवर्तिनो महारथस्य संबन्धिनामनीदृशामनेनासदृशानाम- -न्तर्वत्मं सारं दृशनसितरश्मिव्याजेन हसन्तं किमर्थमेते वृथैवं पोषिता इत्यादि- -मनोगतवचनपूर्वकप्रसिद्धहासविलक्ष्यान्[1] कुर्वन्तं ते किल सप्ताध्वनि चक्रवर्तिनो महारथस्योद्वहनाय संबन्धिनः कृताः सन्ति। अयं त्वेक एवेति। तेषामेतस्य चान्तर्वत्मविषये ह्रासवृद्धिकृतं महदन्तरमिति। पदसमुदायस्य शब्दमात्रकृतसादृश्या- -दुद्वहनस्य चासादृश्यादुपहासो युक्तः। अर्थतस्तु महान् भेद एव। यथा प्रकृता- -श्वपक्षे। अध्वनि क्रमागते मार्गे मार्गमात्र एवावर्तमानस्य महारथस्य सहस्र- -योधिनः चक्रवर्तिनः सार्वभौमस्य। सूर्याश्वपक्षे तु अध्वनि व्योमचारित्वाद्ध्वनि- -रहितं यथा स्यादेवं चक्रवर्तिनो रथाङ्गचारिणो महारथस्याधिकप्रमाणस्य स्यन्दनस्येति पदार्थः। रवेः रथस्तद्धेतुः भूम्यभावात् पक्षिवत् अचलन् कुत- -स्वक्रचीत्कारं करोतु। एवं च सति, चक्रादिसामग्रीसंयोजनक्लेशविवर्जितेनेतरदेव- -वद्विमानेनैव किमिति भगवान् भानुर्व्योम नातिक्रामतीति पूर्वपक्षस्य समाधानं रथविरचनां विना विश्वसृष्टेरघटनम्। तत्त्वतो हि शरीरं रथः।

---

1. B1. - विलक्षोन. B. - विलक्ष्यान्.

इन्द्रियाण्यश्वाः । मनः सारथिः । परमात्मा भगवान् भानुरिति स्थूलसूक्ष्ममार्गद्वयेऽपि स्थिति-
-रस्ति । अधिकप्रसरस्त्वत्र[1] न युज्यते । अन्यत्रापि किमपि गुरुदीर्घप्रस्तरकाष्ठादि यद्-
-बहवः सम्भूयोद्वहन्ति, तच्चेदितरः कोऽप्येकक एवोद्वहति । ततस्तत्समीपवर्तिनो
विलोकयितारः 'साधु भो ! देवदत्त साधु यत्त्वं तनुगात्रोऽपि हेलयैवैकक एवं
कुरुषे'। अमी तु समुपचितनिचितघनतनवोऽपि दशपञ्च मिलित्वा कुर्वन्तीति
प्रशंसोज्ज्वलवदनकमलः सन् स ता-[२५.७]-न् हसति । न विद्यते परेषामपेक्षा
साहायकस्पृहा यत्रोद्वहने तत् तथा । अयं हि भानुचित् सूर्याश्वा इव परेषामपेक्षां
न कुरुते । कथमहमेतं गरिष्ठं कुलालपृष्ठप्रतिष्ठमुद्वहामि तदन्यो महाकायः कोऽपि
ममात्र कर्मणि सहायः सम्पद्यतामिति । अथवा न विद्यते नलस्यान्यस्याश्वस्यापेक्षा
यत्रेति व्याख्येयम् । शब्दमात्रेण यः पूर्वार्थो विवक्षितः सः खल्वेवमपि न विघटते।
न ह्यस्मिन् विद्यमाने नलः कदाप्यन्यमश्वमात्माधिष्ठानेन मान्यं करोति ॥६१॥

सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केसरस्य च ।
स्फुटं चलच्चामरयुग्मचिह्नैरनिह्नुवानं निजवाजिराजताम् ॥६२॥

प्रकटमेव निजस्याश्वप्रभुत्वं प्रकटयन्तम् । कैः ? चलतश्चामरयुग्मस्य चिह्नै-
-श्चिह्नकरणैः[2] । केनेत्याह । सितकान्तेश्चञ्चलत्वं[3] प्राप्तवतः पुच्छस्य वालहस्तस्य च
केसरस्य स्कन्धकेशच्छटासमूहस्य च मिषेण । एतद्द्वय[4]मतीवान्योऽन्यसदृश —

---

1. D. अधिकः 2. Bl. -करणैः । 3. D. सितं. 4. Bl. द्वमय.

-गुणमेतत्समीपवर्ति राजचिह्नमेवास्य वाजिराजस्य एतेन केसरस्य पुच्छसादृश्येन वर्णनं कुर्वता समधिकं[1] दीर्घत्वमुक्तम्। चामरे हि राज्ञः समानवर्णप्रमाणे भवतः। चकारद्वयेनात्र साम्यं प्राप्यते। शुक्लत्वं त्वस्य पूर्वं शुक्लस्यैव वर्णितत्वात्। प्रतिश्लोकमेतद्वैतद्वर्णनेनास्य सर्वेषामश्वशुभलक्षणानां सौष्ठवं सूचितम् ॥६२॥

अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया।
उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ॥६३॥

रयस्य स्मरे प्रसरे गर्वे[2] वा विषये जितस्य गरुडस्य प्रतिभटतां प्राप्तवन्तम्। क्वेत्याह[3]। सर्पभक्षणलक्षणे[4] पुरुषकारेति[5]। कया? मुखेऽनुषक्ता लग्ना[6] वल्गुर्मनोहरा या वल्गा मुखरज्जुस्तया। इयं या मुखानुषक्ता वल्गा नूनम-यमनेन सर्प एवाभ्यवह्रियमाणोऽस्ति। एवं च तद्भक्षणशक्तावपि गरुडेन सदृशस्य साम्यमस्ति। अर्थकुलकम्[7] ॥६३॥ स इन्द्रो भूत्वा 'घोटकेचटित'[8] इति लोकोक्त्यनु-कारमाश्रित्य शब्दद्वारेणास्य साक्षादिन्द्रत्वमाह-

स सिन्धुजं शीतमहःसहोदरं हरन्तमुच्चैःश्रवसः श्रियं हयम्।
जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ॥६४॥

---

1. B2. समाधिकं.
2. B2. वार्वे.
3. B2. केत्याह.
4. B2. -लक्षणलक्षणे.
5. B1. पुरुषकारे सति. B2. पुरुषकारेऽपि.
6. B. अनुलग्ना.
7. B1. -कुलकम्.
8. B2. घोटकिंचटित.

स क्षितिपाकशासनो भूमौ वर्तमान इन्द्रः। तं तादृशं हयमारुरोहेति शब्दच्छले-
-नास्याखण्डमाखण्डलत्वमाह। कीदृशः? जिताखिलक्ष्माभृत्। जिता अखिलाः क्ष्माभृतः
पर्वता येन स तथा। इन्द्रो ह्यत एव गोत्रभित्[1]। तथा अनल्पानि बहूनि लोचनानि
यस्य स तथा। इन्द्रस्य सहस्राक्ष इति यौगिकमेव नाम रूढि-[२५.७]-मापन्नमस्ति।
हयं कीदृशम्? उच्चैःश्रवसो निजवाजिनः श्रियं गुणसम्पदं हरन्तमाददानम्।
यतः कीदृशम्? सिन्धौ समुद्रे जातं सिन्धुजम्। उच्चैःश्रवाः किल मथनकाले
जलधेरुत्पन्नः। अन्यच्च शीतमहसश्चन्द्रस्य सहोदरम्। सोऽपि किल तत्रैव सिन्धो-
-र्जातः। नत्त्वलस्तु क्षितौ पाकं पचनक्रियां शास्ति यः स तथा। नलः किल
पाकक्रियाविद्भूत्। 'क्षितेः पाकशासन इन्द्रः' इति प्रशंसार्थस्त्वस्यैव[2]। जिता
अखिलाः क्ष्माभृतो राजानो येन स तथा। अनल्पे विपुले विशाले लोचने
यस्य स तादृशः। हयं तु सिन्धुदेशे जातत्वात् सिन्धुजम्। शीतमहसः सहोदरं
सितश्रियम्[3]। उच्चैरुच्चयोः श्रवसोः कर्णयोः श्रियं हरन्तं गृह्णन्तम्।
बलेनोच्चैःकृतकर्णत्वाद्धरन्तमित्युक्तम्। न हि तृणचरणाद्यवसरेऽप्यश्वस्योच्चकर्णत्वम्।
तदापि यद्येवमेव[4] भवेत् तद्यं दोषः। शिथिलकर्णत्वमेव हि सुखचरणस्य लिङ्ग-
-मश्वानाम्। तदा तु तेजोऽधिकदर्पात् शङ्कुकर्णतैव प्रशस्या। किञ्च शिथिल-
-कर्णत्वमश्वानां वृद्धत्वलिङ्गम्। अकडिज एव हि शिथिलो भवति॥६७॥

---

1. D. -भृत्.
2. B1, D. -स्त्वत्यैव.
3. B2, D. -श्रिया.
4. B2. यद्येव. om. -मेव.

इदानीं सूर्येण सह शब्दमात्रकृतसाम्यात् साक्षात् स एवायमिति दर्शयन्नाह —

निजा मयूखा इव तीक्ष्णदीधितिं स्फुटारविन्दाङ्कितपाणिपङ्कजम् ।
तमश्ववारा जवनाश्वयायिनं प्रकाशरूपा मनुजेशमन्वयुः ॥६५॥

अश्ववाराः सादिनस्तं मनुजानामीशं राजानमन्वयुरनुगताः । कीदृशाः? निजा मयूखा इव । यथा निजाः स्वसंबन्धिनो मयूखा भवन्ति, तादृशा एव । उत्प्रेक्षेयमत्र पक्षे । श्रूयते किल नलस्याङ्गलग्ना रश्मय एवैते सर्वकालम् । सर्वावस्थास्वविनाभावित्वेनानुगामित्वात् । भूयः कीदृशाः? प्रकाशरूपाः । प्रकाशमतिप्रसिद्धं रूपं कान्तिमत्त्वं येषां ते तथा । एवंविधा एव राज्ञामनुचराः सखायः खलु युक्ताः । तं कीदृशम्? तीक्ष्णा दीधितयस्तेजांसि यस्य तं प्रतापवन्तमित्यर्थः । लोके[1]ऽप्ययमुचितव्यवहारोऽस्ति । यथा कोऽस्य किरणान् सोढुं शक्नोतीति । स्फुटैः [2]प्रकटितैररविन्दै रेखापद्मैरङ्किते चिह्निते पाणिपङ्कजे करकमले यस्य तं तथा । न ह्येतादृशं लक्षणं विना राज्यपदप्राप्तिः । पाणिपङ्कजमित्यत्र पङ्कजशब्दः पक्षद्वयेऽपि प्रशंसार्थ एव । [3]जवनाश्वयायिनमिति जवनदेशजेनाश्वेन याति तच्छीलस्तम् । तीक्ष्णदीधितिं भगवन्तं विवस्वन्तं प्रकाशरूपा निजा मयूखा अनुयान्ति । प्रकाश एव रूपं मूर्तिर्येषामिति कृत्वा तु ते प्रकाशरूपाः । य एव [4]हि रश्मयः, स एव हि प्रकाशः केवलं गोधूमादिराशिवद् भेदभेदकभावमात्रमस्ति ।

---

1. B1. लोको —
2. B1. प्रकटिततै —
3. B2, D. यवनाश्व —
4. D. om. हि.

थ एव गोधूमाः, स एव राशिः। केवलं संस्थानविशेषेण भेदभेदकभावस्तथात्र निशा-[२५·७]-स्तु सार्वकालिकनैसर्गिकसंबन्धात्। अत्र पक्षे तु तीक्ष्णदीधितिमित्येव सूर्यस्य नाम ग्राह्यं, न तु मनुजेशमिति। तदपि भवेत् सूर्यस्य नाम, किन्तु न झगिति तस्य प्रत्यायकम्। नाम खलु तादृशं युक्तं यदुच्चरितमात्रं स्वसङ्के-तितमर्थमव्यवधानेन झगिति ग्राहयति। नलपक्षे तु मनुजेशमित्येतदेव हि साध्यमतस्तस्यैव विशेष्यत्वेन ग्रहणं कृतम्। यदेव हि प्रसिद्धं तदनूद्य यच्चा-प्रसिद्धं तदेव विधेयमिति। कीदृशं सूर्यमित्याह। मनोर्जाता मनुजास्तेषामीशं पूज्यम्। मनोरपि तत एव सम्भवात्। आदिपुरुषोऽयमस्माकमिति कृत्वा यदि मनुजा मनुं कुलस्वामिनं मन्यन्ते, तर्हि तस्यापि जन्मकर्ता भगवान् भास्वान्, अत-स्तस्यैव मुख्यं स्वामित्वं युक्तम्। तेन विना मनोरसम्भवात्। यदि स मनुं न जनयेत्, ततः कथं तज्जायेतं स्वामिपदेऽभिषेचयेयुः। स्फुटाभ्यां विकसिताभ्याम-रविन्दाभ्यामङ्किते चिह्निते पाणिपङ्कजे यस्य स तथा। सूर्यस्य हस्तयोः पद्मधारणं सार्वकालिकं चिह्नं सर्वत्र तन्मूर्तिषु तथैव हि दृश्यते। स्फुटत्वं तु तयोर्भगवतः पाणिस्थितत्वेन सांनिध्यातिशयात् सर्वकालमधिवसन् केन चन्द्रमसा वियोजयितुं पार्यते, स तादृशश्चन्द्रो नास्त्येव। यतस्तत्कर्तुमीश इति हेतोः स्फुटमिति विशेषण-मतीव सजीवम्। विप्रकर्षस्थितानां तज्जातीयानामपि बहुजातीयानां भगवति विवस्वति पश्यति, तेभ्यः स्फुटत्वं विश्लेषयितुं न चन्द्रः समर्थः, किं पुनस्तयोस्तथा लब्धप्रतिष्ठयोस्तत्कुलस्वामिनोरिति।

जवनैर्गवद्भिरश्वैर्गमनशीलम्। यदि हि सूर्यस्याश्वा अबाधिका न स्युस्ततस्तथाऽ-
-नन्तपथं कथं प्रहरचतुष्टयपरिमितकालेन सोऽतिक्रामेदिति ॥६५॥

चलन्नलङ्कृत्य महारयं हयं स वाहवाहोचितवेषपेशलः।
प्रमोदनिष्पन्दतराक्षिपक्ष्मभिर्व्यलोकि लोकैर्नगरालयैर्नलः ॥६६॥

वाहवाहस्याश्ववारस्योचितेनार्हेण वेषेण यथोचितसितकञ्चुकनेत्रपटोष्णीषाद्याकल्पेन पेशलश्चारुमूर्तिर्महारयं जितमनःपवनवेगं पूर्वोक्तं वाजिराजमलङ्कृत्य चलन् सन् स नलः हर्षप्रकर्षस्थिरतरनयनलोमभिः सद्भिः पुरवासिभिः समस्तैः सबालवृद्धैर्जनैर्यथासम्भवमेकदृष्ट्या दृष्टः। तदानीं भूषणभूष्यभावस्तयोर्यद्यपि साधारणोऽस्ति, तथापि स्वामिन एवोत्कर्षो युक्तः। तादृशमश्वं तादृश-श्चेदधितिष्ठति, तदा तस्य गुणसामग्री कृतार्था स्यान्न चेदकृतार्थैव। अर्थालङ्कृतिर्जातिरत्रोत्तरत्र च। शब्दालङ्कृतिस्त्वनुप्रासः। अक्षियुक्तानि पक्ष्माण्यक्षि-पक्ष्माणीत्यक्ष्णां पक्ष्माणां [२८.a] च प्रमोदनिष्पन्दतरत्वम् ॥६६॥

क्षणादथैष क्षणदापतिप्रभः प्रभञ्जनाध्येयजवेन वाजिना।
सहैव ताभिर्जनदृष्टिवृष्टिभिर्बहिः पुरोऽभूत् पुरुहूतपौरुषः ॥६७॥

अनन्तरमसौ नलः शुक्लनेपथ्यवत्वात् तदानीं विशेषेण चन्द्रकान्तिः पवनपदनार्हवेगेन तुरगेण ताभिः पूर्वोक्ताभिर्जनदृष्टीनां वृष्टिभिः सहैव क्षणाच्छोटवादमात्रेणैव पुरो नगर्याः बहिःप्रदेशस्थः संपन्नः। पुरुहूतस्यैव पौरुषं यस्य स तादृश इति तदानीं तस्येन्द्रवद् दृश्यमानत्वात् ॥६७॥

ततः प्रतीच्छ प्रसरेति भाषिणी परस्परोल्लासितशल्यपल्लवे।
मृषामृधे सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥६८॥

अनन्तरं समपरिसरभूमागलाभेन[1] तत्रस्थैव नासीरगतेऽग्रयानस्थे न त्ववका-
-शाद्यभावात् दूरस्थे विप्रकीर्णे सादिबले अश्ववारसंबन्धिन्यौ द्वे आरेचने कौतुके-
-नैव मृषामृधं मृषासंग्रामं चक्रतुः। किं विशिष्टे परस्परमन्योन्यस्योपर्युल्लासिते
चारुप्रकम्पनपूर्वं प्रदर्शिते[2] शल्यपल्लवे[3] तनुकुन्तजिह्वाग्रैकाभ्यामेवंरूपे सती(ति)
प्रतीच्छ स्वीकुरु प्रसर याहि याहीत्यधिकवीप्सापूर्वं भाषणशीले[4] सकल-
-कविकुलावलिशिरोरत्नम्। अत्रेयं जातिरलङ्कृतिः ॥६८॥

अश्वानां साम्योत्थापनिकामाह –

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम्।
इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुद्धतं रजः ॥६९॥

इयं धरा समुद्रावच्छिन्ना भूमिरस्माकं प्रयातुं धावितुं कियत्पदं कियत्स्थानम्। अपि तु न कियदपि। अतिस्तोकमित्यर्थः। तत् तस्मात्। अम्भोधिर्जलराशिरपि स्थलायतां स्थलवदाचरताम्। इतीवास्मात् कारणादिव निजवेगेन दर्पितैर्वाहैः पयोधिरोधक्षममुदन्वत् पिधानशक्तं रज उद्धतं रेणुरुत्थापितः[5]। अश्वका अपि वराश्वगुल्ममध्यवर्तिनः स्फुटित्वा प्रवाहधारारूपेण तं धावन्तमनु यथाकथंचिदपरसाम्येन धावन्त्येव। अतोऽत्र महद्रज उत्थानम् ॥६९॥

इदानीमुत्फाला[6]ख्यामश्वगतिमाह –

हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः।
त्रपा हरीणामिति नम्रिताननैर्न्यवर्ति तैरर्धनभःकृतक्रमैः ॥७०॥

---

1. B1, D. –लोभेन.
2. B2. प्रदर्शिता.
3. B1. सल्य–.
4. B1. भाषाण–
5. B1. उत्थित:
6. B2. –क्षाम.

यत्स्वं[1] नभः पूर्वं हरेरेकस्यैव विक्लैककेनैकाकिनैव पदा चरणेन क्रान्तम्। सोऽस्माकं बहूनां हरीणां चतुर्भिः पदैः कृत्वा तस्य क्रमणे[2] लङ्घनेऽपि सति, त्रपा लज्जेति साभिप्रायकाकुविशेषाद् भवत्यादिक्रियानिरपेक्षं वाक्यमिदं लोकोक्तेरेवायमनुकारोऽत्र इतीव कारणात् नमितानननैर्नम्रीकृतमुखैरर्धं नभसि कृतः क्रम उत्फालो यैर-[२८.६] -वंभूतैर्निर्वृत्तम्। अन्यत्राप्येकेन समाननाम्ना स्वल्पेकेनैव हस्तेन यत् कर्मकृतं भवेत्, तद् बहवः समाननामानो हस्तद्वयेन यद्यपि कुर्वन्ति तथापि[3] तेषां लज्जैव। हरिशब्दस्य शब्दकृतनाममात्रसाम्यादियमुक्तिः। तत्त्वतस्तु हरेरित्यत्र हरिशब्देन त्रिविक्रमनाम्नो हरेश्चरित्रमुक्तम्। हरीणामित्यत्र तु वाजिनां नाम। एतद् बलिच्छलनाख्यमाख्यानं प्रसिद्धमेव। पदेत्यत्र पच्छब्दात् तृतीयैकवचनम्। नमितानननत्वं गाढवल्गांचनवशात्। चतुर्भिरित्यत्र वीप्सा गम्या[4] ॥७०॥

उद्यानयात्राप्रवृत्तनृपाश्वसैन्यस्य आलिकममन्यदप्याह –

चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयेव सैन्धवाः।

विहारदेशं तमवाप्य मण्डलीमकारयन् भूरि तुरङ्गमानपि ॥७१॥

विविधदेशागतजनसेव्यस्य तस्य नृपस्य सैन्धवाः सिन्धुदेशोद्भवाश्चमूचराः सैन्यमध्यगाः सादिनोऽश्ववारास्तं तादृशं रमणीयं विहारदेशं पुरपरिसरभूभागं प्राप्य तुरङ्गमानपि[5] मण्डलीं मण्डलरूपां रचनां भूरि प्रचुरं यथा स्यादेवमकारयन्। स्वेन कुर्वन्तस्तानप्यकारयन्नित्यपि शब्दार्थः। कयेव। श्राद्धतयेव। श्रद्धा विद्यते यस्यासौ श्राद्धस्तस्य भावः श्राद्धता, श्राद्धत्वं[6], तयेव।

---

1. B. यन्नभः
2. B2. क्रमेण.
3. B2. तथा.
4. B1. ज्ञेया.
5. B1. तुरङ्गानपि.
6. B1. श्रद्धा –

कासु? जिनोक्तिषु जिनभाषितेषु। यथा तत्प्रणीतागमश्रुतेष्वर्हद्वाक्येषु विषये या
आहूता, तया कृत्वा तुरङ्गमानप्युत्तालनमण्डलीं तण्डुलगोधूमादिमयीं तद्दर्शनप्रसिद्धां
भूरि बहु यथा स्यादेवं कारयन्ति। अर्थात् सैन्धवा एव। ते किल श्रावका भवन्ति।
किं कृत्वेत्याह। तं तादृशमपूर्वविरचनमगुरुधूपादिवासितं विहारदेशं जिनालयप्राङ्गण-
-भूभागमवाप्य। श्रावकाः किल जिनालयमासाद्य न चेत् सर्वकालं, तर्हि चतुर्दशी-
-पञ्चम्यादिष्वपि तिथिषु तत्र चत्वारादिषु यथा प्रदेशावकाशप्राप्ति तण्डुलादिसप्त-
-धान्यमयीर्मण्डलीः कुर्वन्ति। जिनेन स्वयमासां प्रभावः खलु महाफलः कीर्तितो-
-ऽस्ति। प्रसङ्गतश्च तं देशमुपगतैरिदं धर्मकर्मानिवर्त्य न गन्तव्यमिति कारयन्ति।
यथा भद्रदर्शने त्वरावतापि नदीं[1] प्राप्याननुष्ठितदेवपितृतर्पणादिना कथमपि न गन्त-
-व्यमिति कथितमस्ति। तथा जिनदर्शनेऽपि विहारदेशमवाप्य कृतमण्डलीपूजादिकर्मणा
श्रावकेणेति। विहारः कुमारक्रीडार्हः समो भूभागः, पक्षे जिनालयः। मण्डली मण्डलाकारा
तुरङ्गमाणां रचना, मण्डलरूपा गतिर्वा। पक्षे मण्डली जिनदर्शनप्रसिद्धा। तुरङ्गमा[2] स्फीत
एवाश्वाः। पक्षे त्वरागमना तुरङ्गमा उत्तालगतयः। अथवाऽन्यथैव यथा जिनोक्तिषु
आहूतयैव[3] तं नाममात्रेणापि विहारदेश-[27.a]-मवाप्य नाममात्रेणापि मण्डलीः
तुरङ्गमानपि तिरश्चोऽपि। आभासमात्रेणापि किलेदं कर्म विहितं महते फलाय भवति।
सम्यगनुष्ठितं तु किमुच्यते। अत्र पक्षे त्वियमुत्प्रेक्षा। केचित् तु सैन्धवान्नामत[4] एव
श्रावकानाहुः। तदा त्वेवं व्याख्या। तस्य चमूचराः सादिनस्तं विहारदेशमवाप्य तुरङ्ग-
-मानपि मण्डलीमकारयन्। सैन्धवा जिनोक्तिषु आहूतयैवेत्यादि। अन्यथापि
युक्तिरत्रावतारणीया। परागमव्यवहारमहं न यथावद्वैमि ॥९१॥

---

1. B1. नन्दी. 2. B2. तुरङ्गमादि. 3. B1. –तयैव. 4. B1, –नामत

इदानीं तस्या एव सौष्ठवमाह—

द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम्।
इतीव धारामवधीर्य मण्डलीक्रियाश्रियाऽमण्डि तुरङ्गमैः स्थली ॥७२॥

अश्वैर्धारां वेगवतीं गतिमवगणय्य मण्डलीरचना चारुतया कृत्वा इतीवास्माद्धि कारणात् स्थली परिसरभूमिर्भूषितेत्युत्प्रेक्षा। इति कथमित्याह। अस्माभिरेवं धावद्भिस्तावद् दिशो विलङ्घ्यास्तदस्तु। अस्य[1] द्विषद्भिरेव भयात् विशेषेण दिशो लङ्घिताः। ते च वराका निःसत्त्वा भीरवः। तैरपि यत्कर्म कृतं तस्य करणे किमियास्माकं महत्त्वम्। तर्हि भवन्तो हनूमद्वदब्धिमुल्लङ्घयन्तु। यथा तस्यैव भवतामपि चन्द्रार्कस्थायिनी कीर्तिर्भवितीत्याह। तत्रापि पर्याप्तम्। यतो-ऽस्य यशोभिरेव कारणबाहुल्याद् बाहुल्यप्राप्तैरब्धिर्गोष्पदमकारि[2]। भूमिष्ठजल-भृतगोखुर[3]प्रतिकृति[4]वत् सहेलमुल्लङ्घ्य[5] पृष्ठदेशोत्क्षिप्त[6] इत्यर्थः। यदि हि किमप्यनन्यसाध्यं कर्म साध्यते, तदैव प्रशंसा। द्विषतां दवीयोदेशागमनं, यशसां परितः प्रसारित्वं[7], तुरङ्गाणां च प्रवीणत्वमनया भङ्ग्या त्रयमेतत् पूज्यपादाः श्रीहर्षमिश्रा एव वर्णयितुमीशते ॥७२॥

'इयं वरयात्रा वर्णिता वरः किमिति न वर्णितः' इति मनसि कृत्वाऽऽह—

अचीकरच्चारु हयेन या भ्रमीर्निजातपत्रस्य तलस्थले नलः।
मरुत्किमद्यापि न ताः सुशिक्षते वितत्य वात्यामयचक्रचंक्रमान् ॥७३॥

पूर्वोक्ताया स्तुरङ्गमण्डल्या मध्ये नलो राजा निजछत्रस्याधोदेशे चारु सुष्ठु यथा स्यादेवं हयेन प्रयोज्येन कर्त्रा यका भ्रमीभ्रमरिकाख्या अचीकरत् कारयामास।

---

1. B2. अथ. 3. B2. गोरचुर. 5. B2. —लङ्घ्य. 7. B1. प्रसौरित्वं.

2. B2. बाहुल्यं प्राप्तिः 4. B1. —प्रकुति— 6. B2. देशे क्षिप्त.

मरुत् वायुरधुनापि ता एव किं न सुशिक्षते गुणयति[1], जाने ता एव स्वभ्य-
-स्ताः करोति। किं कृत्वेत्याह। वात्यामयान् वातमण्डलीरूपान् चक्रचङ्क्रमान्
चक्राकारगतिविशेषान् प्रसार्य ग्रीष्मादौ श्मशानादिदेशे नूनमयमनेन संविधान-
-केनैवमेवं करोतीति भावः। गुणनात्पूर्वं गुरुशिष्यन्यायेन मलाध्याद् वातस्य
तदवसरनिवर्तितभ्रमीणामध्ययनमनुमीयते। अथो भ्रमरिकायां प्रवेशितो-[क्रि. 7]-
-ऽस्तीत्यस्याघकर्मणः[2] प्रशंसापूर्वको लोके व्यवहारः। अन्येऽप्यथाः संप्रसारमिमाः[3]
कुर्वन्ति। छत्रतले तु संकीर्णत्वादतीव दुष्करास्ताः। अत एव तत्कारणयाऽस्य[4]
[5]वात्यश्वस्य सूक्ष्मगतिप्रवेशान्महती प्रशंसा ॥७३॥

इदानीं प्रकृतमनुसरति -

विवेश गत्वा स विलासकाननं ततः क्षणात् क्षोणिपतिर्धृतीच्छया।
प्रवालरागच्छुरितं सुषुप्सया हरिर्घनच्छायमिवार्णसां निधिम् ॥७४॥

ततः स क्षोणिपतिर्नलः धृतेर्निर्वृतेरिच्छया क्षणात् कालकलामात्रेण गत्वा
विलासकाननं केलिवनं प्रविष्टः। कीदृशम्? प्रवालरागच्छुरितं घनच्छायं च।
को यथाक्रमं तद्विशेषणद्वयविशिष्टं प्रविशतीत्याह। सुषुप्सया स्वपितुमिच्छ-
-यार्णसां निधिं जलानां राशिं हरिरिवेति केलिवनस्यार्णोनिधेश्च शब्दमात्रेण
साम्यम्। अर्थतस्तु भेद एव। यथा केलिवनं तावत् प्रवालानां पल्लवानां
रागेण च्छुरितं कर्बुरितम्। द्वितीयं तु प्रवालानां विद्रुमाणां पूर्वं घना सान्द्रा
च्छाया बकुलप्रभृतीनामातपप्रत्यनीकिनी यत्र तत् तथा। अपरं घनानां मेघानां
च्छाया यत्रेति। मेघाः किल सर्वकालमुच्चैरुपरि[6] परतीरादौ भ्रमन्तो न विरमन्ति।

1. B1. गणयति. 3. B2. सप्रसर- 5. B1, B2, D. वात्या-
2. B1. -त्यग्या- D. -त्यस्या. B2. -त्यत्रा- 4. B1. -करणया-
6. B2. अर्धरुपरि.

तत एव चानीय क्षितौ किल जलमुद्वमन्ति। बिलासकाननमित्यत्रार्थान्तरश्लेषोऽपि यथा- बिलेष्वासते तिष्ठन्तीति बिलासका बिलेशय[1] सर्पास्तेषामेवाननं विवेश। तस्योद्दीपनस्य प्रवेशादस्य विरहिणो बिलेशयमुखप्रवेशफलानुभवात्[2]। सर्पमुखप्रवेशस्य दंशादिद्वारसंक्रान्तविषवशेन[3] प्रथमं फलं मूर्छा। तत्र चार्थं बहुकृत्यस्तां प्रपत्स्यते। [4]यस्या लोके लहरीति संज्ञा प्रसिद्धा। हरेर्भगवतः समुद्रान्तःशयनं प्रसिद्धमेव॥७४॥

वनान्तपर्यन्तमुपेत्य सस्पृहं क्रमेण तस्मिन्नवतीर्णदृक्पथे।

न्यवर्ति दृष्टिप्रकरैः पुरौकसामनुव्रजद्बन्धुसमाजबन्धुभिः॥७५॥

पुरवासिनां दृक्समूहैर्निवृत्तम्। किं कृत्वेत्याह। सस्पृहं स्पृहासहितं यथा स्यादेवं वनान्तपर्यन्तमुपेत्य। क्व सति निवृत्तमित्याह। तस्मिन्नले क्रमेणावतीर्ण-दृक्पथे। इतस्ततो गतिपूर्वमतिक्रान्तदर्शनमार्गे[5] सति यावद् दृष्टिः प्रसरति, ततो दूरमग्रे गते सति। अत एवानुव्रजतो बन्धुसमाजस्य स्वजनवर्गस्य बन्धुभिः सदृशैरित्यर्थः। बन्धुवर्गो हि कञ्चनप्रियं क्वापि यात्रादौ यान्तमनुव्रजन्[6] वनान्तपर्यन्तं सस्पृहमुपेत्य तस्मिन् क्रमेणावतीर्णदृक्पथे सति निवर्तत इति। वनशब्दस्य नाममात्रसाम्यादुपमानोपमेयभावः। अर्थतस्तु भेद एव। तथा हि नलपक्षे वनान्तस्योद्यानदेशस्य पर्यन्तं सीमानं प्रा-[१४.ब]-प्य। बन्धुवृन्दपक्षे तु वनमुदकं तस्यावसानम्। उभयत्राप्येक एव वा पूर्वोऽर्थः। अनुव्रजतां बन्धूनामप्युद्यानपर्यन्तं यावदनुगमनमाम्नातमस्ति। तथा च-

नदीतीरे गवां गोष्ठे क्षीरवृक्षे जलाशये।

आरामेषु च कूपाद्यादिष्टं बन्धुं विसर्जयेत्॥ इति।

---

1. B2. बिलासा बिलेशयाः
2. B2. -भवात्.
3. B2. -वेशेन.
4. B2. यस्य.
5. B2. -मात्रे.
6. B2. -व्रजतः

अत्र गोष्ठशब्देनैव तत् स्थाने लब्धे गोःशब्दोपादानं अत्र निधिपुलिपादनार्थम्। औपचारिक गोष्ठशब्दवाच्यमहिष्यादिशब्दनिषेधार्थं वा ॥७५॥

ततः प्रसूने च फले च मुञ्जुले स सम्मुखस्थाङ्गुलिना जनाधिपः।
निवेद्यमानं वनपालपाणिना व्यलोकयत् काननकामनीयकम् ॥७६॥

ततो नृपतिरुद्यानचारुत्वमपश्यत्। किं क्रियमाणमित्याह। मञ्जुले मनोज्ञे प्रसूने च फले च सम्मुखस्थाङ्गुलिना उभयोरपि [1]तयोरभिमुखतर्जनीकेनोद्यानरक्षकस्य हस्तेन निवेद्यमानमिति भावा[2]नयने द्रव्यानयनमिति न्यायात्। काननकामनीयकं काननमेव। अत्र च स्वामिन् स्वामि[3]न्नवधानमवधानमीदृक्कुसुमं कीदृग् रुचिरमस्ति, इदं फलमतीव मनोहरमित्यादि सविनय सम्भ्रमं यद्यप्युद्यानरक्षाणि युक्तेनैव निवेद्यमानमस्ति। तथापि क्रियातः पाणेरव्यवधानात् तस्य च व्यवधानाद् गौणमुख्यन्यायेन पाणेरेव कर्तृत्वम्। अङ्गुलिशब्देन यद्यपि पञ्चापि करशाखा अभिधीयन्ते, तथापि सामान्येन तर्जन्येव ॥७६॥

फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षि[4]वार्धकाद् वने तदातिथ्यमशिक्षि शाखिभिः ॥७७॥

शाखिभिर्वृक्षैस्तदातिथ्यं तद्योग्यं [5]सत्कारणं वने शिक्षितम्। कस्मात्? महर्षिवार्धकाद् वृद्धमहर्षिसंघात्। वृद्धा मुनयो वने वसन्ति। शाखिनस्तु सर्वकालं वनवासिन एव। अत एकत्रावस्थानादिदं घटते। यतः कीदृशैः? पल्लवे किसलय एव [6]करे फलानि पुष्पाणि चेति द्वयमप्येतत् समुपादाय स्थितैरवहितैः।

1. B1. om. hapl. तयोः.
2. B. -नयेन. B1. -नयनेन.
3. B. अवधामेव धाम.
4. B2. -वार्धिकाद्.
5. B2. सत्कारणे.
6. B. काले.

कीदृशे कर इत्याह । वयोतिपातोद्गतवातवेपिते । वयसो यौवनस्यातिपातोऽतिक्रमणं तस्मादुद्गतो योऽसौ वातस्तेन वेपिते कम्पिते । वृद्धत्वे हि प्रबलो वात उद्गच्छति तद्वशात् च करौ कम्पेते इति प्रसिद्धम् । राजानमतिथिमायान्तं श्रुत्वा तत् पूजार्थमीदृशे करे मुख्यतया फलानि तदुपरि च गौणभावेन पुष्पाणि सुष्ठु गृहीत्वा वृद्धाश्च एव तमागमयन्ति । सम्प्रति तथैवेते दृश्यन्ते । तस्मादेतैरेतत् तेभ्य एव शिक्षितमिति । वयोतिपातयोः शब्दयोश्छलेनार्थः । तत्त्वतस्तु वयसां पक्षिणामतिपातोऽधिकं पतनं तद्वशादुद्गतेन वातेन कम्पिते करसदृशे पल्लवे । वृक्षाश्च तथा सन्त्येव । वयसामतिपत-[ह्व?]-नं तु जनसंकुलात् शुकादीनां फलादिलोभाद् वाऽतिथ्यर्थं यत् तदातिथ्यम् । तस्य च विशेषाविशेषावतिथिपात्राधीनौ । अथ च शाखाः कठकौथुमाद्या वेदसम्बन्धिन्यो विद्यन्ते येषां ते शाखिनस्तैरिति ॥७७॥

उद्यानेषु किल कण्टकित्वाद् वृत्तिः केतकानां भवति । अतः प्रथमतस्तद्वर्णनम् । राजमन्दिरोद्यानादिषु च प्रवेशाद्दारभ्य द्वारदेशादिषु यद् यद् वीक्ष्यते, तत् तत् मनोहरमिति तत्र तत्रैव सविस्मयप्रसरा दृष्टिः संसजति —

विनिद्रपत्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम् ।
दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम् ॥७८॥

स कौतुकी प्रेक्षणकरूपस्य विचित्रपत्रपल्लवपुष्पफलादिदर्शिनो वनस्य दर्शनकौतुकेन प्रवृत्तत्वात् कौतुकवान् । केतकं केतकीकुसुममीदृशं ददर्श । नूनमीदृशमेवेदमिति ज्ञातवानित्यर्थः । ईदृशं कीदृशमित्याह । मृगाङ्कचूडामणिवर्जनार्जितं आशासु चरिष्णु दिक्षु भ्रमणशीलं दुर्यशो दधानम् । भगवता चन्द्रमौलिना किल तद् वर्जितमस्ति । कस्मादेतदेवं बिभृदित्याह । विनिद्राणां विकसितानां पत्राणामालिषु श्रेणिषु ये खल्वलयो भृङ्गास्तेषां कैतवात् ।

नैते प्रतिदिशगतागतमभ्यस्यन्तो दलद्रोणिश्रेणिमधिष्ठिताः खलु भृङ्गनिकुरम्बाः। किन्त्वेतदस्य मृगाङ्कचूडामणिवर्जनार्जितं दुर्यश एवेतादृशम्। पुरा किल भगवान् भवानीपतिः परमवासनया केतककुसुमं चन्द्रकलाऽलङ्कृतस्य निजशिरसः शिखायाः सख्यसौख्यं क्षणमपि न त्याजितवान्। कदापि चैतेन निजकर्मनियुक्तेन तत् किमप्यनृतभाषणपापमुपार्जितं यद्वशादिदमद्यापि तत् प्रसङ्गस्य कथापथमपि नावतरति। तत् चैतदेतदित्थम्। "पूर्वं ब्रह्मा च विष्णुश्च शम्भुमुपागतौ। तत्र च प्रीतियोगाद् बहुविधासु परस्परचरितवार्त्तासु प्रवर्तमानासु ब्रह्मविष्णुभ्यां शम्भुः पृष्टः। "कथ्यतां तत्रभवतोऽस्याकाशलिङ्गस्य बुध्नाग्रयोरवधिरधस्तादुपरिष्टात् च कुतो यावत्" इति। ततस्तेनोक्तम्-"एतयोरवधिर्नास्त्येव। यदि भवतो नैतदेतत् सम्भवतीति मनसि संशयस्ततस्तद् विनिश्चयाय स्वात्मनैव प्रयत्नः क्रियताम्" इति। अथोपरिष्टाद् ब्रह्माऽधस्ताद् विष्णुः परस्परानुमतेन द्वावपि तदर्थं प्रस्थितौ। अविश्रान्तं त्वरितं धावन्तावपि च यान्तौ बहुभिरपि वर्षशतैर्निजकर्मसिद्धेरङ्कुरोद्-गममप्यपश्यन्तौ खिन्नौ निर्विण्णौ विलक्षौ प्रत्यायातौ मन्त्रयाञ्चक्राते किमत्र विधीयतामिति। अथ कपटपटोर्विष्णोर्बुद्धिः प्रस्फुरिता। "केतकी सर्वकालं शम्भोःशिरः-शिखासंबन्धानुबन्धेन-[२१.a]-वोन्मोचयति। तत्त्वया सह गत्वा ब्रह्मंस्तामहम-नुरात्स्ये। ब्रह्मणस्तव शिरोऽग्रदर्शनसाक्षिणी भगवन्नहमस्मीति शम्भोः पुरो गत्वा सप्रतिज्ञं विज्ञपय" इति। ततस्तेन तथाऽनुष्ठिते, सा तदुपदिष्टमदृष्टमपि दृष्टमिति पुनः पुनरुवाच वाचाला। अथ भगवता सर्वदर्शिना तेन "धिग् धिग-नृतवादिनि पापिनि, त्वरितमितः सुदूरी भव" इति बहु निर्भर्त्स्य स्वबन्ध-स्पर्शं त्याजिता। यथा नाद्यापि कस्यापि देवस्य पूजनीयाऽऽर्हा विशेषतः शम्भोरिति वियोगिनः सर्वेऽपि विपरीतदृष्टयो भवन्तीत्यन्यायमेवमूहाञ्चक्रे॥७८॥

शम्भुश्च विरहदुःखानुभावित्वाद्[1] विरहिणां स्ववर्गीय इति तत्प्रशंसास्य तद् दर्शनानन्तरं किमर्थं कृतवानित्याह -

वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत्।
ततो दुराकर्षतया तदन्तकृद् विगीयसे मन्मथदेहदाहिना ॥७९॥

त्वदग्रसूच्यासचिवेन कामिनोर्मनोभवः सीव्यति दुर्यशःपटौ।
स्फुटं च पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायते ॥८०॥

धनुर्मधुःस्विन्नकरोऽपि भीमजा- परं परागैस्तव धूलिहस्तयन्।
प्रसूनधन्वा शरसात्करोति मामिति क्रुधाक्रुश्यत तेन केतकम् ॥८१॥

तेन नलेन केतकं केतककुसुमं क्रुधा क्रोधवशादित्येवमाक्रुश्यत कृष्टम्। इति कथमिति प्रथमश्लोकस्त एव प्रकरणवशात् प्रत्यक्षवस्तुसंबन्धो[2] न पुरःसरं तदुत्तरं यथा हि केतक। मन्मथदेहदाहिना भगवताऽनङ्गभङ्गकृता तत एव हेतोस्त्वं विगीयसे, विनिन्द्यसे[3]। ततः कुतः इत्याह। यत् कारणात् स्मरेण कर्णिशरस्त्वं निधीयसे रोप्यसे। क्व? वियोगभाजां विरहिणां हृदि। अपरैः कौसुमैः शरैर्यदाऽयमेतान् दुर्जेयान् मन्यते, तदाऽन्त्यदेशोचितं परमास्त्रं त्वामेव स्मरः[4] स्मरतीत्यर्थः। कर्णौ कर्णाकृतिसंस्थान-[5] -विशेषौ विद्येते यस्य स कर्णी, स चासौ शरः। कीदृशः? कण्टकैः कृत्वा कटुरुद्धरण- -कालेऽतिव्यथाप्रदः। पुनः कीदृशः? दुराकर्षतया कृत्वा तेषां वियोगभाजामन्तकृन्मरण-[6] -कारकः, दुःखेन महताकष्टेनाकृष्यते[7], निष्कास्यते[8]। दुराकर्षस्तस्य भावस्तत्ता तया। केतकपत्राणि कर्णाकृतिबहुकण्टकोपलक्षितानि भवन्त्यतिमनोहराणि च। अतस्तद्दर्शनात् समुद्दीपितमन्मथाः पान्थाः परे वा विरहिणो म्रियन्त एवेतीयमुक्तिः ॥७९॥

---

1. B1. -भवित्वाद्.
2. B2. संबोधन.
3. B2. न विधसे.
4. B1. om. hapl. स्मरः
5. B2. -विसंस्थान-
6. B. मरणस्य.
7. B2. -कृशते.
8. B2. निःकाम्पत्ते.

किञ्च तवाग्रमेव सूची तयैव सचिवेन सहायेन मनोभवः स्मरः कामिनो व्यसनिनोरेकैकावरणक्षमौ द्वौ दुर्यशो रूपौ पटौ प्रच्छादनपटाख्यौ सीव्यति, योजयति। कामो विद्यते ययोस्तौ कामिनी च कामी च कामिनौ तयोः। तदा तयोर्भूम्ना कामस्य विद्यमान-[२१.६]-त्वात् मत्वर्थीयोऽतिसार्थकः। तौ खलु तदुद्दीपित-मनोभवाग्नेरुपशमनाय मिथः संवृत्तपरस्पराङ्गसङ्गसुखं पीयूषवर्षपरिषेकमाकाङ्क्षन्तावनेन निजाग्रसूचितं सम्पत्तिस्थूलस्य रहोपनतस्य दुर्यशःपटद्वयस्यापि आवरणमुररीकुर्वाते मरणमपि न परमेतदेव करोति। वियोगिनां हृद् हृदयमेव वियोगभाराऽस्फुटनानुमिता-ऽतिसारभावं दारु शुष्कं काष्ठं तत्र दारुणायते च। दारयन् दारुणवदाचरति। कैः कृत्वा? स्फुटं प्रकटमेव करपत्रमूर्तिभिः क्रकचरूपैः पत्रैः, तानि तस्य साक्षात् तदाकृतीनि स्युः, तद् दर्शनेन विरहिणामुक्तकार्यफलावाप्तेरियमुक्तिः ॥८०॥

अन्यत् च धनुर्मधुजा कृत्वा स्विन्नकरोऽपि धर्मिलहस्तोऽपि तव परागे-भवतो रजोभिर्धूलिहस्तयन् धूलिलिप्तं हस्तं कुर्वन् प्रसूनधन्वा पुष्पचापः स खलु भीमजापरं दमयन्तीगतचित्तं मां शरसात्करोति, बाणाधीनं विदधाति। प्रसूनं सामान्यं कुसुमं धनुर्यस्य स प्रसूनधन्वा इति यौगिकनामबलाद् धनु-र्मधुभिरस्य लेपात् स्विन्नकरत्वमुपपन्नम्। प्रसूनेषु सर्वेषु मध्वस्त्येव। केतके च मध्यमञ्जर्यां गुच्छरूपोऽस्तीव भूयस्तया परागधूलिर्भवतीति विशिष्य तद् वर्णनम्। धूलिलिप्तं हस्तं करोति, धूलिहस्तयतीति मध्यमपदलोपी समासः। धूलिलिप्तो हस्तोऽत्र वाम एव कर्तुं योग्यस्तस्यैव धनुर्मधुभिः स्विन्नत्वस्य सम्भवात् [2]स्विन्नस्य हस्तस्य मुष्टिर्धनुषि गाढो न भवति। वामेतरेऽपि हस्ते पुष्पधनुःस्पर्शात् तन्मधुलेपः सम्भवत्यतस्तस्यापि धूलिलिप्तकरणम्।

---

1. Bl. मरणमेव न परमेतदपि. 2. B2. om. स्विन्नस्य ..... करणम्।

इति क्षुधाकुश्यत तेन केतकमित्यनेनाभिसंबन्धः विरहिणामस्मादुक्तफलावाप्तेरियमुक्तिः।
इति यथायुक्ति विभज्य केतकावयववर्णनम्। त्रिभिर्विशेषकम् ॥८१॥

अथाग्राग्रगतिवशदृष्टिविशिष्यालिविशिष्टवनसम्पदं क्रमेण वर्णयन्नाह—

विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः।
फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहदधूपिनि[1] द्रुमे ॥८२॥

दोहदस्य फलपक्तिवाञ्छादाह धूपनं फलपक्तये कृतः धूपो विद्यते यस्य स दोहदधूपी, तस्मिंस्तदुचित स्पृहार्हे भूयो धूपाढ्ये दाडिमे द्रुम इति महाप्रमाणे दाडिमे वर्तमानानि फलानि अलमतिशयेन तपस्यतस्तपः कुर्वतो घटान् कुम्भानिव स नलोऽपश्यत्। नूनमेते घटा एवैवं तपस्यन्तीत्युत्प्रेक्षितवानित्यर्थः। कीदृशान्? अधोमुखान् धूमस्य धयान्। अधोमुखीभूय धूमं पिबत इत्यर्थः। एतत् च महत् तपः। दाडिमफलानि च प्रत्यक्षतयैव तादृशानि एते किमर्थमेवंभूता दुश्चरं तपश्चरन्तीत्याह। विदर्भसुभ्रूरर्थाद् दमयन्ती तस्याः [30.a] स्तनयोर्या तुङ्गता तस्या आप्तये तयो-र्ह्यतीव तुङ्गता एतेषु तु सा नास्तीति तल्लाभाय। अन्येऽपि केचिद् दैवशक्त्यादि-प्राप्तये भृशमेवं तपस्यन्ति। वनवर्णनप्रसक्तचित्तेन तेन सा विस्मृतैव स्यात् तद् विस्मृतौ विरहित्वविस्मृतौ च प्रकृतो विप्रलम्भाख्यः शृङ्गारः। किञ्चिदन्तः स्यादित्यनेन वर्णनव्याजेन दमयन्तीवर्णनादस्य तदेकाग्रध्यानसूचनम्। "दाडिम इत्यस्मादेव द्रुमत्व-मायातम्" इति चेत् तन्न। दाडिमादीनां प्रायेण बृहद्विटप[2]संस्थानेनैव दृश्यमानत्वात्। अयं तु सेकादिवशेन द्रुमत्वं प्राप्तोऽस्तीति तस्य द्रुमत्वप्रतिपादनेन विटपित्वं व्यवच्छिन्नम्। कारणानुरूपं कार्यं भवतीति दाडिमस्य महत्त्वात् तत्फलानां महत्त्वमायातम् ॥८२॥

---

1. B2. om. hapl. दोहद- ------- दाडिमे. 2. B1. -विपद-

वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम्।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम् ॥८३॥

असौ नलो दाडिमीं विशेषणद्वयसूचितधर्मद्वययुक्तां वियोगिनीमैक्षत। नूनमियं विरहिण्येवेति साकूतकाकुपूर्वं दृष्टवान्। प्रियस्मरणवशादुदीतकण्टकामुद्गतरोमहर्षां न तु स्वभावादस्याः कण्टकसंबन्ध इति। तथा फलान्येव स्तनौ। तदेव स्थानं प्रदेशविभागस्तत्र विदीर्णं पाटितं[1] रागि लौहित्ययुक्तं यद् हृदयं तत्र विशन्ति, संचरन्ति, शुकास्यानि कीरमुखान्येव स्मरस्य किंशुकाशुगाः पलाशपुष्पशरा यस्यां सा तथा ताम्। स्मरो हि स्वरुच्या यथासम्भवं कदापि किंशुकान्याशुगीकरोति। कदापि चेतरकुसुमानि। इयं दाडिमी विरहिणी प्रियस्मरणात्, चास्याः प्रतिपादितधर्माभ्यां योग इति तस्य भ्रान्तं[2] ज्ञानमभूदिति भावः। हृदयं कदापि स्तनदेशे विदीर्यते, कदाप्युपरिष्टात्, कदाप्यधस्तात्, प्रायेण मध्य एव। यथा भित्त्यादि। दाडिमीफलानि च परिपाकवशाद् विदीर्यन्ते। तन्मध्यं च लोहितं भवति। तत्र च बीजग्रहणाय शुका मुखानि प्रवेशयन्ति। तानि च किंशुकसदृशानि भवन्त्येव। दाडिमी कण्टकवती प्रकृत्येव। अथ च वयःप्रतिपादितयुक्तिबलात् पक्षिणो मुख्यतया शुका एव। तेषां योगः संबन्धो यस्याः सा तथा तां तादृशीं तत्त्वत एव ॥८३॥

स्मरार्धचन्द्रेषुनिभे क्रशीयसां स्फुटं पलाशेऽध्वजुषां पलाशनात्।
स वृन्तमालोकत खण्डमन्वितं वियोगिहृत्खण्डिनि कालखण्डजम् ॥८४॥

स नलः स्मरार्धचन्द्रेषुनिभे स्फुटमवश्यं क्रशीयसां दुर्बलानामध्वजुषां पलस्याशनात् पलाशे वियोगिहृत्खण्डिनि वृन्तं बन्धनमन्वितं लग्नं कालखण्डस्य यकृतः खण्डं शकलमालोकत। नूनमेवमस्मिन्नेतादृशो वृन्त-[३०.७]-रूपं कालखण्डस्य खण्डलग्नमस्तीति।

1. Br. पाटितराग.  2. Br. निर्भ्रान्तं.

तत्त्वदृष्ट्यैव दृष्टवान्। इदं स्मरार्धचन्द्रबाणसदृशं यद् दृश्यते, तदिदं पुरं दुर्बलानां पान्थानां पलस्याशनात् पलाशम्। प्रत्यक्षत एव वियोगिनां हृदयस्य खण्डनशीलमस्मिन्निदं मूले लग्नं यत् किमपि दृश्यते, तत् कालखण्डस्य खण्डमेवेति स सम्भावितवानिति भावः। कृशिम्नानुमीयते नूनमेतेषां मासं केनापि भक्षितम्। तत एवेदं कृशत्वम्। तस्योक्तविशेषणधर्मयोगादनेनैव भक्षितमिति निश्चीयते। केचित् तु 'पलाश' इति पदं द्विरावर्त्य व्याकुर्वते। पलाशे पलाशपुष्पे स्फुरमध्यभुवां पलाशनात्। पलाशे न तु रुचितो युक्त्यन्तरेण वेति। स चार्थो विचार्यमाणः पूर्वार्थ एव समवैति ॥८४॥

नवा लता गन्धवहेन चुम्बिता करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला दरादराभ्यां दरकम्पिनी पपे ॥८५॥

नवा नूतना वल्ली गन्धवहेन मारुता चुम्बिता, स्पृष्टा। अत एव मकरन्दशीकरैर्मधुत्रसरेणुभिः करम्बिताङ्गी मिश्रिततनुः तैः सहितेत्यर्थः। स्मितेन स्तोकस्फुटनेन शोभि[1]कुड्मला किञ्चित् चारुमुकुला दरकम्पिनी मनाक्[2]कम्पा नृपेण नलेन दरादराभ्यां भययत्नाभ्यां दृशा कृत्वा पपे, पीता दृष्टेत्यर्थः। अस्याः सारदर्शनानन्तरमस्यै[3]तद् द्वयमपि सममेव जातमित्यर्थः। समुद्दीपनाद् भयं मनोहरत्वादस्यास्त्वस्यादरः। लतया विशेषणत्रययोगोऽयं गन्धवहसङ्गादेव। अथ चार्थान्तरम्। लतेव[4] लतावद् वल्लीसदृशी काऽपि कृशाङ्गी गन्धवहेन यक्षकर्दमादिसौरभ[5]भरधारिणा तद्विसारिणा वा केनापि भोगिना तरुणेन चुम्बिता, शब्दपूर्वमुख्यसंयोगं प्रापिता।

1. B1. शोभित-
2. B1. -कथा.
3. B2. अस्यैव.
4. B1. अलतेव.
5. B2. सौरभनर-

अत एव मकरन्दशीकरैरर्थात् स्वेदजलकणैः तत्पुहरणीकृतकुसुममधुत्रसरेणुभिरेव वा संकीर्णीकृतदेहा मनाग्वेपिनी नृपेण केनापि धर्मज्ञेन राज्ञा दरादराभ्यां पपे। पापाद् विसदृशाचारवीक्षक[1]लोकलज्जावशाद् वा भयं, रमणीयसंविधानकात् चादरः नृपेण नलेनैव वा। लतागन्धवहयोर्नायिकानायकभ्रान्त्या सैवं दृष्टा। एवंस्थितस्य पुंसः पुंसा नु किं दृश्यते। पुंसस्तु नार्या दृश्यते। कलविंकादिमिथुनमपि सुरतासक्तं स्त्रीपुंसाभ्यां यथा दृश्यते तथा सर्वेषामनुभवसिद्धमेव। अत्रपक्षे स्मितशोभिकुड्मलेति मुख्यवृत्त्या स्मितं मुखस्यैव। तद् वशात् च कुड्मलत्वमपि तस्यैव। तच्च[2] चुम्बनवशात् तादृशं प्रसिद्धमेव। प्रेयसश्चुम्बनात् च प्रेयस्याः सात्त्विका भावा भवन्त्येव। मकरन्दः पुष्परसः। स चार्थाद्योषितो यत् पु[3]-[31.a]-ष्पं मृदुसंज्ञया प्रसिद्धं, तस्य दैत्यगुरुनामधेयः सप्तमो देहधातुस्तस्य शीकरैरित्यप्यस्मिन् संविधाने घटते। नायिकापक्षे नवा लता नूतना तरुशाखेति समीचीनोऽर्थः स्यात्। लोकेऽपि प्रशंसार्थं योषितस्तस्या एवोपमानीय[4]क्रियमाणाया दृश्यमानत्वात्। प्रथमपक्षेऽपीयमेव वा ॥८५॥

विचिन्वतीः पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात्।

व्यलोकयच्चम्पककोरकावलीः स शम्बरारेर्बलिदीपिका इव ॥८६॥

स नलश्चम्पककोरकाणामावलीः पङ्क्तीः शम्बरारेः स्मरस्य बलिदीपिका पूजार्हप्रद्योतिका इव व्यलोकयत्। तद् वदुत्प्रेक्षितवानित्यर्थः। किं विशेषण-विशिष्टास्ता इत्याह[5]। पान्था एव पतङ्गाः शलभाः[6] सपक्षाः क्षुद्रजन्तवः एव वा, तेषां हिंसनैरपुण्यकर्माणि पापचरितानि विचिन्वतीरर्जयन्तीः। कस्मात्?

---

1. B2. -वीक्षिक-
2. B1. तच्चुम्बन-
3. D. पुष्पमृतु.
4. B2. om. -य-
5. B1. इत्यत आह.
6. B2. सरभाः

अलय एव कज्जलं, तस्य च्छलान्मिषात्। अग्नेते भृङ्गा इतस्ततः सङ्गान्नूनमेतन्मूर्तं पापकर्मनिकुरुम्बमेव। अन्यास्तु देवान्तरपूजादीपिकाः सामान्यान् प्रसिद्धान् पतङ्गान् हिंसन्ति। सामान्यं प्रसिद्धं कज्जलं च विचिन्वन्ति। पतङ्गहिंसनं च तासां बहुविधम्। केचित् तासां दीप्यमानासु वर्तिषु पतन्ति। केचिन्मल्लिकातैल[1]मध्ये, केचिद् दीप्तवर्तिसंपर्काद् दग्धपक्षा दूरतः पतित्वा म्रियन्ते इति पतङ्गहिंसनैरिति बहु-वचनम्। एवं चासामस्य कामदेवस्य नलेन सम्भाविताना[2]ं वल्लिदीपिकानां बहुधा पान्थपतङ्गहिंसनं ज्ञेयम्। हिंसनादपूर्वनामनरकादिहेतुः कर्मोत्पद्यते॥८६॥

अमन्यतासौ कुसुमेषु गर्भगं परागमन्धंकरणं वियोगिनाम्।
स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु सङ्गतम्॥८७॥

वियोगिनामन्धंकरणं दृष्टिशक्तिनाशकं कुसुमेषु विषये गर्भगं मध्यस्थं परागं रजः स्मरेण पुरा पूर्वं पुरारये भगवते पिनाकपाणये ये मुक्ताः प्रहिताः शराः, तेषु सङ्गतं लग्नं तस्य पुरारेरङ्गस्य देहस्य भस्मेवामन्यत, उत्प्रेक्षां चक्रे। पूर्वं स्मरेण गिरारये ये शरा मुक्तास्त एवेमानि[3] पुष्पाणि, एतदन्तर्गतं यदेतत् संबन्धि रजस्तत् तस्याङ्गे लग्नं यद् भस्म तदेवेदमित्ययमभ्यूहं चक्र इति भावः। भगवतः शम्भोर्भस्मसंबन्धस्तु[4] प्रसिद्ध एव॥८७॥

पिकाद् वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणे वियोगिनाम्।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः॥८८॥

नलः स्थलपद्मिनीमनास्थया सूनकरप्रसारिणीं दूनः सन् ददर्श। नूनमियं स्थलजा पद्मिनी प्रथमजातिर्नायिका। सा चानास्थया सूनरूपं[5] कर प्रसारयतीति दूनः सन् दृष्टवान्।

---

1. B2. om. -तैल-
2. B1. सम्भावितां.
3. B1. एवैतानि.
4. B1. संबन्धः सुप्रसिद्धः
5. B1. & D. om. कर.

कमल-[अ६]-सदृशपाणिर्या खलु स्थलजा, स्थले वर्तमाना वा पद्मिनी नायिका तस्या निष्करुणतया एवं कर्तुं न युक्तमिति विमृशन् परितप्यमानस्तामीक्षामासेत्यर्थः। क्व सत्यनास्थया सूनकरप्रसारिणीमित्याह। उदञ्चत्करुणे समुत्पद्यमानबहुकृपे वने भृङ्गाणां हुङ्कृतैर्गुञ्जितरूपैरनुमतहुङ्कारैः कृत्वा पिकात्सकाशात् वियोगिनां दृशां मरणा-धवस्थां शृण्वति सति, अनास्थाऽनादरः, ईदृशोऽयमनित्यः संसारस्तदत्र किं शोच्य-मित्यनास्थावचनपूर्वं प्रसूतकुसुमकरसंज्ञां कुर्वतीमित्यर्थः। तत्त्वतस्तु उदञ्चतः उदयन्तः करुणाख्या वृक्षा यत्र पद्मिनी कमललतैव। सूनं पुष्पं करसदृशम्। सूनं प्रसूनमित्यादिव्यवहारस्तु मेरुसुमेरुवदन्तावयवेनैवावयविनः प्रतीतेः। आद्या-वयवेनापि भीम इत्यनेन यथा भीमसेनस्य। करसंज्ञा त्वभिनयदर्शनगम्या ॥८८॥

रसालशालः समदृश्यताऽमुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम् ॥८९॥

अमुना नलेन रसालशालश्चूतवृक्षः स्फुरद्द्विरेफारवरोषहुङ्कृतिः सन् समीर-लोलैर्मुकुलैः कृत्वा वियोगिने जनाय विरहिलोकाय तर्जनाभियं तर्जनीभर्त्सन-भीतिं दातुमिच्छन्निव संदृष्ट उत्प्रेक्षित इत्यर्थः। चूतस्य मुकुलमञ्जरी तर्जन्याकृति-र्भवति। समीरवशात् च सा लोलायते। प्रायेण भृङ्गाश्चूतमत्यादरेण समाश्रयन्ति। ते च गुञ्जन्तस्तत्पत्रनिचयान्त इतस्ततो भ्रमन्ति। तद्दर्शनानन्तरं च प्रायेण विरहिणां भूयसी स्मरव्यथा भविष्यतीत्यत्र औचित्यादियं सम्भावना। अन्योऽपि कोऽपि कमपि बाधां बाधितुकामः प्रथमं तस्मै तर्जनभयं ददाति। चतुर्थी त्वत्र सोल्लुण्ठनसम्प्रदानस्य विवक्षितत्वात्। मुकुलितश्च सहकारो वसन्तावतारस्य प्रथमं लिङ्गम्। समदृश्यतेति कर्मणि ॥८९॥

दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च तापमृच्छ च।
इतीव पान्थं शपतः पिकान् द्विजान् सखेदमैक्षिष्ट स लोहितेक्षणान् ॥९०॥

स नलः पिकनाम्नो द्विजान् ब्राह्मणान् लोहितेक्षणान् सत इतीव पान्थं शपत आक्रोशतः सखेदं सदैन्यमैक्षिष्ट दृष्टवान्, उत्प्रेक्षितवानित्यर्थः। इति कथं तदाह। रे पान्थ। त्वं दिने दिने प्रतिदिनमधिकं यथा स्यादेवं तनुरेधि दुर्बलो भव। पुनः पुनर्मूर्च्छ च मोहं च गच्छ। तापं च ऋच्छ प्राप्नुहीति। पान्थे च्चैतत् व्यञ्जन[1]-श्रवणानन्तरमेतत् त्रयं दृश्यते। स च नाम्ना द्विजः। ईक्षणयोरस्य लौहित्यं तद्दर्शनादेवाविज्ञा-[३२.व]-तकारणजः क्रोध आयातः। क्रुद्धाश्च द्विजाः शपन्ति। तेषां च शापः प्रायेण सत्य एव सद्यो भवतीति पान्थस्य तदनन्तर[2]जनानवमूर्च्छन-[3]सन्तापदर्शनान्निश्चितमेव। तत्त्वतस्तु द्विजाः पक्षिणः। तदक्ष्णो लौहित्यं नैसर्गिकम्। भङ्ग्याऽसोत्तरत्र च कोकिलभृङ्गवर्णनम्। सखेदमिति सानुशयव्यथार्थम् ॥९०॥

अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया धिया।
स धूमकेतुं विपदे वियोगिनामुदीतमातङ्कितवानशङ्कत ॥९१॥

स नलोऽलिस्रजा भ्रमरमालयोच्चशेखरमुन्नताग्रशिखं चाम्पेयं नागके[4]शरसंबन्धिनं कुड्मलं निपीय कातरबुद्धिवशात् आतङ्कितवान् प्राप्तातङ्कः सन् वियोगिनां विपदे विवि[5]धोपद्रवायोदितं कृतोदयं धूमकेतुं धूमाकारं ग्रहमेवाशङ्कत मेने। धूमाकारः केतुः केतुचे[6]लाञ्चलाकारो दुष्टग्रहः प्रसिद्धः। स च प्रजानां नानाविधोपद्रवायोदयं कुरुते। एतच्चोक्तेन संविधानेन तदाकारमेव भवेत्। अत एव तद्दर्शनादियं शङ्काऽस्य। 'चाम्पेयः केशरो नागकेशरः काञ्चनाह्वयः'। चाम्पेयस्येदं चाम्पेयम् ॥९१॥

---

1. B2 कूजन-  
2. B1. २. ८. जतानव  
3. B2 --संपात-  
4. B1. -केसर-  
5. B1. विविधो-  
6. B1. -चैला-

गलत्परागं भ्रमिभङ्गिभिः पतत् प्रसक्तभृङ्गावलि नागकेशरम् ।

स मारनाराचनिघर्षणोत्पतज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥९२॥

नागकेशरं चाम्पेयमेव भ्रमिभङ्गिभिर्भ्रमरिकारचनाभिर्गलन् भ्रश्यन् परागो रजो यस्य यतो वा तत् तथा । किञ्च पतन्ती संसृज्यमाना प्रसक्ता लग्ना भृङ्गाणामावलिर्यत्र तत् तादृशं स नलः शाणमिव निकषं यथा विलोकितवान् । साक्षात् स एवाय-मिति निश्चितवान् । कीदृशं शाणमित्याह । मारस्य ये नाराचा आयसाः शरास्तेषां निर्घर्षणादुत्तेजनाद् गलन्त, इतस्ततः पतन्तो, ज्वलन्तो दीप्यमानाः कणाः स्फुलिङ्गा यस्य तं तादृशम् । शाण ईदृशः प्रसिद्ध एव । इदं पुनरुक्तं संविधानादुक्तधर्मशाण-सदृशं भृङ्गावलेः काण्र्ष्यात् नाराचत्वम् । चाम्पेय एव नागकेशरः । केचिदेतं तज्जातीय-मन्यमेवाहुश्चाम्पेयं तु केशरमेव । नाराचः सर्वायसो बाणः कुसुमशरस्य स्मरस्य न सम्भवतीति कातरबुद्धित्वात् तेन न विमृष्टम् ॥९२॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः ।

स्वचापदुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः ॥९३॥

स्मरो लज्जितः । किं कृत्वा ? शिलीमुखालीः षट्पदश्रेणीर्गुणस्पृशः सौरभभृतः कुसुमात् सकाशात् तस्य नलस्य सुगन्धि यक्षकर्दमादिपरिमलाढ्यमङ्गं देहमुद्दि-श्याधिकलाभलोभादनुसन्धाय पातुकाः पतनशीलाः [३२.b] स्वनन्तीरवलोक्य ता एतादृशीर्दृष्ट्वा किमिति स सलज्जो जात इत्याह । स्वचापाद् दुष्टा निर्गता मुक्ता ये मार्गणास्तेषां भ्रमात् भ्रान्तेः । चापाद् यथा विमुक्ता बाणाः स्वनन्तो यान्ति । अत्र चातिसादृश्याद् भ्रान्तिर्युक्तैव । तथा हि शिलीमुखाली भृङ्गश्रेणी बाणावली च तस्यां स्वनन्त्या मुक्तसंविधानकादुक्तधर्माणां बाणानां भ्रमो भवत्येव । शब्दो हि शब्दान्तरसन्निधानादौचित्यात् चार्थं ददाति ।

अत्र च कुसुमं स्मरस्य धनुरस्त्येव। तस्य परिमलगुणयोगोऽप्यस्ति। ततस्तत्र[1] बाण-सन्धानं युज्यत एव। नलस्य चेदृशमङ्गं स्मरस्य वेध्यमस्त्येव। अत्र लज्जित इत्यस्य काकुभङ्गिसमुच्चारणात् सम्भावना गम्यते। नूनं लज्जित इत्यर्थः। अन्योऽपि धन्वी निजधन्वितो विसदृशान् विमुक्तान् स्वनतो गच्छतः शरान् दृष्ट्वा लज्जते। अयं कविः प्रायः काकुस्वरमाददान एव चलतीत्यनुभूयमान-मेवास्ति। तत्त्वतस्तु तदङ्गाधिकसौरभलोभात् कुसुममनादृत्य गुञ्जन्ती भ्रमर[2]-रिञ्छोली तत्र पतन्ती विधत एव ॥९३॥

मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्चरच्चन्दन[3]सारसौरभम्।
स वारनारीकुचसञ्चितोपमं ददर्श मालूरफलं पचेलिमम् ॥९४॥

स नलः पचेलिमं परिपक्वं मालूरस्य बिल्वस्य फलं ददर्श। कीदृशम्? मरुता ललन्तो ये पल्लवा अर्थान्मालूरस्यैव, तेषां[4] कण्टकैः क्षतं दारितम्। अत एव हेतोः समुच्चरत् निर्गच्छत् चन्दनसारस्य मलयजगन्धेः सौरभं यस्य यतो वा तत् तथा। अत एव वारनारीकुचयोः सञ्चिता संपूर्णीकृतोपमा-सादृश्यं येन तत् तथा। पूर्वं संस्थान-मात्रेण सर्वासां मुग्धवधूनां स्तनयोरिद-मुपमानमभूत्। साम्प्रतं त्वेवं रूपं वारस्त्रीणां क्षतचन्दनसारसौरभसद्भावेऽपि बलवन्तं हेतुं विना कुलवधूकुचयोर्न तद् वर्णनम्। वेश्यास्तनावेतादृशावेव भवतः। तत्र हि गौरिमा प्रकृतिजः। क्षतानि भुजङ्गकरजाग्रजानि[5]। चन्दनसारसौरभं च तदनुलेपनात्। अत्र तु हारिद्रो वर्णः परिपाकात्। अन्यत् पुनरुक्तियुक्तितः।

---

1. B1, B2. तत्र-
2. B2. om. -र-
3. B1. -चारु-
4. B1. तथा.
5. B1. -करजानि.

वारवनिताश्चैतादृशास्तन्व्य एव श्लाघ्याः। तदुपरि कुट्टन्य एव कथ्यन्ते। कण्टकेषु मध्ये बिल्वकण्टकानां लोके[1] प्रथमा गणना। ललदिति ललतेर्विकल्पेऽणन्तत्वात्[2]। लड उपसेवायामित्यस्य तु डलयोरेकत्वाद् युक्तमिदं रूपम् ॥९४॥

युवद्वयीचित्तनिमज्जनो[3]चितप्रसूनशून्येतरगर्भगह्वरम्।
स्मरेषुधीकृत्य धिया भयान्धया स पाटलायाः स्तबकं प्रकम्पितः ॥९५॥

स नलः पाटलायाः स्तबकं गुच्छकं स्मरेषुधीकृत्य कामतूणीरं निश्चित्य प्रकम्पितः। कथा एवं ज्ञात्वेत्याह। [33.a] भयेनान्धया निजविषयग्रहणाक्षमधिया। भयं च धियः प्राकरणिकहेतुजमस्त्येव। यतः कीदृशम्? युवतिश्च युवा च युवानौ, तयोर्द्वयी मनसा कर्मणा चैकत्रावस्थितियुग्मापरपर्याया, तस्या ये द्वे चित्ते, तत्र यन्निमज्जनं, तद्योचितान्यर्हाणि यानि प्रसूनानि, तैः शून्येतरं भृतं गर्भगह्वरं मध्यकन्दरापरपर्यायं यस्य स तथा, तम्। एवंविधे चास्मिन् स्मरतूणीरभ्रान्ति-र्भवत्येव। तस्य ह्ययमेतादृशो युज्यते। पाटलापुष्प[4]संस्थानमपीदृगेव स्यात्। अस्मरेषुधिं स्मरेषुधिं कृत्वा स्मरेषुधीकृत्य। द्वयी नदादौ गुणेऽस्त्येव। तत्पर्यायो युगलीशब्दोऽपि दृश्यते। यथा कस्यापि—

वक्त्रं चन्द्रो, नयनयुगली पाटलाम्भोजयुग्मम्,
नासा नालं, दशनवसनं, पुल्ल[5]बन्धूकपुष्पम्।
कण्ठः कम्बुः[6], कुचयुगमथो हेमकुम्भौ, नितम्बो
गङ्गारोधश्चरणयुगलं वारिजद्वन्द्वमस्याः ॥ इति।

---

1. B1. om. लोके.
2. B1. अनन्तत्वात्.
3. B1. -निजमनो-
4. B. -पुष्प-
5. B1. फुल्ल-
6. B. कुम्बुः, B2. कम्बुः.

अत्रौचित्यादेव यूनोः प्राप्तवयस्कयोः स्त्रीपुंसयोर्द्वयी, न तु तरुणयोः पुंसोरेव। तत्रेदृश्यस्य संविधानकस्य वर्णयितुमयोग्यत्वादघटनात् च। तुरुष्केष्वेव हि युवपुरुषद्वयमिथुनकर्म ॥९५॥

मुनिद्रुमः कोरकितः शितिद्युतिर्वनेऽमुनाऽमन्यत सिंहिकासुतः।
तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन् ॥९६॥

कोरकाः सञ्जाता यत्र स कोरकितस्तथा शितिद्युतिर्मेचककान्तिर्मुनिद्रुमोऽगस्त्यवृक्षः वने वर्तमानो नलेन सिंहिकासुतः सैंहिकेयो ज्ञातः। किं कुर्वन्नयमनेनैवं सम्भावित इत्याह। तमिस्रपक्षे कृष्णमासार्धे या त्रुटिर्हानिस्तदेव कूटं छद्म, तेन भक्षितं वैधवं, विधुसंबन्धिनं कलानां षोडशानां कलापं समूहं किल वमन्नुद्गिरन्। किलेति सम्भावनायाम्। सिंहिकासुतो राहुः कार्ष्ण्येन प्रसिद्ध एव। अयं त्वगस्त्यकनामा द्रुमः खलु मेचकदल एव भवति। सिंहिकासुतस्य सिंहस्य मुख्यतया स्थितिर्वने युज्यते। अन्यत्रोपाधिवशात्। बहुलपक्षे चन्द्रस्य कलाः कालवशान्न त्रुटन्ति। अपि तु, त्रुटनमिषेणायमेव भक्षयति। ता एव चैष वने वर्तमान उद्गिरन्नस्तीति राजाऽसौ ज्ञातवानित्यर्थः। अयं मुनेर्द्रुमो, मुनिनामा वा द्रुमो मुनयश्च प्रायः प्रशान्ताः कारुणिका एव भवन्ति। तत् संबन्धादयमपि तादृश एव। ततस्तद् दर्शनात् सर्वेषां प्रायेण निर्वृत्तिः स्यात्। अतस्तद् दर्शनादस्य भङ्ग्या मनागियं सूचिता। अत्रोक्तं मुनिवृक्षगतं वस्तु विचार्यमाणममुष्य विरहिणोऽपि स्तोकं सुखप्रदमेव। अन्ये पुनः केतकादयः पूर्वोक्ताः प्रायेण राज्ञो धामयोग्याः शृङ्गारि-
-णामेवेति तत् संब-[33-b]-न्धात् तेऽपि शृङ्गारिणस्ततस्तेषामुद्दीपनत्वादस्य तद् दर्शनात् परितापः। अतस्ते तथैव वर्णिताः ॥९६॥

पुरो हठात् क्षिप्ततुषारपाण्डुरच्छदावृतेर्वीरुधि बद्धविभ्रमाः।
मिलन्निमीलं ससृजुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः ॥९७॥

पुरो नगर्या वीरुधि निकृष्टपुण्यस्त्रीचेटिकायां विषये बद्धविभ्रमा रचितभ्रमणचेष्टा नभस्वतो वाताधिकस्य वातूलस्य कुसुमेषु केलयः कालखेला विलोकितास्तं राजानं मिलन्निमीलं संघटमाननयनपुटं ससृजुः। कीदृशस्य नभस्वत इत्याह। हठेनाक्षिप्ता समाच्छोटितोद्ग्रथिता तुषारवत् पाण्डुरस्य च्छदस्य वसनस्यावृतिरावरणं येन तस्य तादृशस्य। इयं धृष्टा निकृष्टा नायिका, तादृश एवायं नायकः। एतयोरियं युक्तिर्बाहुल्येन नगरैकदेशेषु दृश्यत एव। पदगुम्फमात्रप्रतीयमानादर्थादस्यैतादृशस्य नृपस्य चक्षुर्निमीलनं युक्तमेव। न ह्ययं सर्वत्र स्मरव्यसनपरवशोऽस्ति। उपेक्षणीया एवैवंविधाः कुवृत्तय इत्यन्येऽपि धर्मज्ञाः सत्रपा एतद् दुर्विलसितं दृष्ट्वा चक्षुषी निमील्य वञ्चयित्वा प्रयान्ति। विशेषेण रुणद्धि शपथदानप्रच्छदपटाञ्चलग्रहणपूर्वं पुरोभूय चिरं भुजङ्गं निषेधयतीति वीरुत्। क्वचिद् ह्रस्वस्य दीर्घता। बद्धविभ्रमा इत्यत्र विभ्रमा विलासा एव वा। इति च्छलपक्ष एवात्र प्रथमतो व्याख्यातः। अथ तत्त्वार्थो यथा-नभस्वतो वायोः कुसुमेषु वर्तमानाः केलयः क्रीडितानुकाराः संसर्गाः समुद्दीपनत्वात् तं मीलिताक्षं चक्रुः। किंरूपाः? पुरो अग्रत एव विलोकिताः। पुनः कीदृशाः? वृतेर्बाधा वीरुधि लतायां बद्धविभ्रमाः स्थिरीकृतभ्रमणरूपगतयः, तत्रैव पुनः पुनर्भ्रमन्त इत्यर्थः। अन्यत् च कीदृशाः? हठात् क्षिप्ततुषारपाण्डरच्छदाः। बलाद् विश्लेषिताकृष्टहिमपतनसितपत्राः। च्छदा अर्थाद् वीरुध एव। नभः खं विद्यते यस्यासौ नभस्वान् वायुः। स खलु यत्रावकाशस्तत्रैव बहुलीभवति। अत एव बाहुल्येनास्य तेनैव संबन्धः। पक्षे नभः खं पञ्चमं देहभूतं भूम्ना विद्यते यस्यासौ नभस्वानित्याकाशाधिक्येन वा तस्याधिक्यमायातम्। ततश्च वातूलत्वम् ॥९७॥

गता यदुत्सङ्गतले विशालतां द्रुमाः शिरोभिः फलगौरवेण ताम् ।

कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दति स्म तान् ॥९८॥

तत्त्वार्थ एव प्रथमं व्याक्रियते । यथा - द्रुमाः शाखिनः यस्या उत्सङ्गतले मध्यांशपृष्ठे विशालतां विशिष्टवृक्षतां गताः प्राप्तास्तां तादृशीं धात्रीं भुवं फलगौ-[34-a]-रव-वशादतिमात्रमतिशयेन नामितैरधोनीतैः शिरोभिः शिखरैर्वन्दमानान्नमस्कुर्वत इव स्पृशतः कथं नाभिनन्दति स्म ? अपि तु युक्तं सदृशाचरणादेवंरूपानेतान् दृष्ट्वा हृष्टः सन् स श्लाघितवान् । या खल्वेतादृशीषु रोहयित्रीषु संस्कृता भूमिस्तस्यां स्वैरं प्रवृद्धा वृक्षा यदि फलित्वा नैवमानम्यैनां स्पृशन्ति, ततः कोऽत्र विशेषः । अयमेव विशेषः खल्वेषां यदेवंरूपता । अथ द्वितीयोऽर्थः, यथा - द्रुमनामानः केचन यस्या उत्सङ्गतले क्रोडमध्यभागे विशालतां बृहत्त्वं प्राप्तास्तां धात्रीमुपमातरमतिमात्र-नामितैः शिरोभिरुत्तमाङ्गैर्वन्दमानान् सविनयं नमस्कुर्वतस्तान् स नलः कथं नाभिनन्दति स्म ? अपि त्वेवं कुर्वत एतानवलोक्य तस्यैवं कर्तुं सर्वथा योग्यमेवेति काकुबलेनार्थः । केन कृत्वा ? शिरोभिर्नामितैरित्याह । फलमुपयोगस्तेन गौरवमत्यादरस्तेन । प्रथमपक्षे तु फलानि प्रसिद्धानि, तेषां गौरवं बृहत्त्वादतिभरस्तेन ॥९८॥.

नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः ।

विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽदत्त न कौमुदीमुदः ॥९९॥.

ईदृशमह्नो दिवसस्य महस्तेजो वियोगित्वात् तस्मै नृपाय कौमुदीमुदो नादत्त । तस्य चन्द्रिकासंसेवनप्रीतयोऽस्मै राज्ञे दातुमुचितास्तद्दानेन न कृतं, अपि तु निर्विशेषणस्य प्रकृतस्यैवास्य यो गुणस्तमेवेदं कृतवदित्यर्थः । कीदृशं तदिति ज्योत्स्नानिर्वृति-दानयोग्यत्वे हेतुमाह । उपवनपवनैर्मधुरशीतलच्छायाचरत्वाद्धिमितं तुषारीकृतम् । पुष्परसैर्मकरन्दैः सततसङ्गात् सुधीकृतममृतरूपतामापादितम् ।

केतकरेणुभिश्च सितीकृतं शुक्लत्वं प्रापितमिति । कौमुद्यामेतद् गुणत्रयं संसिद्धिसिद्धम् । अहर्महसि पुनरन्नोपाधिजं केचित्त्वेवंभूतमहर्मह एव कौमुदी विरहित्वात् तस्मै मुद्दे नास्त्येति व्याचक्षते । तच्चैवंरूपं व्यवहितं क्लिष्टं भिन्नं [1]रूपकं कविरयं मुख्यतया नैव कुर्यात् । श्लेषादिवशेन तु करोत्येव । आतपः कटुकरूक्षत्वाद्दुद्वेजकः । छाया तु मधुरशीतलत्वादाह्लादिका । ज्योत्स्ना तु कषायमधुरत्वात् तत्सदृशगुणशालिनी । तथा च —

"आतपः कटुको रूक्षश्छाया मधुरशीतला ।
कषायमधुरा ज्योत्स्ना सर्वदोषहरन्तमः ॥९९॥

(31)
वियोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन कोपारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥१००॥

पिकेन कोकिलेन प्रसिद्धेन [34.b] वियोगवैरिणा कोपवशान्न तु स्वभावा-दरुणचक्षुषा मुहुः कुहूरुता कुहूशब्दकारिणा चन्द्रस्य वैरिण्यमावास्यानामतिथि-राहूयताकारिता इति काकुवशात् तथेति प्रत्ययः । नूनमेवं कुर्वता ऽनेनैवंभूतेनैतदेव कृतमित्यर्थः । कुहूशब्देन हि सैवोच्यते । यस्य कार्यस्य कालासहत्वादभीक्ष्णं[2] त्वरितमाहूयते, तस्य संबोधनद्योतकेनाहोप्रभृतिना योगो न भवति । यथा - "देवदत्त, देवदत्त, देवदत्त, त्वरितमागम्यतामयमिह सर्पोऽस्ति" इत्यादि । किमर्थमनेनैवं कृतमित्याह । विरहिणोऽपि नृपस्याननं साक्षादमृतांशुं चन्द्रमसं तदेव पूर्वावस्थं पश्यता विरहे हि तस्य विकृतिर्युज्यते । नलस्याननं नाम यदङ्गं स साक्षात् चन्द्र एवास्ति । अतश्चन्द्रवैरिण्येव तद् विकारकरणायाकारयितुं युक्ता । आभीक्ष्ण्येन तारस्वरं कूजतः कोकिलस्य शब्दं श्रुत्वा स किञ्चिदनुच्चमुखरुचिरभूदिति भावः । कुहूं [3]रौतीति कुहूरुत् । अथवा स्वर्णं रुत् कुहूरिति रुच्छब्दो यस्य स तथा ।

---

1. B1. भूरूपकं, 2. B2. -तीक्ष्णं. 3. B2 करोतीति.

अयोगभाज[1] इति चन्द्रपक्षे योगो नाक्षत्रस्तदभावेऽस्य नीःश्रीकता युक्ता। अयमेव चात्र कवेरभिप्रायः, अन्यथा वियोग इत्येव कुर्यात् ॥१००॥

अशोकमर्थान्वितनामताशया गतान् शरण्यं गृहशोचिनोऽध्वगान्।
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ॥१०१॥

एष नृपतिरशोकवृक्षं पल्लवैः कृत्वा प्रतीष्टकामज्वलदस्त्रजालकं सन्तमध्वगानवन्त-
-मिवामन्यत। नूनमयमेवं चेष्टमानः पान्थलोकं रक्षन्नस्तीति सम्भावितवान्[2]। कीदृशा-
-नित्याह। गृहशोचिनः सतोऽर्थान्वितनामताशया कृत्वा शरण्यं शरणे साधुं रक्षितारं
गतान्। सर्वः कोऽपि केनापि बलवता बहुपीडितः कमपि शरण्यं याति। अयमशोको-
-ऽस्ति। नास्ति शोको यस्माद् येन वेति, निर्वचनार्थसद्भावादर्थेनान्वितं युक्तं नाम
यस्य, तस्य भावस्तत्ता, तस्या आशा महती तृष्णा, तया। ते[3] हि गृहं पत्नीप्रभृतिवस्तु-
-जालसहितं शोचन्तः सन्ति। अस्माद् विना तदिदं[4] कथं भविष्यतीति। अयं च
शोकापहस्तस्मादेतमेव शरणं याम इति मत्वा तमाश्रितानित्यर्थः। एतेषां शोकस्य
नाशस्तदैव भवति, यदा शोककारणाभावः। एतत् प्रसादादयमस्माकमवश्यं भविष्यतीति
कृत्वा तं समाश्रितानिति भावः। यथा- अस्य देवस्य प्रसादात् सर्वे क्लेशा यान्ती-
-त्यत्र क्लेशहेतुनाशादेव क्लेशनाशः। तथाऽत्रापि शोकहेतोरभावाच्छोकनाशो गम्यते।
अध्वगा एवंरूपास्तदानीं साक्षात् तत्रोपविष्टाः सन्ति। अथवा कारणदर्शनात्
कार्यमनुमीयते। अशोकस्य पुष्पाणि स्वभा-[35.a]-वलोहितानि सान्द्रेषु पल्लवेषु
सान्द्रीभूय विकसन्ति। तानि च मन्मथस्य शराः। एवं प्रतीष्टप्रहरणाः शरण्या
एव दृश्यन्ते। तदयं नूनं शरण्यः कञ्चन शरणागतं रक्षन्नस्ति।

---

1. B1, 8. om. इति ---- वियोग.
2. B2. सम्भयात्.
3. B2. तर्हि.
4. 8. तदिदानीं.

ते चार्थाद्ध्वगा एव तथैव हि प्रायेण स्मरवैरिणः। इत्याधन्यदप्यभ्यूह्यम्। प्रतीष्टं प्रतिगृहीतं कामस्य ज्वलतामस्त्राणां जालकं समूहो येन तं तथा। अस्त्ररूपं जालकं कोरको वा॥१०१॥

विलासवापीतटवीचिवादनात् पिकालिगीतैः शिखिलास्यलाघवात्।

वनेऽपि तौर्यत्रिकमाररराध तं क्व भोगमाप्नोति न भाग्यभाग्जनः॥१०२॥

तौर्यत्रिकं नृत्यगीतवाद्यं वनेऽपि समाराध्यति स्म। गृहे च सेवमानमस्त्येव। कस्मादि-त्याह। विलासवाप्यास्तटेषु वीचीनां यद् वादनं तस्मात्। पिकाश्चालयश्च तेषां गीतिर्गानात्। शिखिनां लास्यलाघवात् नृत्यचातुरीतः। एतदेव त्रयं तौर्यत्रिकं, तदिदमेवमत्रास्त्येव। युक्तोऽयमर्थः। भाग्यभाक् शुभदैवयुक्तो जनः क्व भोगं विषयसुखं नाप्नोति। अपि तु सर्वत्र प्राप्नोत्येव॥१०२॥

तदर्थमध्याप्य जनेन तद् वने शुका विमुक्ताः पटवस्तमस्तुवन्।

स्वरामृतेनोपजगुश्च सारिकास्तथैव तत्पौरुषगायनीकृताः॥१०३॥

पटवः स्पष्टगिरः शुकास्तं नलमस्तुवन्। कीदृशाः? जनेन तदर्थं नलकृते अध्याप्य पाठयित्वा वने विमुक्ताः। सारिकाश्चामृतसदृशेन स्वरेण कृत्वोपजगुस्तुष्टुवुः। कीदृश्यः? तथैव शुकवदध्याप्य तस्य यत्पौरुषं तस्या गायन्यो गायन्यः कृताः, गायनीकृताः॥१०३॥

इतीष्टगन्धाढ्यमटन्नसौ वनं पिकोपगीतोऽपि शुकस्तुतोऽपि च।

अविन्दतामोदभरं बहिश्चरं विदर्भसुभ्रूविरहेण नान्तरम्॥१०४॥

इत्येवमिष्टेन रुचितेन गन्धेनाढ्यं सम्पन्नं वनमटन् भ्रमन् सन् शुकैरुपगीतोऽपि पिकैः स्तुतोऽपि च सन्नसौ नलो बहिश्चरं परिमललक्षणमामोदभरमविन्दत लेभे। न त्वान्तरं चित्तमध्यभवं शर्मलक्षणं केन नैलं प्रापेत्याह। विदर्भसुभ्रू-विरहेणेति। प्रियजनविरहात् खलु सर्वं ज्वलदिव प्रतिभाति॥१०४॥

करेण मीनं निजकेतनं दधद्द्रुमालवालाम्बुनिवेशशङ्कया ।
व्यतर्कि सर्वर्तुघने वने मधुं स मित्रमित्रानुसरन्निव स्मरः ॥१०५॥

स नलः सर्वैः ऋतुभिः घनं सान्द्रं यद् वनं, तस्मिन् वर्तमानं मधुं वसन्त-मनुसरन्, आश्रयन्, स्मर इव व्यतर्कि, सम्भावितः। अर्थात् तत्रस्थेन जनेन। यथा कामस्तथैवायम-[35.6]-त्र दृश्यत इत्यर्थः। यत्र च मङ्गलवस्तत्र प्रथमो वसन्तः। ननु लिङ्गेन लिङ्गिनो ज्ञानं भवति। तत्केन लिङ्गेनोल्लिङ्गितं यदयमेवं-कुर्वन् स्मर एवास्तीत्याह। निजस्य केतनं चिह्नं मीनं मत्स्यं करे[ण] दधत्। स्मरस्य हि केतनं मत्स्यः। स च केतुदण्डाग्रे युज्यते। तं तु सम्प्रति हस्तेन कलयन्। कया ? द्रुमालवालाम्बुनिवेशशङ्कया। द्रुमाणामालवाला [1] आवापास्तेषामम्बु, तत्र निवेशः प्रविश्यावस्थानं, तस्य शङ्का भ्रान्तिस्तया यदयमस्मिन् जले प्रवि-श्यावतिष्ठेत, ततः कथं गृह्येतेति भयेन ते हस्तादमोचयन्नित्यर्थः। नल स्मरस्यैव रूपमस्ति। पाणौ रेखा रूपो मीनश्चास्ति। आलवालानां जलमप्यस्ति। वसन्तोऽपि तत्र वने विद्यते। ततः खलु युक्तोऽयं वितर्कः। मित्रमपि मित्रमनुसरत्येव ॥१०५॥.

लताबलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः ।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः ॥१०६॥

उपवनपवनस्तं नलमसेवत। कीदृश इति तद्वर्णनार्हं धर्मत्रयमाह। लता एवाबला मुग्धवध्वस्तासां लास्यकला नृत्यचातुरी, तत्र गुरुरुपदेष्टेति मन्दत्वम्। तरुप्रसून-गन्धोत्करस्य पश्यतोहरः। पश्यतो योऽर्थं हरति स चौरः, बलवान् स्तेन इत्यर्थः। अनेन सौरभ्यम्। मधु मकरन्द एव गन्धवारि गन्धद्रव्यवासितमुदकं, तत्र प्रणीतलीलाप्लवनः कृतकेलिमज्जन इति च शैत्यं वनानिलस्य प्रतिपादितम्।

---

1. B1, D. om. hapl. आवापा-------- मीनश्चास्ति ।

लताबलेत्यत्र लता अपुष्पिता एव ज्ञेया: । अत एव तरुप्रसूनेत्यत्र तरुग्रहणं कृत-
-मन्यथा प्रसूनग्रहणमेव कुर्यात् । यद्यप्यनेन सतर्षमेवंविधौ गन्धवह: सेवितस्तथापि
राज्ञामन्यसेवाऽनर्हत्वादेवमेवैषां बाहुल्येन वर्णनं युक्तम् ॥१०६॥

दोहदसेकादिशक्तिजनित षड्ऋतुधर्मवर्णनसहितं केतकमारभ्याशोकं यावदु-
-पस्करसहितं वनं वर्णितमिदं चापि महाकाव्यलक्षणम् । इदानीं प्रसङ्गात् सागरस्य
स्थाने तद्धर्मारोपणपूर्वं तडागं वर्णयति । समुद्रवर्णनमपि हि महाकाव्ये श्रूयते —

अथ स्वमादाय भयेन मंथनाच्चिरत्नरत्नाचितमुच्चितं चिरात् ।
निलीय तस्मिन्निव सन्नपांनिधिर्वने तडागो ददृशेऽवनीभुजा ॥१०७॥

अनन्तरं नृपेण तडाग: अपांनिधि: साक्षात् समुद्र एव ददृशे । अथ चापां
बहूनां जलानां निधिर्विपुल: स तडागोऽस्त्येव । किं कुर्वंस्तडागरूपकृत् समुद्रो
दृष्ट इत्याह । निलीय गुप्तो भूत्वा तस्मिन् वने निवसन् । अन्योऽपि भीत:
पलाय्य वने प्रविश्य निहुतस्तिष्ठति । किं कृत्वेति तिष्ठन्नित्याह । [36·a]
स्वं वित्तमादाय । केन ? मंथनाद् भयेन । एकवारं देवासुरै: प्रमथ्य मम रत्नानि
गृहीतानि । न पुनरागत्य ते मां प्रमन्थयेयुरिति भीतोऽयम् । मथनादवशिष्टं
धनमन्यशाखायागत्य तडागमिषेण निलीय स्थितोऽस्तीति भाव: । कीदृशं
स्वमित्याह । चिरत्नैश्चिरंतनै रत्नैरुत्कृष्टवस्तुभिराचितं समन्ताद् वर्धितम् ।
कथं चिराद्बहो: कालाधावत् । तच्च बहुगुणं कृत्वा पुरो दर्शयिष्यते ।
अन्यस्यापि कस्यचित् केनापि बलवता प्रबाध्य यदि कियानपि धनांशो
गृहीतो भवेत् तदनु स भूयस्ततो बलवतीं धनग्रहणहेतुजां बाधां सम्भाव-
-यन्नुद्धृतं बहुविधं धनमादाय पलाय्य क्वापि वने पर्वतादौ वाऽऽगत्य
निलीय तिष्ठतीति ॥१०७॥

पयोनिलीनाभ्रमुकामुकावलीरदानजन्तोरगपुच्छसुच्छवीन् ।

जलार्धरुद्धस्य तटान्तभूमिदो मृणालजालस्य निभाद् बभार यः ॥१०८॥

यस्तडागाब्धिः पयसि निलीनानामदृश्यीभूय स्थितानामभ्रमुकामुकानामैरावणा-नामावलयः पङ्क्तयस्तासां रदान् दन्तान् बभार दधौ । कीदृशान्? अनन्ताख्य उरग-स्तस्य पुच्छस्तस्येव सुष्ठु छविर्येषामेवंरूपान् । अतीव शुक्लानित्यर्थः । अनन्तोरगः किल सितोऽस्ति । तत्पुच्छस्तु सिततमः । कस्मादेवं चकारेत्याह । मृणालजालस्य बिससमूहस्य निभान्मिषात् । कीदृशस्य? जले अर्धरुद्धं सामिनिषिद्धं तस्य । जलमध्यस्थितार्धस्येत्यर्थः । तथा तटस्यान्तभुवं प्रान्तभूमिं भिनत्ति यत् तस्य तादृशस्य । जलसङ्गतं तटान्तं भित्वा स्थितस्येत्यर्थः । जले निमज्ज्य स्थिताः करिणो रदनैस्तटावनिं भिदन्त्येव । नैवमेतान्येवंरूपाणि मृणालानि किं पुनरेते जलान्तर्निमग्नानामैरावणपङ्क्तीनां दन्ता एवेति । अवयवदर्शनादवयविनः प्रतीतिर्भवत्येव देवैरेक एवैरावतो नीतः । अत्र तु बहवः सन्तीति भावः ॥१०८॥

प्रथमं गजरत्नानि दर्शयित्वाऽश्वरत्नान्याह—

तटान्तविश्रान्ततुरङ्गमच्छटास्फुटानुबिम्बोदयचुम्बनेन यः ।

बभौ चलद्वीचिकशान्तशातनैः सहस्रमुच्चैःश्रवसामिव श्रयन् ॥१०९॥

यस्तडागसागरः उच्चैःश्रवोनाम्नामश्वानां सहस्रमिव श्रयन् भजन् बभौ । किं कुर्वत् सहस्रमित्याह । चलत् कम्पमानम् । कैः? वीचय एव कशान्ता अश्वताडन्यः प्रान्तास्तेषां शातनानि ताडनानि ताडनार्थमभिनयनानि वा तैः । केन कृत्वेत्थंभूत इव भयन्नित्याह । तटान्ते विश्रान्तानां स्वस्थीभूय स्थितानां तुरङ्गमच्छटानामश्वपङ्क्तीनां स्फुटाः प्रकटा ये अनुबिम्बानामुदयाः प्रत्यक्षीभावास्तेषां चु[36·b]म्बनेन स्पर्शेन नृपसैन्यतुरग-राजिस्तटे विश्रान्ता यथावत् तत्र प्रतिबिम्बितास्ति । तुरङ्गस्य प्रतिबिम्बाः कम्पन्ते ।

अत एव तेषां कशान्तताडितानामुच्चैःश्रवसां सादृश्यम्। उदश्वचुम्बनेनेत्यत्र भावानयने द्रव्यानयनमिति न्यायादश्वबिम्बास्त एव गृह्यन्ते। यत्र तेजस्विनस्तरुणास्तुरङ्गमास्तत्रा-वश्यं कशान्तताडनानि शिक्षार्थं भवन्त्येव ॥१०९॥

सिताम्बुजानां निवहस्य यश्छलाद्बभावलिश्यामलितोदरश्रियाम्।
तमःसमच्छायकलङ्कसङ्कुलं कुलं सुधांशोर्बहुलं वहन् बहु ॥११०॥

यस्तडागाब्धिः सुधांशोश्चन्द्रमसः बह्वधिकं बहुलमितस्ततः प्रसृतं पूर्णमेव
[1] वा कुलमन्वयं वहन् धारयन् बभौ। अत एव पूर्णत्वात् तमसा समा तुल्या छाया कान्तिर्यस्यैवं भूतो यः कलङ्कस्तेन सङ्कुलं संकीर्णं पूर्णचन्द्रे हि सम्पूर्णो भवति। कस्मादेवं कुर्वन् शुशुभे तदाह। अलिभिः श्यामलिता श्यामलीकृतोदरश्री-मध्यसम्पदेषां तेषां तादृशानां सितकमलानां छलेन। एतान्यलिकुलसङ्कुलविपुल-मध्यानि विकसितानि सितान्यम्बुजानि न भवन्ति, किं तु तमःसमकान्तिसङ्कीर्ण-पृथुलान्तर्भागो गणनातीतश्चन्द्रवंश एवायमिति भावः। कुलं समूहमात्रं वा ॥११०॥

रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा।
सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवान्वयायि यः ॥१११॥

यस्तडागाब्धिः शार्ङ्गिणा भगवता नारायणेनान्वयायि अनुगतः। कस्मात्? सरोजिनीस्तम्बकदम्बकैतवात्। सरोजिनीनां स्तम्बा निसर्गादेव कृष्णत्वेन प्रसिद्धाः। शालूकसंज्ञा गुच्छास्तेषां कदम्बानि समूहास्तेषां मिषात्। अमी कमलिनीनां स्तम्बा न भवन्ति, किं तु वैष्णव एवैते। शार्ङ्गिणेत्येकवचनं तु जात्या। कीदृशेन? रथाङ्गं चक्रं भजते यस्तेन। कमला लक्ष्मीस्तस्या अनुषङ्गो यस्य स तथा तेन। शिली-मुखाणां बाणानां स्तोम उच्चयस्तस्य सखा तेन। यः शार्ङ्गी शृङ्गमयधनु-र्धरस्तस्यैतद् युज्यत एव। तत्सर्वमत्र शब्दच्छलमात्रेणास्त्येव।

---

1. B1. om. वा ------ सम्पूर्णो भवति।

तत्त्वतस्तु रथाङ्गाश्चक्रवाकाः। कमलानि पद्मानि। शिलीमुखा भृङ्गाः। मृणालमेव शेषनामा खल्वहिर्नागः। सैव भूः शय्या यस्य स तादृशस्तेन। अत्रापि मृणालमिति जातावेकवचनं ज्ञेयम् ॥१११॥

तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गलेखा बिभराम्बभूव यः।
दरोद्गतैः कोकनदस्य कोरकैर्धृतप्रवालाङ्कुरसञ्चयश्च यः ॥११२॥

यस्तडागसागरः तरङ्गलेखारूपाः। तरङ्गिणीर्नदीः। स्ववल्लभा निजपत्नी [ऊ०ब०] रङ्कजुषः उत्सङ्गस्था बिभर्ति स्म। समुद्रस्य हि नद्यः पत्न्यस्तासामस्याङ्के स्थिति-र्युक्तैव। अस्य व्यवहारस्य विधिविहितस्य सर्वत्र योग्यत्वेनोपपात्तत्वात्। एतास्तरङ्गलेखा नैव, किं तु नद्य एवैता अत्रैवं विवेष्टमानाः। यश्च दरोद्गतैः -रीषज्जातैः कोकनदस्य रक्तोत्पलस्य कोरकैः कलिकाख्यैः कृत्वा धृतप्रवाला-ङ्कुरसञ्चयः समस्थितविद्रुम नयोर्भेदसङ्कुटः। समुद्रे विद्रुमलताः प्रसिद्धा एव। वाक्ययोर्द्वित्वादत्र यच्छब्देनोक्तप्रत्युक्तिवशेन कर्तृद्वयोपादानं युक्तमेव। कोकनदस्येति जातावेकवचनम् ॥११२॥

महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य।
नलेन मैने सलिले निलीनयोस्त्विषं विमुञ्चन्विधुकालकूटयोः ॥११३॥

यस्तडागजलालयः नलेन छलेन गुप्तीभूय स्थितयोर्विधुकालकूटयोरमृतविषयो-स्त्विषं यथार्हां कान्तिं विमुञ्चन्नुद्वमन्मेने। नूनमेतेन पीयूषविषयोः कान्ति-मुद्वमन्नस्तीति ज्ञातः। एवमार्दौ तु मोक्षणार्थं शब्दव्यवहारोऽस्त्येव। यथा- 'अयमोदनः खलु बाष्पायमाणोऽस्ति'-इत्यादि। केन कृत्वाऽयमेनमेवं कुर्वन्तमव-बुद्धवानित्याह। महीयसो भूयस्तमस्य गौरस्य च सितस्य मेचकस्य च नीलस्य पङ्कजमण्डलस्य कमलकुलस्य छलेन। अनयोर्द्वयोरपि मिषेणेत्यर्थः।

एतद् गौरं च मेचकं च यत् कमलमण्डलमत्र स एव जले गूढनिमग्नयोरमृत-
-विषयोरच्छविपुञ्ज एवेति तेन निष्टङ्कितमित्यर्थः। विधुशब्देनात्र तात्स्थ्यादमृतम् ॥११३॥

चलीकृता यत्र तरङ्गरिङ्गणैरबालसेवाललतापरम्परा।

ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमधूमभूमताम् ॥११४॥

यत्र कासारसारसागरे तरङ्गरिङ्गणैर्भङ्गचलनैश्चलीकृताश्चञ्चलत्वं प्रापिता,
अबालसेवाललतापरम्परा जरच्छैवलवल्लिजालानि ध्रुवं सत्यमेव वाडवनामा यो
हव्यवाड् वह्निस्तस्यावस्थितिश्चिरवासस्ततः प्ररोहत्तमः प्रकर्षेण प्ररोहन् यो धूम-
-स्तस्य भूमा बाहुल्यं यस्य तस्य भावस्तत्ता तां धारयन्ति स्म। बहुव्रीहौ
भूमार्थस्य गौणीभूतत्वेन भाववाचिनस्तं प्रत्ययस्योत्पादितत्वाद् भाववाचिन एव
भाववाची प्रत्ययः कथमिहेति न शङ्कनीयम्। लिङ्गदर्शनात् लिङ्गिनो ज्ञानं
भवतीति सर्वैः श्रुतं दृष्टं चास्त्येव। समुद्रे वडवानलः प्रसिद्धः ॥११४॥

प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती।

धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरायि[त] ॥११५॥

यत्प्रभवा यत्रोत्पन्ना सरोजिनी पद्मिनी किलाप्सरायिता अप्सरस इवाचरिता
इति जातावेकवचनम्। कया? दिवा स्वर्गेणेति छलेनार्थः। समुद्रप्रभवा रम्भाद्याः
स्त्रीरत्नभूताः स्वर्गसंबन्धेनाप्सरस्त्वं प्राप्ताः सन्ति। स्वर्गवेश्या अप्सरसो रूढित
एव। तासामप्सरस्त्वमप्सु जातत्वादिति चेत् तर्हि तज्जत्वादेव तत्त्वम्। दिवा
स्वर्गसंबन्धेन तु धृतस्फुटश्रीगृहविग्रहा, धृतः कलितः स्फुटाया अतिप्रकटायाः
श्रियः कान्तेर्गृहं धाम विग्रहो देहो यया सा तथा। समुद्रजन्मसंबन्धादप्सर-
-स्त्वेनैव स्त्रीरत्नत्वमायातम्। स्वर्गसंबन्धेन तु तद्विशेषमापादितम्। धर्मान्तरमाह।

प्रकाममधिकस्मरमादित्यं सामान्येनादितेः पुत्रं देवमवाप्य कण्टकैः सहर्षितै-
-र्लोमभिः करम्बिता मिश्रिता कण्टकिततनुयष्टिरित्यर्थः। अप्सरसो हि स्वर्वेश्याः।
सर्वेषां देवानां सामान्याः तथा। अत एव हेतोरामोदस्य प्रमोदस्य भरं गौरवं
विवृण्वती प्रकटयन्ती। अनुभावैर्भावो ज्ञायत इव। इति शब्दमात्रकृतच्छलबलेनार्थः।
समुद्रादनुधृताया एतस्या अप्सरोरूपायाः प्रतिपादितो धर्मश्चिन्त्यः। तत्त्वतस्तु
अप्सरायिता अप्सरस इवाचरितेत्यप्सु जातत्वादेव दिवा दिनेन हेतुना तु
प्रकाममतिशयेनादित्यं सूर्यमवाप्य कण्टकैः प्रसिद्धैः करम्बिता। रात्रौ हि तस्या
निद्रावशात् तनुशैथिल्यात् कण्टकानामपि शैथिल्यमतस्ते स्वरूपाभावात्
सन्तोऽपि न विशेषाद्युपलभ्यन्ते। तस्यामुन्निद्रायां तेऽप्युन्निद्रान्तीत्येवमुक्तम्।
तथा आमोदस्य परिमलस्य भरं विवृण्वती मुञ्चती। यतः कीदृशी? धृतः कलितः
स्फुटस्य विकस्वरस्य श्रीगृहस्य कमलस्य विशिष्टो ग्रहो ग्रहणं यया सा
तथा। रात्रौ निद्रावशेन शिथिलदेहा सती शिथिलं निजावयवं कमलं विस्मृते-
-र्बलीयस्त्वाद् दृढं न गृह्णाति। प्रथमपक्षे धृतायाः सततावस्थितायाः श्रियो
गृहं वेश्म विग्रहो देहो यस्या इति व्याख्येयम्। दिवेति च यत्रैव मुख्यतया
योजितं विशिष्टतममर्थं पुष्णाति, तत्रैव सुविमृश्य योजनीयम्॥११५॥

यदम्बुपूरप्रतिबिम्बितायतिर्मरुत्तरङ्गैस्तरलस्तटद्रुमः।

निमज्ज्य मैनाकमहीभृतः सतस्ततान पक्षान् धुवतः सपक्षताम्॥११६॥

यस्याम्बुपूरे प्रतिबिम्बिता खल्वायतिः शाखाप्रसरैर्दैर्घ्यं यस्य स तादृश-
-स्तटस्यार्थादेतत्संबन्धिन एव योऽसौ द्रुमो महाशाखी स मरुत्संबद्धैस्तरङ्गैस्तरलः
सन् पक्षान् धुवतः पत्राणि प्रकम्पयतो निमज्ज्य सतो ब्रुडित्वा स्थितस्य मैनाकनाम्नो
हिमाचलतनयस्य महीभृतः पर्वतस्य सपक्षतां समानपक्षत्वं ततान।

उप[उ४-व]चारात् तस्य स्थाने स एवासीदित्यर्थः। यत्र हि देवदत्तस्याधिकारस्तत्र तदसम्भवे तस्य यः सपक्षो भवति, स एव तद्रूपत्वेन व्यवह्रियते। समानः पक्षः सहायो यस्य स सपक्षः सम्यक् सदृश एवोच्यते। अथवा सह पक्षैर्वर्तते यः स सपक्षस्तस्य भावः सपक्षता, ताम्। स खलु महाप्रमाणः प्रतिबिम्बरूपो द्रुमः। पवनचलत्तरङ्गवशतरलोभयशाखः सन्नौचित्यात् पक्षान् धुवन् ध्रुवमयमत्र मैनाक एवेति बुद्धिर्भवत्येव। पूर्वमेते सर्वे पर्वताः सपक्षा बभूवुः। तत्रच्येतरपक्षि-वदितस्ततः प्रतिदिशमुड्डीयते(न्ते)। यथारुचि ते भूप्रदेशे निपतन्ति स्म। एवं च तत्र निवासिनामाकस्मिकः संहारो भवतीति क्रुद्धेन गोत्रभिदा च्छिदा विधा-तुमारब्धा। यथादर्शमेतत् कर्मकरणादक्षाणामेतत् पक्षाणां तादृशीमापदमापतन्ती-मवलोक्य मैनाकोऽयमलूनपक्ष एव अपलाय्य समुद्रं सख्यायं शरणं प्रविष्टः। स चाद्यापि तत्र तथैव तिष्ठतीत्यागमः। यदम्बुपूरेत्यत्र यस्येत्यसमसिते पदे प्रयुक्ते सत्यम्बुपूरेण तटद्रुमेण च सह यथारुचि गौणमुख्यभावेनापि संबन्धो झगिति प्रतीयते। अत्र तु समासगतस्य यदर्थस्य सर्वनाम्नानुसन्धिर्वृत्तिच्छन्नस्येति न्यायात् तटद्रुमेण सह संबन्धो व्यवहित इव प्रतिभाति। अन्य संबन्धिनोऽपि तटद्रुमस्य प्रतीतिश्च। यदि च समास एव क्रियते, तदा यत् तटद्रुमोऽम्बुपूरे प्रतिबिम्बितायतिरिति वक्तुं युक्तम्। एवमसाधारणस्याम्बुपूरस्य संबन्धित्वेन झगिति प्रतीतिर्भवेत्। यदि चोभयत्र साधारणमेतत् तर्हि सर्वथाऽत्र खल्वसमास एव युक्तः। अत्र तु सहृदया एव प्रमाणम् ॥११६॥

अग्रेतनकथावस्तुप्रसरनिदानभूतस्य यस्य दर्शनार्थमेतत् सर्वं नलस्य प्रस्थान-प्रभृति तडागावधि प्रासङ्गिकं प्राक्तनं वर्णितं तं प्रस्तावयन्नाह–

पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम्।
स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ॥११७॥

प्रियासु बालासु रतक्षमासु च द्विपत्रितं पल्लवितं च बिभ्रतम्।
स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ॥११८॥

स नलस्तत्र तस्मिन् पूर्वोक्ते समुद्रे श्रीहृति क्रीडातडागे रन्तुकामवरटामधुर-स्वरावहितं चित्रमपूर्वदृष्टं हिरण्मयं सौवर्णं हंसमन्तिके समीप एव विचरन्तमितस्ततश्चेष्टमानं निजभक्ष्यं भक्षयन्तं वा किलाबोधि। सौवर्णस्य तस्यादृष्टपूर्वत्वात् कोऽयमेवंविधोऽत्र जलसमीपे चरन् पक्षिजातिरिति संशय्य जातिस्थानौचित्यादिना हंसोऽयमिति निर्णीतवानित्यर्थः। अबोधीति कर्तरि। किं कुर्वन्तमित्याह। बालासु मुग्धासु रतक्षमासु च किञ्चित् प्रौढासु प्रियासु विषये यथाक्रमं द्विपत्रितं जातद्विपत्रीकं पल्लवितं च जातपल्लवम्। स्मरेण [उ४.७] कर्त्रा स्वत्वर्जितं सञ्चितं कृतं रागमहीरुहस्य प्रेमासङ्गवृक्षस्याङ्कुरमभिनवोद्भेदं चञ्च्वोश्चरणद्वयस्य च मिषेण बिभ्रतं धारयन्तम्। एतदुक्तधर्मविशिष्टं हंसमबोधीति पूर्वेण संबन्धः। हंसस्य चञ्चुचरणयोर्लौहित्यं प्रसिद्धमेव। सौवर्णत्वेऽप्यस्य तत्र लौहित्यमेवास्ति द्विपत्रितत्वपल्लवितत्वयोस्तित्वाद् रागमहीरुहाङ्कुरस्यापि त्रित्वं ज्ञेयम्। एकस्यैवाङ्कुरस्य कन्दलप्रकाण्डत्रयरूपेण निःसरतो दृश्यमानत्वात्। द्वयोः पत्रयोः समाहारः द्विपत्री, सा सञ्जातास्येति द्विपत्रितः। तारकितादिसंदर्शनात् सञ्जातेऽर्थे इतच्। तस्मिन्निवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये चेत्यन्तस्थितस्येकारस्य लोपे द्विपत्रितमिति रूपं द्वे पत्रे सञ्जाते यत्रेति वा। पल्लवः सञ्जातोऽस्येति च पल्लवितम्। चञ्चुर्द्विपत्राकृतिश्चरणौ च पल्लवाकृती लौहित्यात् संस्थानाच्च सन्त्येव। स्मरेण कृत्वाऽर्जितं सञ्चितमिति व्याख्यानं तु यथा विद्यार्जितं धनं [युग्मम्] ॥११७॥ ११८॥

महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम् ।
प्रियावियोगाद् विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत् ॥११९॥

राजा तं पक्षिणमेकान्तमतिशयेनैकान्ते विजने वा मनोविनोदिनं चित्तसुखानु-
-भाविनमवेक्ष्य प्रेयसीविरहेण निर्भरमतिशयेन विधुरो विह्वलोऽपि सन् मनागी-
-षत्, कौतुकाधिष्ठितचित्तवृत्तिर्जातः ॥११९॥

ईदृगवस्थास्य नैतत् सदृशाचरणमिति शङ्कायामुत्तरमाह-

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयानुगम्यते जनस्य वृत्तेन भृशावशात्मना ॥१२०॥

अवश्यं भाविष्यर्थेष्वनवग्रहोऽवग्रहेण दृढधारणेन रहितो ग्रहो हठो यस्याः सैवंभूता वेधसो विधेः स्पृहा वाञ्छा यया दिशा येन मार्गेण भूत्वा यां दिशमुद्दिश्य धावति, तया दिशा जनस्य वृत्तेनाचरितेनानुगम्यतेऽनुस्रियते । अर्थात् सैव वेधसः स्पृहा । यथा यथा विधिः प्रेरयति, तथा तथा जनश्चेष्टत इति भावः । कीदृशेनेत्याह । भृशमवशभूयैव[1] कृत्वा पराधीन आत्मा यस्य तेन । यो हि यस्याधीनः स तदनुगामी भवति । केनेव केत्याह । तृणेन वात्येव । यथा तृणेन शुष्कदर्भादिलेशेन वात्या वातमण्डली खल्वनुगम्यते । एतच्च प्रसिद्धमेव । तृणेनापि वात्यया कृत्वा परायत्तेन[2] । जनस्य वृत्तेनेति वृत्तस्यैव मुख्यत्वेन विवक्षितत्वात् सचेतनगुणाध्यारोपः ॥१२०॥

अथावलम्ब्य[3] क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकन्धरः शिरः पिधाय पक्षेण रतिक्लमालसः ॥१२१॥

अनन्तरं तस्मिन्नेवावसरे स खगो हंसः उपप[31-b]ल्वलं, पल्वलस्य समीपे क्षणमात्रं निदद्रौ सुष्वाप । किं कृत्वा? एकेन पादेनावस्थितिरेका

1. B2. तदेव . 2. B2. -यत्नेन . 3. B2. वि—

पादिका तामवलम्ब्यावष्टभ्य । कीदृशः । तिर्यक् तिरश्चीना आवर्जिता नामिता कन्धरा ग्रीवा येन स तथा । पुनः किं कृत्वा ? पक्षेणैकेन पक्षपुटेन शिरः पिधायाच्छाद्य । किमित्येवंविधो भूत्वेदृशः सन् स तत्र शयितवानित्याह । यतो रतक्लमेन सुरतग्लानिवशादलसो मन्थरः । आतिरलङ्कृतिः । पल्वलमल्प-सर एवोच्यते । अत्र समुद्राधिकगुणे तस्मिन् पल्वलत्वारोपणेन नलस्य महत्त्वं द्योत्यते । तस्य ह्येतत् केलिपल्वलमात्रम् । तेन ये तडागा मार्गादौ धर्माभिवर्धये[1] निर्मापिताः सन्ति, तेषां गुणसामग्री कथंकारं वर्ण्यत इति ॥१२१॥

सनालमात्माननिर्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम् ।
अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भःप्रभुचामरं च किम् ॥१२२॥

स नलस्तं तादृगवस्थं हंसं सनालं नालसहितं काञ्चनं सौवर्णमम्बुजन्म कमलं ह्रिया लज्जयैव नतं, न तु हेत्वन्तरेणेति किमबुद्ध ज्ञातौ । किमित्ये-वमधोमुखीभूयेदं तिष्ठतीत्याह । निजमुखनिर्जितश्रीकम् । नूनमिदं मम मुखश्रिया निर्जितत्वादेवं भूत्वा स्थितमस्तीति स नलः सम्भावितवानिति । कयैरेव सम्भा-वनायां सम्भावना । किं च किं वा पीतं हारिद्रमम्भःप्रभोर्वरुणस्य चामरं प्रकीर्णकमबुद्धेत्यत्रापि संबन्धः । कीदृशं तदित्याह । विद्रुमस्य प्रवालस्य दण्डेन प्रसिद्धेन मण्डितम् । पीतस्य लोहितेन लोहितस्य पीतेन संयोगोऽतीव सौभाग्य-करः । यथा गौराङ्गवधूप्रकञ्चुकप्रवालिकमालिकयोः सांनिध्यादत्रैवं सम्भावना युक्तैव । प्रायेण राजचामराणां सितानामेव विधानपूर्वं दृश्यमानत्वात् पीतमिति विशेषणं विशेषणद्योतनार्थम् । अम्भःप्रभुर्वरुणः स एव प्रथमं प्रशंसापूर्वं राज-शब्दवाच्यः, तेन महत्प्रभुत्वमस्येति । केनापि विशेषेण स हारिद्रमपि चामरं कारयति । यथाऽत्र केषांचित्क्षुद्रप्रभूणां मञ्जिष्ठादिरञ्जिताश्चमरिका मक्षिकानिवारण-

1. B1. -वृद्धये.

-मात्रार्था दृश्यन्ते। एकेनैव किम्‌शब्देनोभयत्रापि वितर्कार्थः प्राप्यते। तद्द्वयो-
-रुपादानं तु द्वयोर्वाक्यार्थयोर्विकल्पप्रतिपादनार्थम् ॥१२२॥

कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ॥१२३॥

अनन्तरमश्वादवतीर्णस्यास्य पदे चरणापरपर्याये उपानहौ चर्ममये पादत्राणे बिभ्रती दधाने रेजतुः दृश्ये बभूवतुः। केन स्वरूपेण रेजतुस्तदाह। किमु बद्धवर्मणी, एते [३१.६] किं गृहीतदंशने स्तः। कीदृशे सती? तयोर्वनयोर्द्वयोः काननसलिलयोः प्रवालैः पल्लवद्रुमैः तथा स्थलजलजभेदेनोभयजातीयैरम्बुजैः कमलैः सह नियोद्धुकामे युयुत्सुनी सती। नूनमेते कवचं परिधाय युक्ति-
-दर्शितैः प्रवालकमलैः सह मल्लयुद्धं कर्तुकामैः। त इति पादत्राणग्रहणानन्तरं वीक्ष्यकाणां सम्भावनाऽभूदिति भावः। ताभ्यां सहानयोर्युद्धकारणं प्रसिद्धं लौहित्य-
-मार्दवस्वीकरणम्। एतावन्तं कालं प्रायेण दूरवर्तित्वादुपेक्षितमेवैतत्। इदानीं तु धरितनिकटभावान्नियुद्धपूर्वं तत्प्रत्यानयनं युक्तमेव। गहनवनजलदुर्गस्थितत्वात् न च ते मृदुयुद्धसाध्ये तत एव तनुत्रग्रहणपूर्वं मल्लयुद्धम् ॥१२३॥

विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडम्बिनीमयम्।
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना ॥१२४॥

अयं नृपः परिवारजने सत्यपि तं पतङ्गं हंसं स्वयमेव पाणिना धृतवान्। न त्वपरेण धारणहेतुना। कीदृशः? मौनिना निःशब्देन चरणेनोपेत पार्श्वः। अर्थात् प्राप्ततत्समीपः। किं कृत्वैवं कृतवानित्याह। कपटेन वामनीं खर्वां मूर्तिं तनुं विधाये-
-त्यनुभवगम्योऽर्थोऽक्षरैर्यथावन्निबद्धुं न शक्यते। कीदृशीं मूर्तिमित्याह। बलिध्वंसि-
-विडम्बिनीम्। बलिध्वंसिनं छलितबलिं विडम्बयत्यनुकरोति तच्छीला या ताम्।

बलिध्वंसी भगवान् विष्णु कपटेन वामनीं मूर्तिं विधाय नभश्चारित्वान्मौनिना निःशब्देन पादेनोपेतपार्श्वः पाणिना पतङ्गं सूर्यं धृतवान्। बलिध्वंसिविडम्बी नलो वयसा युवत्तः। अत्र त्वर्थान्तरभेदाविवक्षैव। [1]इदमेव मूर्तिर्वामनमूर्तिं भगवन्तं विष्णुं [2]मनं हरन्ती विवक्षिता। एतादृशीं नलस्य मूर्तिं दृष्ट्वा हि "अहो ज्ञायते खल्वयं साक्षाद् वामनमूर्तिर्भगवान् विष्णुरस्ति" इत्यध्यारोपो भवत्येव। यदा तु [3]विहितैवंविधमूर्तिं नलं दृष्ट्वा वामनाध्यारोपः क्रियते, तदा सोऽपि बलिध्वंसि-विडम्बी भवति, इत्युभयथाऽपि न दोषः। यतः [4]विवक्षितवक्तुर्विवक्षित-पूर्वा शब्दार्थयोः प्रतिपत्तिरिति ॥१२४॥

तदात्तमात्मानमवेत्य सम्भ्रमात्पुनः पुनः प्रायसदुत्प्लवाय सः।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलम् ॥१२५॥

स हंस आत्मानं तेन नलेनात्तं गृहीतमवेत्य ज्ञात्वोत्प्लवनार्थं सम्भ्रमा-दौत्सुक्यात् पुनः पुनः प्रायसत् [5]प्रयासं चकार। पश्चात् किं कृतवानित्याह। उड्डयने विषये निराशतां नैव मम मुक्तिरस्ति, इत्येवंरूपां गतः प्राप्तः सन् विरुत्य विरुद्धं वासित्वा निरोद्धुर्[6]गृहीतुः [7]संबन्धिनौ करौ दशति स्म। एतदेवैकं कृतवान् [40.a] यत् किंचित्किंचायित्वा नलहस्तौ चञ्चग्रेण यथाशक्ति गाढं [8]खादितवानित्यर्थः। अत्रोत्तरार्धे आनन्तर्यवाचकं समुच्चयद्योतकं वा किमपि पदमध्याहार्यं, यथा सुखेनैव वाक्यार्थावगतिः स्यात् ॥१२५॥

1. B1. इयं॰. B2. इयमेव.
2. B1, D. मनुहरन्ती
3. B1. -विविध-
4. D. om. विवक्षित-
5. D. प्रायसं॰.
6. B2. गृहीतः
7. D. सन्धिनौ.
8. B2. रोदित- B1. खादित-

ससम्भ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयाऽनुकम्पिताम् ।
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव ॥१२६॥

सरः कर्तृ तं नृपं पतगस्य हंसस्य ग्रहात् धारणात् न्यवारयदिव । "राजन् नेदं तव कर्तुं युक्तम्"- इति न्यषेधयदिवेत्युत्प्रेक्षा । कैः कृत्वा ? ऊर्मिलोलैर्वीचि-चलैर्वारिरुहैरेव करैः । किं कृत्वैवमिदं चकारेत्याह । उत्कतयोत्कण्ठिततया अनुकम्पितां दयालुतां प्रपद्येति छलेनार्थः । तत्त्वतस्तु उद्गलितमुच्छलितं कं जलं यस्य तदुत्कं, तस्य भावस्तत्ता, तया । अनुकम्पितां मुहुश्चञ्चलताम् । कीदृशम् ? सह सम्भ्रमेण वर्तते ससम्भ्रमं । एवंभूतमुत्पात्युत्पतनशीलं यत् पतता-मेकजातीयानामेव पक्षिणामर्थात् हंसानां कुलं वंशस्तेनाकुलं विह्वलमिव । अन्योऽपि कश्चिद्यदि क्रोधावेशादिवशात् कस्मिन्नपि तदर्हे स्वजनादौ विषये दण्डयष्टि-खड्गादीनामन्यतममुत्थाप्य प्रहर्तुं धावति प्रहृतवानेव वा भवति, तदा तं समुत्सु-कोत्थितनिजकुलजनं कोऽपि कारुणिकः प्रतिवेशिकादिर्धर्मा मैवमिति लोलेन करेण निवारयतीत्युक्तिलेशः ॥१२६॥

पतत्त्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वलम् ।
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ॥१२७॥

कलहंसमण्डली कादम्बपङ्क्तिः कूले वर्तमाना सती चुकूज । कीदृशी ? श्रियो लक्ष्म्याश्चलन्ती ये पदाम्भोरुहे पादपद्मे तयोर्ये नूपुरे मञ्जीरौ तदुपमा तत्सदृशी । यथा तस्या झणझणायमानौ नूपुरौ, तथैव या सम्भाव्यत इत्यर्थः । चलनेन च तयोर्झणत्कारमायातमेव । किं कुर्वत्याः श्रियः इत्याह । तत् पूर्वोक्तं सरः प्रविहाय यान्त्याः । यतः कीदृशम् ? रुचिरेण सौवर्णत्वान्मनोज्ञेन पतत्त्रिणा वञ्चितं दूरतस्त्यक्तम् ।

अन्यापि काऽपि श्रीमती नायिका किमपि नगरगृहादि रुचिरेण रुचिप्रदेन पुरुषेण यदि वञ्चिता भवति, तस्यास्तत् प्रविहाय यान्त्या मञ्जीरौ शिञ्जेते (शिञ्जाते)। तस्मिंश्च तादृशे हंसे नलेन गृहीते तज्जातीयेष्वपरेषु विजातीयेषु च कोकबककारण्डवादिषूड्डीय एवं स्थानान्तरं च समाश्रितेषु तस्य सरसो या श्रीः शोभा तस्याः प्रयाणं युक्तमेव। वर्तमानकालनिर्देशात् तस्याः प्रत्यागमनं त्वरितमेव भविष्यतीति ध्वनितम्। प्रयान्ती ह्यनुनीयाऽपि त्वरितं प्रत्यानीयते। प्रयाता तु चिल-[40.b]-म्बे महता प्रयत्नेन वाऽयं चास्मिन् सरसीदानीमेव द्विगुणहर्ष-भरमन्थरैर्जलपक्षिभिर्हंसादिभिः समाश्रिते सति सहर्षं प्रत्यायास्यति। श्रीसन्नि-धानादन्यासामपि नायिकानां नूपुरप्राप्तिस्तस्यास्तु कः सन्देहस्तत्र ॥१२७॥

न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः।

इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ॥१२८॥

खलु नूनं खगाः पक्षिणः इति मनसिकृत्य क्षितिं भूमिं प्रविहाय नभः खमाश्रिताः सन्त आरवैः कृत्वा तं नलमाक्रोशन्ति स्म। इति कथं तदाह। अङ्ग भो राजन्! वसुधा भूमिरत ऊर्ध्वं न वासयोग्या। इयं केत्याह। यस्याः पतिस्त्व-मीदृश एवंरूप उज्झितस्थितिस्त्यक्ताचारः। हंसस्य ग्रहणात् त्यक्ताचारत्वरोपणम्। अत्र पूर्वत्र वर्तमानस्य वसुधाशब्दस्य परामर्शकस्तच्छब्द एव प्रयोक्तुं युक्तो, न तु क्षितिशब्दः। यदि चोत्तरार्धे क्षितिशब्दनिर्देशस्तर्हि पूर्वार्धे खल्वियमितीदमो निर्देशो नैव वाक्यार्थः सङ्गच्छते। किं तु पूर्वोत्तरार्धयोर्वसुधाक्षित्योरुपादानमुक्तिप्रत्यु-क्तिभङ्गिविशेषात्। पूर्वार्धवाक्यार्थो हि निरपेक्ष इव पूर्वत्रैवावतिष्ठते। उत्तरार्ध-वाक्यार्थस्तु पृथगिवानीयोपन्यस्यते। इयं च वाक्यार्थभङ्गिरतीव सूक्ष्मा वरं वयं शून्यरूपे नभसि वासं करिष्यामो, न तु बहुविधवस्तुधारिण्या अपि, यस्या वसुधाया

धनरत्नपूर्णायां धरायामस्त्वमीदृशस्त्यक्ताचारः किं राजा पतिस्तस्यामिति विचार्य तां विहाय खमाश्रिताः खगा विविधैरारवैर्नूनं शापदानपूर्वं तं विनिनिंदुरिति भावः॥१२८॥

न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन्मुहुः।

अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा॥१२९॥

इयं प्रत्यक्षतयोपलभ्यमाना जातरूपच्छदजातरूपता द्विजस्य पक्षिणो न दृष्टा, क्वापीतः पूर्वं न प्रत्यक्षीकृतेति। अनया रीत्या मुहुः स्तुवन् श्लाघमानः स जनाधिनाथस्तेन करपञ्जरस्पृशा पाणिसम्पुटमध्यस्थेन मानसौकसा हंसेन भणितः। जातरूपस्य सुवर्णस्य च्छदाः पक्षास्तैः कृत्वा जातं रूपं यस्य स तथा, तस्य भावस्तत्ता। अथवाऽर्थान्तरं द्विजस्य ब्राह्मणस्य जातरूपस्य सुवर्णस्य यः च्छदः प्रावरणपरस्तेन जातं रूपं द्रव्यता यस्य तस्य भावस्तत्ता। न हि ब्राह्मणस्येदृक् क्वापि कदापि सम्भवतीति तद्दर्शनाद्भूयो भूयः स्तुति-र्युज्यत एव। करयोः पञ्जरमित्यनेन पीडनभयाद् गाढत्वं विरलाङ्गुलित्वं च सम्पुटस्य ध्वन्यते॥१२९॥

सौवर्णपक्षवर्णनात् भ्रान्तेन तेन यदुक्तं तदाह— [40·a].

धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः।

तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान्॥१३०॥

हे राजन्! भवन्मनस्तव चित्तं धिक् निन्द्यम्। कीदृशम्? मम हेमजन्मनः सौवर्णान् पक्षान् समीक्ष्य तृष्णातरलं धनया लोलुपं भवतु। कथय अमीभिर्मम पक्षैः कृत्वा तव कियान् कियत्प्रमाणः कमलाया लक्ष्म्या उदयः समुच्छ्रयो भवेत्? अपि तु न कियानपि। कस्येव कैरित्याह। तुषारशीकरैरवश्यायत्रसरेणुभि-रर्णवस्येव। यथा तनुतरैर्नीहारलेशैः कृत्वाऽर्णवस्य कियान् कमलस्य जलस्योदयो वृद्धि-र्भवेन्न तु कियानपीति श्लेषार्थः कमलं जलमिति॥१३०॥

न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।

विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ॥१३१॥

हे राजन्! तवैतादृशस्य मधुरमूर्तेरीक्षणाद् विश्वसितान्तरात्मनो विस्रब्धमनसो मम वधो न केवलं परं प्राणिवधमात्रमपि तु विश्वस्तवधोऽपीति हेतुगर्भविशेषणादर्थः। ननु तदपि भवतु, कोऽत्र दोष इत्याह। धर्म एव धनं, येषां तैर्द्विषामपि विश्वासजुषां विश्वस्तानां निबर्हणं हिंसनं विशिष्याधिकं कृत्वा विशेषेण गर्हितम्। तस्मात् तन्नैव कदापि क्वापि कर्तव्यमित्यर्थः ॥१३१॥

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते।

धिगीदृशं ते नृपते! कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥१३२॥

स्थाने स्थाने शूराः संग्रामदुःसहाः सन्ति। तेषां किं नास्ति ता पतितास्ति। एष हिंसारसो वधरागस्तव तेषु न पूर्यते। अपि तु तत्र पूर्यते। तस्मात् गत्वा तत्र पूरयैनमित्यर्थः। त्वं च तथापि तत् सर्वं विहाय हिंसारसप्रेरणादेवं कुर्वाणोऽसि। तस्मात् हे नृपते! भवत ईदृशमेतं कुत्सितं विक्रममतिशक्तिकार्यं धिक् निन्दामि। ईदृशं कमित्याह। यः कृपाश्रये दयापात्रे कृपणे अकिंचने पतत्रिणि पक्षमात्रविभवे। यदस्माकं पक्षा न भवेयुस्ततः का गतिर्भवेत्। अस्मासु सर्वथा दयैव केवलं युज्यत इत्यर्थः ॥१३२॥

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।

त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते ॥१३३॥

हे राजन्! यस्य मम वारिभूरुहां जलभूमिजानां फलेन यथा सम्पन्नेन सस्येन मूलेन च मृणालशालूकादिना कृत्वेत्थमनया भवदनुभूतया रीत्या वृ-[५१.७]-त्तयः शरीरयात्राः जीवनानीति यावत्। कस्येव? मुनेरिव मुनिसदृशस्य।

ईदृशा वृत्तयो हि मुनेरेव भवन्ति। अद्य च त्वया तस्मिन्नपि दण्डधारिणा निग्रह-कारिणा पत्या कृत्वा धरणी भूः कथं न हृणीयते, न लज्जते ? अपि त्वीदृशेन धैर्येण धरण्या लज्जितुमेव युज्यते। हृणीङ् धातुरयं कण्ड्वादिषु लज्जार्थः। केचित्तु घृणार्थमाहुः ॥१३३॥

इतीदृशैस्तं[1] विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥१३४॥

स खगो हंस इत्येतावद्भिरीदृशैः पूर्वोक्तैर्वाङ्मयैर्वाचः प्रपञ्चैस्तं सचित्रवैलक्ष्यकृपं विरचय्य विधाय दयायाः समुद्रे तस्य नलस्याशये हृदये गिरो वाच एव कारुण्य-रसस्यापगाः साक्षान्नद्यश्चकार, सञ्चारयामास। आपगाः समुद्रस्य पत्न्यस्तस्यातिथि-त्वयोग्या एव। कारुण्यमयानि वचनानि विरचयामासेत्यर्थः। चित्रं पक्षी तिर्यगेवं मानुषवत् पटुविदग्धं वक्ति। वैलक्ष्यं निन्दाश्रवणात्, कृपा तु तत्करुणवचना[2]कर्णनात्। सह चित्रवैलक्ष्यकृपाभिर्वर्तते सचित्रवैलक्ष्यकृपस्तम्। नलाशये गिरामतिथिधर्मारोपणं तु तासामतिथिपूजायोग्यत्वात्। कृपा तु दयाया भूयस्त्वात् तत्समुद्रस्तदाशयः॥१३४॥

ता एव गिर आह—

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
[3]गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि न ॥१३५॥

सम्बुद्धिविषयीकरिष्यमाणं पुरोवर्तिनमिव विधिमुद्दिश्याह। जरातुरा विस्रसाकुला जननी माता मम तावन्मदेकपुत्रा। अहमेवैकः पुत्रो यस्याः सा तथास्ति। अथवा मदेकपुत्रा मम जननी जरातुराऽस्तीति जरातुरत्वमेव विधेयम्। तथा तपस्विनी वराकी वरटा मम भार्या हंसी नवप्रसूतिः सद्यः प्रसूताऽस्ती-त्येतेन तयोर्निजवृत्तौ सर्वथैवाक्षमत्वं सूचितम्। एवं च तयोरेष

1. B2. इतीदृशि. 2. B1, B2, 8. कारण— 3. B2. मति—

मल्लक्षणो ऽन्यो गतिः सर्ववृत्तीनामभ्युपायः साधनमिति यावत्। अतस्त्वमेतादृशं मा मर्दयन्नाशयन्नहो विधे सृष्टस्त्वां करुणा दया रुणद्धि न। अपि तु त्वं तस्या रोद्धुं युक्त एवेति नकारोऽयं यथास्थानस्थित एव विध्यर्थो वाक्यालङ्कारो न रुणद्धीत्येवमपि संबन्धे क्रियमाणे स एवार्थो विवर्तते। तमर्दयन्निति शतृन्तं विशेषणं विधे( )इति विशेष्येण सह साकूतकाकुविशेषादस्मद् बुद्धि धारया समुच्चार्यमाणमत्रोपलम्भार्थ-[४१.८]-मधिकतरं द्योतयति। 'गतिर्मार्गे दशायां च ज्ञाने यात्राभ्युपाययोः' ॥१३५॥

इदानीं विशिष्य प्रत्येकमाह- किंच

मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः ॥१३६॥

भो मातः! सुतशोकसागरः परं केवलं त्वयैवैकया दुरुत्तरो दुःखेन तरीतुं शक्यः। नन्वन्योऽपि स्वजनवर्गोऽस्ति, तत् कथं ममैवात्राधिकार इत्याह। यतो मम सखायः सुहृदः स्रवदश्रवः सन्तो मुहूर्तमात्रं यका भवस्य निन्दा धिगीदृशो यः संसारः क्षणदृष्टनष्ट इत्यादिस्तया कृत्वा निवृत्तिं शोकसागरान्निवर्तनमेष्यन्ति। यतस्ते दयायाः सखायो दयासखाः। दयया सार्धं तेषां गौण एव योगोऽस्ति। तव तु मुख्यः। यथा कश्चन सागरे पतितो भवत्यन्ये तु तटस्था भवन्ति, तत्र यस्तस्मिन् पतितस्तस्यैव सुदुरुत्तरः[1]। तटस्थास्तु तमीदृगवस्थमुद्दिश्य मुहूर्तमात्रं भवनिन्दां कृत्वा ततस्ततो निवर्तन्ते ॥१३६॥

मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये! स कीदृग्भविता तव क्षणः ॥१३७॥

---

1. B1, 8. सदुत्तरः

हे प्रिये! स क्षणः कालविशेषस्तव कीदृशो भविता, भविष्यति? अपि तु वज्रपातोपमो भावीति[1] भावः। किं कुर्वत्या इत्याह। भो अमुक! भो अमुक! मम प्रियः कियद्दूरे आगच्छन्नस्तीति त्वया भवत्योदिते सति। अथ पश्चाद् अनिष्टकथनस्यायोग्यत्वान्निरुत्तरान् रुदतः पक्षिणो हंसान् विलोकयन्त्या ईदृगवस्थाने तानवलोक्याकस्मिकवज्रपातोपमभयातङ्कशोकवशाद् दृढशिरोहृदयताडनपूर्वं विमूर्च्छ्य विह्वलीभूय भुवि निपतितायाः विस्मृताचरणायाः। तव मरणदशासदृशो भविष्यतीति तात्पर्यार्थः ॥१३७॥

कथं विधातर्मयि पाणिपङ्कजात् तव प्रियाशैत्यमृदुत्वशिल्पिनः।

वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटन्तपनिष्ठुराक्षरा ॥१३८॥

हे विधातः! कथय प्रियायाः शैत्यमृदुत्वयोः शिल्पि विज्ञानि यत् तव पाणिपङ्कजं, तस्मात् सकाशात् भो अमुक हंस! त्वं वल्लभया सह वियोक्ष्यसे इति ललाटन्तपनिष्ठुराक्षरा लिपिः कथं निर्गता? अपि तु ततोऽस्या ईदृश्या निर्गमो न युक्तः। स च दृश्यते तत एवेयं चिन्ता। कारणानुरूपेण हि कार्येण भवितव्यम्। तव पाणिर्हि पङ्कजम्। पङ्कजञ्च[2] शीतप्रकृतिजलसम्भवाच्छीतस्तस्माज्जातं पङ्कजमपि शीतम्। न च वक्तव्यं शीतप्रकृतिसम्भवमवश्यं शीतमिति नावश्यंभावः। शीतप्रकृतेर्जलात् सम्भूतानां मत्स्यानामुष्णत्वदर्शनादिति। तत्र मत्स्यानामुष्णत्वे विधिनिर्मितोऽवान्तर [42.b] एव कश्चिद् बली हेतुरस्ति। यस्माज्जालमुष्णत्वमनुभूय चिकित्सागमेषूक्तमुष्णा मत्स्या इति। पङ्कजमिदं तु प्रियाशैत्यमृदुत्वकार्य[3]दर्शनाच्छीतमेवानुमीयते ॥१३८॥

1. B2. भवतीति. 2. B1. पङ्कजश्च. 3. B2. -कार्ये-

अयि ! स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतोदिता ।

मुखानि लोलाक्षि ! दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ॥१३९॥

अयीति सप्रेमकोमलामन्त्रणे । हे लोलाक्षि ! प्रकृतितरलनयने प्रिये ! त्वमद्य स्वयूथ्यैरात्मयूथभवैर्हंसैरिमं बन्धवधलक्षणं वज्रघातसदृशं मम वृत्तान्तमुदिता कथिता सती । बत खेदे । अहह ! निःसन्देहं दशसङ्ख्याकान्यपि दिशां मुखानि शून्यानि रिक्तानि द्रक्ष्यसि । प्रिये जने सन्निहिते हि रिक्ता अपि दशापि दिशो भृता दृश्यन्ते । तं विना तु भृता अपि रिक्ताः । लोलाक्षीत्यपरगुणगणस्मरणसूचनपरम् । स्वयूथे भवास्तिर्यञ्चः स्वयूथ्याः ॥१३९॥

ममैव शोकेन विदीर्णवक्षसा त्वयापि चित्राङ्गि विपद्यते यदि ।

तदस्मि दैवेन हतोऽपि ही हतः स्फुटं यतस्ते शिशवः परासवः ॥१४०॥

हे चित्राङ्गि प्रिये ! ममैव शुचा स्फुटितहृदयया यदि भवत्याऽपि म्रियते तत् ततो ही मदुत्कृष्टं दैवेन हतोऽपि न हतोऽस्मि सुहत एव कृतः । यतः स्फुटमवश्यमेव ते वराकाः शिशवः परासवो मृता एवेति बलवतो हेतोर्दर्शनात् भाविनि मरणे भूतवदुपचारः । एतच्च वचनमस्त्यादिक्रियानिरपेक्षमेव लोके प्रवर्तमानं दृश्यते । वक्षःशब्देनात्रोपचारात् तत् समीपवर्ति हृदयं गृह्यते । एवंविधशोकवशादन्यत्र तस्यैव विदीर्णत्वेन वर्ण्यमानत्वात् ॥१४०॥

तवापि हा हा विरहात् क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते ।

चिरेण लब्धा बहुभिर्मनोरथैर्गता क्षणेनास्फुटितेक्षणा मम ॥१४१॥

[1] हा हेति खेदातिशये । ते ममास्फुटितेक्षणाऽनुद्घाटिताक्षाः क्षणमात्रेण गता विनष्टाः । कीदृशाः ? बहुभिर्मनोरथै[2]रिच्छाभिश्चिरेण लब्धाः ।

---

1. B2. om. हा हेति —— लब्धाः । 2. B1. मनोरथैश्चिरेण.

ये किलैवं प्राप्तास्तेषां गच्छन्तां वेलेव न लग्ना इत्यर्थः। किं कृत्वा गता इत्याह।

मम तावच्चणकरातुरामात्यन्तिको[1] विरह एव। तथापि विरहाच्चणकप्राप्तिं विना क्षुधा बुभुक्षया कृत्वा स्खल्याकुला विहस्ताः सन्तः कुलायकूलेषु नीडप्रान्तेषु विशेषेण लुठित्वेति भ्रान्तिरलङ्कृतिः। अस्फुटितेक्षणा इति तेषां पाकानामक्षिणी विधि-निर्मितजालकपिहितत्वात् बहुमुखे इव भवतः। ततः पक्षाङ्कुरनिर्गमदशायां पिधान-भूतजालकस्य मूर्ध्नां विभिधोद्घटितत्वात् तयोर्लोके स्फुटितव्यवहारः। [43.a] यस्य क्षपाकुशूलादेः पिधानादिमुद्राभेदो भूतः स लोके स्फुटित इवोच्यते॥१४१॥

सुताः कमाहूय चिराय चुङ्कृतैर्विधाय कम्प्राणि मुखानि कं प्रति।

कथासु शिष्यध्वमिति प्रमील्य स स्रुतस्य[2] सेकाद् बुबुधे नृपाश्रुणः॥१४२॥

स हंसः इत्युक्त्वा तदनु प्रमील्य चक्षुषी मीलयित्वा कारुणिकशिरोमणे-र्नृपस्य संबन्धिनोऽश्रुणो नयनजलस्य सेचनाज्जागरितः। इति कथमित्याह। हे सुताः पुत्रकाश्चुङ्कृतैश्चुंकरणैः कृत्वा कमाहूय कं प्रति च कम्प्राणि मुखानि कृत्वा कथासु शिष्यध्वमुद्दिश्यध्वं भ्रियध्वमिति प्रथमं प्रलप्येत्यर्थः।[3] इयमपि भ्रान्तिरेव। अमङ्गलश्रुतिपिधानविद्भिर्मृतः कथाशेष उच्यते।[4] कथास्वेव गुण-कीर्तनद्वारेण रोष उद्धृतो, न तु मूर्त्यालोकेष्विति कृत्वा॥१४२॥

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयाऽवनिपालः।

रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय॥१४३॥

इत्थमेवं विलापान् सृजन्तममुं शकुन्तं अथ पश्चाद् दीनदयालुतया जनक-जनकारुणिकतयैवावनिपालो नलो मुमोच। न तु इत्यन्तरेण।

---

1. B1. चुणकदानात्यन्तिको. 3. E. अयमपि.
2. B2. च्युतस्य 4. B1. यथा —

अवनिपाला हि विशेषतो दीनेषु दयालवो युक्ताः। किं कृत्वेत्याह। रे वराक! [1 अदृष्ट] यद् दर्शनाय मया त्वं धृतोऽसि तद्रूपं सुवर्णपक्षजं चारुत्वमदर्शि दृष्टं यथेच्छमिच्छाया अनतिक्रमेण गच्छ याहीत्यभिधायेति प्रविस्तृतार्थसंक्षेपक्रमजातिरियम् ॥१४३॥

आनन्दजाश्रुभिरनुस्त्रियमाणमार्गान् प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान्।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन नीराजनां जनयतां निजबान्धवानाम् ॥१४४॥

स हंसो निजबान्धवानां प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान् आनन्दजाश्रुभिरनुस्त्रियमाणमार्गांश्चक्रे। तद्गुरुणदर्शनात् निजबान्धवानां प्राक् प्रथमं शोकेन निर्गमिता ये नेत्रपयसामश्रूणां प्रवाहा बभूवुस्ते तेन मुक्तेनानन्दजाश्रुभिः प्रहर्षोद्भूतनेत्रवारिभिरनुस्त्रियमाणमार्गा अनुगम्यमानपदवीकाः कृता इत्यर्थः। तस्य विमुक्तस्य दर्शनसमनन्तरमेवामीषां चक्षुषोर्विषरूपाणि शोकाश्रूणि गलहस्तितानि कृत्वा तेषां स्थानममृतरूपाणि हर्षाश्रुण्यधिष्ठितानीति भावः। भावद्वयसांकर्यसन्धिरयम्। किं कुर्वतामित्याह। चक्रनिभस्य चक्रसदृशस्य चङ्क्रमणस्य गतिविशेषस्य च्छलेन नीराजनां लोकप्रसिद्धारात्रिकसंज्ञां जनयतां कुर्वतामिति। यथा लोका आरात्रिकमुत्तारयन्तो विचेष्टन्ते। तथैव तदुपरि विचे-[43-b]-ष्टमानानामित्यर्थः। अन्येऽपि बान्धवाः कञ्चन बन्धुं केनापि बलवता कुतोऽपि हेतोर्निग्रहाय गृहीतं विलोक्य प्रपलाय्य दूरस्थिताः सन्तः सम्भूय शोचन्तोऽश्रूणि मुञ्चन्ति। तत्क्षणमेव च तं विमोक्षितं निरीक्ष्य हर्षाश्रूणि वर्षन्तो यथाविहितमारात्रिकं कुर्वन्ति। सृगतावित्यस्य धातोरनुपूर्वस्य यणियणाशिषोर्य इतीकारागमे रमृवर्ण इति रत्वे चानुस्त्रियमाणरूपसिद्धिः।[ ] काव्यमिदमानन्दशब्दाङ्कम्। अतः प्रथमसर्गान्तेऽप्ययमानन्दशब्दः। एवमपरेष्वप्येकविंशतिसङ्ख्येषु वेदितव्यम् ॥१४४॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
-काव्ये चारुणि नैषधस्य चरिते सर्गोऽयमादिर्गतः ॥१४५॥

कविराजानां कवीश्वराणां राजिः पङ्क्तिस्तस्या मुकुटरूपेष्वलङ्कारेषु मुकुट-नामालङ्काराय वा हीरः साक्षाद् वज्राकरोत्पन्नो हीरकनामा रत्नविशेषो यः श्रीहीरशर्मा विद्वत्तमः स पिता यं श्रीहर्षशर्माणं कविपण्डितमिश्रं सुषुवे जनयामास। मामल्लदेवी नाम माता च यं सुषुव इति संबन्धः। कीदृश-मित्याह। जितेन्द्रियचयम्। स श्रीमान् किल वेदान्तवेदित्वादतीव प्रशान्तोऽभूत्। तादृशं विना च कथमशेषाणामिन्द्रियाणां जयः खलु सम्भवेत्। तस्य श्रीहर्षस्य चिन्तामणेश्चिन्तामणिनाम्नो मन्त्रवरस्य पुरःप्रतिपादयिष्यमाणस्य यच्चिन्तनं शुक्लध्यानं तस्य साक्षात् फले तत् प्रभाव प्रभवत्वात्। तथा शृङ्गारस्य भङ्गीबाहुल्येन रचना, तथा चारुणि मनोज्ञे महाकाव्ये यथास्थानविन्यस्त-प्रशस्तनिजाष्टादशलक्षणे नैषधस्य निषधदेशोद्भवस्य महाभारतादिविदित-नाम्नो नलस्य चक्रवर्तिनश्चरित इति वृत्तेऽयमादिः प्रथमः सर्गो महाकाव्य-प्रकरणावधिसङ्केतितनामा गतः पूर्णः। यां भूमिं प्रापयितुमिष्टोऽभूत् तां प्राप्त इत्यर्थः। सर्गे हेतुकृते फलमिति शुभम् ॥१४५॥

शाण्डिल्यनाममुनिवंशकरीरकस्य श्रीधीरधीरतनयस्य गदाधरस्य।
कॢप्तौ सुधामधुनि नैषधटीकिकायां सर्गोऽयमादिरिति सम्प्रति पूर्यते स्म॥१॥